कर्मोद्रिक्तत्वान्नित्यतत्कुत्यते॥ नामरूपात्मकं यदिदं सर्वं जगदेतावंतं कालं विलीनमासीत्तत्पुनः सृजे इति तच्छक्तिविशिष्टः परशिवः स्वस्य जामीनमेवं
रूपेणेच्छितवानित्यर्थः॥ अत्र सर्वं जगदिति विवक्षता लोकान्नु सृजा इति लोकसृष्टिप्रतिपादिकायाः श्रुतेराकाशादिभूतसृष्टि
रपि विवक्षिता॥ सानुरूपसंहारन्यायेन सिद्धेति प्रयोजनाभावान्न पृथगुक्तेत्यपि मर्वाचोवर्णितः॥३॥

सू॰ भग॰ गी॰
६

एवमीक्षणानन्तरं किं कृतवानिति तत्राह ॥ स पुरनारेति ॥ अंभो मरीचीर्मरमाप इति ये काः कस्मानुक्ता नाम्ना तेनांस्तवंल्लोकास्स्वजत्परमेश्वरः प्रभुः स्वतं
त्रोपि मर्त्यांन्द्रमसोधाता यथा पूर्वमकल्पयदिति श्रुतेरतीतकल्पक्रमानुसारेणैव ॥ आत्मा यच्छक्तिमान् ॥ आत्मनश्च संबंधिनी जगदाकारेणावि
वर्तमाना या त्रिगुणा माया शक्तिस्तद्बलात्सम्यक् सृष्टवानित्यर्थः ॥ अंभःप्रभृतीनां निर्वचनं च श्रुत्यैव प्रतिपादितं ॥ अदो नः परेण दिवं द्यौः प्रतिष्ठां
तरिक्षं मरीचयः पृथिवी मरो या अधस्तात्ता आप इति स लोकः । दिवस्तु लोकांतानां अंभःशब्दवाच्याः मरीचयस्त्वंतरिक्षलोकः ॥ मर इति मर्त्य
लोकस्तु भूलोकस्तस्य अधस्तात्तु ये लोकाः सप्त अप्शब्दवाच्या इति तस्याः श्रुतेरर्थः ॥ अत्र तत्तद्रूपात्मनः परमेश्वरस्य सृष्टं ॥ तथा च भगवत्याप्युक्तं

स पुनः स कलाने नांभोलोकान्नात्मयशक्तितः ॥ ४ ॥ यथा पूर्वं कर्मणैव सुरासुरनृजन्तवः ॥

रेरप्यात्मगृहीतिरितरकर्तृत्वादि
न्यधिकरणस्य प्रत्ययस्य बलेके निलीने ॥ तथाहि ॥ किं पत्र सृष्टेनेनोक्तं आत्मा विराड्उत परमेश्वर इति विषयो आत्मनः आकाशः संभूत इति पर
मेश्वरकर्तृक सृष्टेरेवोपादानानीनात्मयोगी मानय ज्ञात्मोऽस्मानाय दिति गवान यनादि ४ सृष्टेराकाशादिमहाभूतविषयत्वात् द्व्य स इमांल्लो
कानसृजतेति भूतसृष्टिव्यतिरेकेण विराट्कर्तृक लोक ४ निगवानयनादिशरीरधारिव्यवहारप्रसिद्धेकएव संभवति ॥ एतावधारणस्य
न सविकार प्रपंचवायात्त येषमात्मने विशिष्टवात्त सृष्टेनोक्तं आत्मनि याप्रेय निधीयते ॥ ४ ॥ परिष्टादि पृथिवी वायुराकाश आपोज्योतींषीत्या
दिना महाभूतैः सह सर्वकार्यजातमनुक्रम्य सर्वं तत्प्रज्ञानेत्रमिति प्रज्ञाप्रत्यपरवस्य वर्णनादुपक्रमेपि महाभूतसृष्टिरूपसंहर्गव्यानयत्व
न सृष्टिविषयत्वात्परमेश्वर एवात्मस्त्रष्टा एवं चैकत्वावधारणमपि न कर्तृत्वं तत्त्वनिगवाधानपनं तु विद्यास्तत्स्वार्थत्वान्न विरुध्यते ॥ तथा
चोक्तं ॥ आत्मा वा इदमित्यत्र विराट् स्यादथ वेश्वरः ॥ नाम सृष्टेनेश्वरः स्यान्न वा ध्यानप्रत्यक्षिनिष्ठ ॥ न तोपसंहृते रीशः स्याद्दैतावधारणात्

एवं लोकसृष्टिप्रतिपादनेन परमेश्वरस्वरूपं तावदभेनजल्पयित्वा पुनश्च लोकपालादिसृष्टेरपि सृष्टं लोकरूपस्य प्रयोजनस्यैकत्वेन
गतार्थत्वादस्यास्य च सर्वस्य ॥ स एतमेव सीमानं विदार्येत्यादेः प्रज्ञानप्रतिष्ठां प्रज्ञानं ब्रह्मेति ब्रह्मात्मैकत्वलक्षणप्रतिपादकवाक्यशेषत्वा
त्सर्वं परित्यज्य कोयमात्मेत्यादिवाक्यसंदर्भप्रतिपादितमर्थं वक्तुकामास्तेन परम्यां प्राप्य तं ब्रह्मेमं पुरुषं स एतमेव सीमानं वि
दार्यैतया द्वारा प्रापद्यतेति श्रुतिबलात् ताद्या मां ब्रह्मरंध्रा प्रविष्टयोः क्रियाशक्तिज्ञानशक्तिलक्षणयोर्ब्रह्मणोमध्ये कतरः स आत्मे

नेह रंके चिद्धितिकेचिद्धि स्तुसुरात्मनः ॥ ५ ॥ केचिन्मामेव चेच्छंतिक
चिद्दिंद्रादिं प्रादिदेवताः ॥ केचित्प्रधानं त्रिगुणं स्वतंत्रं केवलं जडं ॥ ६ ॥

ति जायमानसंशायवद्वादिविप्रतिपत्तेरपि तद्धेतुत्वात्तमुदाहरति ॥ तह रमित्यादिना ॥ यः सृष्ट्वेनोक्तं आत्मा तमित्यर्थः ॥ केचित्प्र
धानमिति सांख्या हि चेतनवोपादानः बैजगतो जडत्वानुपपन्नेस्तदनुरूपमचेतनं सत्त्वरजस्तमोगुणात्मकं प्रधानमेव जगदुपा
दानमिति तस्यैव स्त्रष्टत्वमिच्छंति ॥ वेदांत्यत्रिमतमायातो वैलक्षण्यमाह स्वतंत्रमिति ॥ साहि परमेश्वराश्रिततया तमरं तत्रा

स०ग्र०रामगी० अणवः केचिदिति ॥ अत्र न यरिमाणैर्मद्वयपैरधिकपरिमाणस्य घटादेरारंभदर्शनात्पार्थिवादिपरमाणव एव द्व्यणुकादिप्रक्रियया प्राण
दृष्टवत्सर्वं जगदारंभंत इति नाकिकाः ॥ शब्द केचनेति ॥ वैयाकरणास्तु ॥ शब्दब्रह्मैवार्थप्रपंचात्मना विवर्तत इति शब्दस्यैव का
७ रणत्वं वर्णयंति ॥ उक्तं हि ॥ अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरं विवर्ततेर्थभावेन प्रक्रिया जगतो यत इति ॥ ७ ॥ भूतानि चैके इतीति
॥ भूतेभ्य एव भौतिकस्य सर्वस्योत्पत्तिदर्शनात्तेषामेव कारणत्वं न तु तद्व्यतिरिक्तः कश्चित्प्रत्यगात्मा विद्यत इति ॥ केषांचिन्मतं ॥ अप
रे तु अनाकलितदर्शनाः जगदिति सर्वथैव नास्तीति मन्यंते ॥ तथा च तावपि जगत्कारणे वादिविप्रतिपत्तिर्दर्शिता सम्यक्

अणवः केचिदिवंति शब्दं केचन मोहिताः ॥ तृणप्रध्वंसि विज्ञाने केचनन्यो न सः ॥ ७ ॥ शून्यसंज्ञं तु राः केचिन्निरुपाख्यं विमोहिताः ॥
केचिद्भूतानि चैके तु नित्यसर्वं किंचन न्यमात् ॥ ८ ॥ तत्र तत्रैव तर्कांश्च प्रवदंतियथाबलं ॥ श्रुतिस्मृत्योर्विरुद्धा इति मे मतिः ॥ ९ ॥

समनावाप्तियतिर्यदृष्टान्यतानिः पुरुष इति चिंत्यमिति ॥ ८ ॥ श्रुतिस्मृत्योर्विरुद्धा इति ॥ सोकामयत बहुस्यां प्रजायेयेति तदा
त्मानं स्वयमकुरुत मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ॥ मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ मायाध्यक्षेण प्रकृति
: सूयते सचराचरमित्यादिश्रुतिस्मृतिभ्यां चेतनस्य परमेश्वरस्य जगदुपादाननिमित्तत्वेन तयोः श्रवणत्वादिरुद्धतया वादिप्र
तिपत्तेर्दुष्प्रामाणिकत्वात्तद्देतुकः संशयो जगत्कारणे नास्तीति सिद्धमात्मैव शिव इति प्रतिज्ञानं ॥ राम० ७

नचैवं श्रुतिस्मृतिविरोधास्मोरण्यादिशास्त्रेणमप्रामाण्ये कथं तत्र तीर्थकारणां प्रवृत्तिरित्याशंक्य तन्त्रप्रवृत्तौ पापमेव कारणमित्याह ॥
पापिष्ठानामित्यादिना ॥ १२ ॥ सोपानक्रम इति ॥ स्वस्वशास्त्रोक्तात्मानात्मविवेकं सामान्येन जानानाः सांख्यादयस्तद्विशेषमतिपादकमु
पनिषन्मार्गोपरंपरया समाश्रयेन इत्यर्थः ॥ १३ ॥ विचिंत्य बलेइति ॥ वेदमार्गमाश्रितास्ते सन्त्यास्तस्य वेदस्य च बलाबले विचार्य पुरुषबुद्धि

पापिष्ठानां तु जंतूनां तत्र तत्र सुरर्षभ ॥ प्राक्तसंसारवशाद्देवजायते रुचिरास्तिकाः ॥ १४ ॥ नेपि कालविपाकेन श्रद्धया सतयापि
च ॥ पुरातनेन पुण्येन देवतानां प्रसादतः ॥ १५ ॥ कालेन महता देवाः सोपानक्रमतः पुनः ॥ वेदमार्गमिमं मुख्यं प्राप्नुवं
ति चिरंतनं ॥ १६ ॥ प्राक्तसंसारवशाद्देवये विचिन्त्य बलाबलो विवक्षुणवेदमापन्नास्तेपि केकमनागिनः ॥ १७ ॥ वेदमार्गमिमं मु
ख्यमर्गमत्यसमाश्रितः ॥ हस्तस्थपाय संत्यक्त्वा लिहेत्कूर्परमात्मनः ॥ १८ ॥ विना वेदेन जंतूनां मुक्तिर्माश्रितिरेव चेत् ॥ न मसा
पि विना लोके नेपश्यंति घटादिकं ॥ १९ ॥ तस्माद्देहो हि तो द्यर्थः सत्संत्यसत्यमयोदितं ॥ अन्यैतवेदितो द्यर्थो निसत्यः परमार्थतः
॥ २० ॥
प्रभवत्वेन स्वशास्त्रस्य दौर्बल्यं ॥ अपौरुषेयत्वेन वेदस्य च तिर्दुष्टं प्रामाण्यं निश्चित्य नास्तत्परंतत्राः स्वमार्गं परित्यज्य वेदमार्गमेव केव
लमाश्रयते ॥ अतः सोपानक्रमेण तेषामपि वेदोदिता मुक्तिर्नव्यसाक्षज्जेन सिध्यतीवेत्यर्थः ॥ १३ ॥ तस्मादिति ॥ यस्मादेवं मानिराण
मपि वेदे पर्यवसानं ॥ तस्माद पौरुषेयत्वेन निर्दुष्टवेदवाक्यप्रतिपादितएवार्थः सत्यः ॥ न तु वेदव्यतिरिक्तेनेत्यर्थः ॥

सू॰ब्र॰गी॰ ननु वेदप्रतिपादितोऽर्थः सत्यस्तेन क्रियाकारकादिना द्वैतजगतोऽप्यात्मवद्वेदार्थतया सत्यत्वं स्यादित्याशंक्य तस्य व्यावहारिकसत्यत्वं प्र
८ तिपादयितुं वेदार्थस्य द्वैविध्यमाह॥ परमार्थ इति वेदस्य हि कांडद्वयं॥ यत्र ज्ञानकांडे सत्यज्ञानादिलक्षणो योऽर्थः प्रतिपादितः स एव साक्षात्प
रमार्थः॥ कर्मकांडप्रतिपादितस्तु स्वर्गादिर्विरिंचिवनितालक्षणः प्रपंचः सत्यज्ञानादिलक्षणे परमात्मन्यध्यस्ततया परिकल्पितः॥ तदेतत्कां

परमार्थो द्विधा प्रोक्तो मया हे स्वर्गवासिनः॥ एकः स्वभावतः साक्षात्परमार्थः स ईश्वरः॥१७॥ स शिवः सत्यचैतन्यसुखानंतत्वलक्षणः॥
अपरः कल्पितः साक्षाद्ब्रह्मण्येवाध्यस्तमायया॥१८॥ कल्पिता नाम वस्तूनां नामधेयेन मायया॥ परमार्थेन क्रनाप्यवहारे सुरर्षभा
ः॥१९॥ रोतुसंज्ञः प्राः केवना परमार्थता॥ आकाशादिजगच्छुक्तिरूप्येनेव कथितं मया॥२०॥

उदयस्य कल्पिताकल्पितविषयत्वं शागपि प्रपंचितं॥ साम्याद्वैतपरः कश्चिद्वेदभागः समासतः॥ कल्पितद्वैतनिष्ठस्तु वेदभागोऽपरस्तथे रामः
ति॥२१॥ पद्यैवं कल्पितद्वैतपरः कर्मकांडस्तु हि सर्वोऽपि वेदार्थः सत्य इति नियमो नास्तीत्यत्राह॥ कल्पिता नामिति॥ सर्वस्मिन्मायया ८
परिकल्पितत्वेन वस्तुत्वेऽप्याकाशादिके व्यावहारिकसत्यत्वे नैव परिकल्प्यते॥ शुक्तिरूप्यादिकं तु व्यवहारेऽप्यसत्यमेवेति॥२०॥

जगतोऽपि व्यावहारिकसत्यत्वांगीकारात्र वेदार्थस्य सत्यत्वहानिरित्याह॥ व्यावहारिकेति॥ सति प्रमातरि यत्राबाधप्रमाणं जगद्व्यावहारि
कसत्यं कदाचिदपि बाधविधुरं सत्यज्ञानानंदैकरसं ब्रह्म हि परमार्थतः सत्यं॥ तदुभयं वेदः प्रतिपादयति॥ मायानिरंतु नैव मिथ्या
र्थः॥२१॥ किं तर्हि मायैतिरैः प्रतिपादितमिति तदाह॥ स्वप्ने त्वादिना॥ अन्ये सौगतनिर्मिता मायाः॥ स्वप्नावस्थापरिकल्पितसत्यार्थ

व्यावहारिकसत्यार्थं साक्षात्सत्यार्थचिह्नतः॥ उभयं वक्ति वेदस्तु माया नैवं वदंति हि॥२१॥ स्वप्नावस्थासु संज्ञप्त
सत्यार्थेन समानिमान्॥ अर्थानेवामनंत्यन्ये मायाहे स्वर्गवासिनः॥२२॥ जाग्रत्काले तु संज्ञप्तसत्यार्थे-
न समानिमान्॥ मायाएवामनंत्यर्थाक्काकथसत्यचिह्नते॥२३॥

सदृशान्जाग्रदर्थानेकेवलं प्रतिपादयंति॥ ननूक्तविधं साक्षात्सत्यमात्मानं॥२२॥ अन्ये तु वैशेषिकादिमायाजाग्रदवस्थायां व्या
वहारिकसत्यत्वेन मायापरिकल्पितो येऽविद्यांतप्रतिमनस्तत्सदृशान्द्रव्यगुणकर्मलक्षणानर्थानेव केवलं प्रतिपादयंति॥ अ
तो मायाणां सत्यचिह्ने पारमार्थिके वस्तुनि काकथा॥ प्रतिपादनप्रसक्तिरपि नास्तीत्यर्थः॥२३॥

सू: ग्रस्ताग०
९

तस्मादिति॥ व्यावहारिकसत्यत्वस्य जगत एव प्रतिपादनात्पारमार्थिकसत्यसिद्धत्ववस्तुनोऽप्रतिपादनाच्चेत्यर्थः॥ एकैकयादृष्ट्येति व्यावहारिक
दृष्ट्या दृष्ट्यंतरेणेति पारमार्थिकदृष्ट्येत्यर्थः॥ भ्रांतानां इति व्यावहारिकसत्यस्याकाशादिजगतः पारमार्थिकसत्यत्वेनान्यथाग्रहणं भ्रांतत्वं॥
२४॥ ननु व्यावहारिकसत्यत्वमेव पारमार्थिकसत्यत्वं न त्वेकमेव वस्तु दृष्टिभेदमात्रेण सत्यमसत्यं च भवतीत्यत आह चेतन्येति॥ मृद्घटादि
कारणेषु सत्सु तत्र घटादिकार्यलयदर्शनात्कारणमात्रस्य सत्यत्वं कार्यस्य चासत्यत्वं प्रसिद्धं॥ न भावकाद्यकार्यस्य कारणनूतं तत्र दृश्ये

तस्मादेकैकया दृष्ट्या मार्गाः सत्यार्थनाशिनः॥ दृष्ट्यंतरेण ते भ्रांता इति सम्यग्विरूपणे॥२४॥ चेतन्यापेक्षया चेत्यं व्योमादि सकलं जग
त॥ असत्यं मत्स्वरूपं तत्कुंभकुड्याद्यपेक्षया॥२५॥ कुंभकुड्यादयो नावा अपि व्योमाद्यपेक्षया॥ असत्याः सत्यरूपास्ते शुक्तिरू
प्याद्यपेक्षया॥२६॥ जाग्रद्दिक्कादितावस्थामपेक्ष्य स्वपनानिर्था॥ अवस्थासत्यरूपा हि न सत्या हि दिवौकसः॥२७॥

रणनूतं परात्रि वचेनमपेक्ष तं कार्यं वित्यं॥ वियदादिनूतजातमसत्यं॥ नच्च घटकुड्यादिलक्षणस्य कार्यस्य कारणनूतं तत्र दृश्येत्यासत्यं॥२५॥ कुंभकुड्यादयोपि स्व
कारणनूतवियदादिमहाभूतापेक्षया असत्यास्तेपि सत्येच प्रमानरिबाध्यमानं शुक्तिरजतादिकमपेक्ष्य सत्याः स्थितिप्रमानर्यबाध्यमा
नत्वात्॥२६॥ तथा जाग्रदवस्था स्वकारणमपेक्ष्यासत्यापि सति प्रमानरिबाधविरहरूपास्व प्रावस्थावेलक्षात्सत्तानामपेक्ष्य स्वप्नावस्था
पि सत्येव प्रमातिरिबाधितत्वात् सत्येवं॥ एवमेकस्यैव वस्तुनो व्यवहारदृष्ट्या सत्यत्वं परमार्थपापीव सत्यमसत्यत्वं चविरुध्यत
इत्यर्थः॥२७ रामः
९

यद्येवं परमार्थदृष्ट्या असत्यस्यैव सत्यतया अध्यवसायात्मार्गाणां नास्तिहि मिथ्याभूतानां तेषां परंपरया पारमार्थिकत्वं वेदमार्गविधिप्रतिपादितप
रमार्थसत्यसिद्धत्वं परविशेषस्वरूपावाप्तिहेतुत्वमित्याशंक्य सदृष्टांतमनुपपादयति॥ तथापीति॥ यद्यपि स्वप्नावस्था मिथ्याभूता
तथापि स्वप्नदृष्टवस्तुनाविनः सत्यस्य फलस्य सूचकं भवति॥ सूचकत्वं च भगवता व्यासेनापि सूत्रितं॥ सूचकश्च हि श्रुतेराचक्ष

तथापि स्वप्नदृष्टं तु वस्तु वैश्वासिवासिनः॥ सूचकं हि भवत्येव जाग्रत्स्वार्थसिद्धये॥२८॥ तथैव मार्गाः सुभ्रांता अपि वेदोदितत्वत
तु॥ अर्थस्य प्राप्तिसिद्ध्यर्थं भवत्येव न संशयः॥२९॥ तस्माद्वेदेतरा मार्गा नैव सत्या इति निरूपणे॥ वेदनिष्ठस्ततो मार्गान्कदाचिद
पि न स्पृशेत्॥३०॥ वेदनिष्ठस्त मार्गस्ते न्माहे नापि स्पृशेद्यदि॥ प्रायश्चित्ती भवत्येव नात्र कार्या विचारणा॥३१॥

वन्नद्धिदृशति॥ सा च श्रुतिरेव माम्नाता॥ यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति॥ समृद्धिं तत्र जानीयादिति॥ यथा चैवं तथैव मिथ्याभू
ता अपि मार्गा वेदप्रतिपादितस्य सच्चिदानंदाखंडैकरसस्य पारमार्थिकसत्यवस्तुनः सोपानक्रमेण प्राप्तिहेतवो भवंतीत्यर्थः॥२९॥

सू॰ ब्र॰ गी॰
१०

एकस्यामपि तैः पाईपंक्तौ वैदैकसंस्थितैः ॥ मोहेनापि न भुंजीत भुक्त्वा चांद्रायणं चरेत् ॥ ३३ ॥ स्नात्वा ह्यन्नविवाहादि कार्यमध्ययनं कृते
॥ यदि तैर्मोहितैः कुर्यात्क्रियां चांद्रायणत्रयं ॥ ३३ ॥ मधिमारि विज्ञानं नाहंदीनश्रुतौ स्थितैः ॥ तेभ्यो मोहादपि प्राज्ञः श्रेयस्कामी कदा
चन ॥ ३४ ॥ वेदबाह्येषु मार्गेषु संसक्ता ये नराः ॥ ते हि पाषंडिनः साक्षात्त्याज्यास्तैः सहवासिनः ॥ ३५ ॥ कलौ जगद्विधातारं शिवं सत्या
दियज्ञणं ॥ नाचरिष्यंति वेदेन पाषंडोपहताजनाः ॥ ३६ ॥ वेदसिद्धं महादेवं सांबं चंद्रार्धशेखरं ॥ नाचरिष्यंति वेदेन पाषंडो
पहताजनाः ॥ ३७ ॥ वेदोक्तेनैव मार्गेण भस्मनैव त्रिपुंड्रकं ॥ धूलनं नाचरिष्यंति पाखं॰ ॥ ३८ ॥ रुद्राक्षधारणं भक्त्या वेदोक्तेनै
व वर्त्मना ॥ नाकरिष्यंति मोहेन पाखं॰ ॥ ३९ ॥ लिंगादि नैरिने देवं शिवरुद्रादिसंज्ञितं ॥ नाचरिष्यंति वेदेन पाखं॰ ॥ ४० ॥ देवकर्म
र्यं न कुर्वंति पित्र्यकार्यं विशेषतः ॥ औपासनं न कुर्वंति पाखं॰ ॥ ४१ ॥ पंचयज्ञान्न कुर्वंति तथैवातिथिपूजनं ॥ वैश्वदेवं न कुर्वंति
पाखं॰ ॥ ४२ ॥ पंचयज्ञं न कुर्वंति तथैवातिथिपूजनं ॥ वैश्वदेवं न कुर्वंति पाखं॰ ॥ ४२ ॥ वेदबाह्येन मार्गेण पूजयंति
जनार्दनं ॥ निंदंति शंकरं मोहात्पाखं॰ ॥ ४३ ॥ ब्राह्मणं केशवं रुद्रं भेदभावेन मोहिताः ॥ पश्यंत्येकं न जानंति पाखं॰ ॥ ४४ ॥ अद
क्षिणमनः संगमधौतचरणं तथा ॥ कुर्वंत्यनग्निकं श्राद्धं पाखंडोपहताजनाः ॥ ४५ ॥

रामः
१०

एकादश्यामथाष्टम्यां चतुर्दश्यां विशेषतः ॥ उपवासं न कुर्वंति पाखं॰ ॥ ४६ ॥ शान्तरुद्रीयचमकैस्तथा पौरुषसूक्तकैः ॥ नाभिषिं
चंति देवेशं पाखं॰ ॥ ४७ ॥ निरंतनानिष्ठानानिश्चिवस्य परमात्मनः ॥ न दर्शंति महाभक्त्या पा॰ ॥ ४८ ॥ श्रीमद्दक्षिणकैलासे वन्ने
नैश्रद्धया सह ॥ वसरं न करिष्यंति पा॰ ॥ ४९ ॥ श्रीमद्व्याघ्रपुरे पेवर्त्रे नं मुक्तिमुक्तिदं ॥ वसरं न करिष्यंति पाखं॰ ॥ ५० ॥ अन्येषु च
विशिष्टेषु शिववर्त्मनि ॥ वसरं न करिष्यंति पाखं॰ ॥ ५१ ॥ दिने दिने तु वेदांतमहावाक्यार्थनिर्णयं ॥ आचार्यान्न करिष्यंति पाखं॰ ॥
५२ ॥ संन्यासं परहंसाख्यं नांगीकुर्वंति मोहिताः ॥ प्रदद्वे पंच करिष्यंति पाखं॰ ॥ ५३ ॥ अन्यानि कर्माणि वेदेनैवोदिता
नि तु ॥ नाचरिष्यंति तान्येव पाखं॰ ॥ ५४ ॥ स्मार्तान्यपि तु कर्माणि पापानि सुरोत्तमाः ॥ नाचरिष्यंति तान्येव पाखं॰ ॥ ५५ ॥

सू॰ ब्रह्मगी॰
११

इति श्रीमत्काशीविलासक्रियाशक्तिपरमभक्तश्रीमत्त्र्यंबकपादाब्जसेवापरायणेनोपनिषन्मार्गप्रवर्तकेन माधवाचार्येण विरचितायां

ऊर्द्ध्वपुंड्रं ललाटे तु वर्तुलं चार्द्धचंद्रकं॥ धारयिष्यंति मोहेन पाखंडं॥५६॥ शंखचक्रगदावज्रैरंकनं विग्रहे स्वके॥ मोहेनैव करिष्यंति पाखंडं॥५७॥ मनुष्याणां च पाषाणाद्युतेषामाकारतोपि च॥ लांछितास्य न विष्यंति पाखंडं॥५८॥ बहुनोक्तेन किं वेदमर्यादाभेदनं सुराः॥ श्रद्धयैव करिष्यंति पाखंडं॥५९॥ धारा विशिष्टाश्च महेश्वरस्य प्रसादयुक्ताश्च महत्तमाश्च वेदोदितं केवलमेव देवाः सुदृढां करिष्यंति विमुक्तिसिद्ध्यै॥६०॥ ॥इति श्रीसूतसंहितायां यज्ञवैभवखंडे उपरिभागे ब्रह्मगीतासूपनिषत्सु द्वितीयोध्यायः॥२॥

सूतसंहितातात्पर्यदीपिकायां यज्ञवैभवखंडे उपरिभागे ब्रह्मगीतासूपनिषत्सु द्वितीयोध्यायः॥ ॥ ॥

रामः
११

त्वं हरं केचिद्विद्वांसो नावादिविप्रतिपत्तिं निराकुर्वन् श्रुतिप्रसिद्ध एवात्मा स्वस्वरूपत्वेनोक्त इत्ययमर्थः प्रतिपादितः॥ स एव स्वस्व शरीरे देहेषु क्रियाशक्त्यात्मना प्राणरूपेणावस्थितस्तं प्रपद्यामो प्रापद्यत ब्रह्मैवमं पुरुषमिति श्रुतेः॥ तथा चिच्छक्तिरूपेण च ब्रह्मरंध्रादस्त्रविशः स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यतेति॥ अनयोर्मध्ये कतरः स आत्मा यः प्रत्यगात्मस्वरूपत्वेन ज्ञातव्यः॥ स किं प्राणरूपः उत चिच्छक्त्यात्मक इति हि प्रश्नः॥ श्रुतावनारितत्त्वस्यांतरत्वाय नवापरपनियेतवास्प्रणोतीत्यादिकाश्रुतिः॥ अथ तस्याः श्रु

ब्रह्मोवाच॥ सर्वप्राणिशरीरेषु नामसाक्ष्येव सकलस्य तु॥ साक्ष्य
तावेजगत्सर्वं कथं जानाति सुरोत्तमाः॥१॥

तिः॥ अथ तस्याः श्रुतेरर्थं विकुर्वाणः सर्वसाक्षित्वं साधयति॥ सर्वेति॥ सर्वेषु शरीरेषु आत्मत्वेनावस्थितो यः परमेश्वरः स सर्वस्य जडप्रपंचस्य नासकः॥ साक्षी चिन्मात्रस्वरूप एव द्रष्टव्यः॥ विपक्षे बाधकमाह॥ साक्षितावइति पद्यसो चिन्मात्ररूपसाक्षी तस्मात्केन तर्हि प्रकाशेन साक्षं जगद्भासेतानः साक्षिरूपं ज्ञानमंगीकर्तव्यमित्यर्थः॥

साक्षिस्वरूपवस्तुनस्तस्यापि वस्तुन एव ज्ञानं कस्मान्न भवतीत्यत आह ॥ स्वत इति ॥ जडं हि जगत्स्वात्मविकस्फुरणरहितमतः साक्षिस्फुरण
भावेनास्य ज्ञानं न स्यादित्यर्थः ॥ ननु साक्षिणोऽभावेऽपि जडं जगदजडेन ज्ञानाधारेणात्मना ज्ञात एवेत्यत आह ॥ जडत्वेनेति ॥ आत्मनो जड
त्वेनेति ॥ आत्मनो जडत्वमात्मनस्त्वाजडत्वमित्येतदुभयमप्यस्य जगतो ज्ञानं न तत्र ये वाधिगन्तव्यौ ॥ यदि हि जगज्ज्ञानविषयः स्यात्तदा तस्यापि स्व
स्य वा जडत्वं ॥ यस्तु तादृशाज्ञानाश्रयः सो जड इति जडत्वाजडत्वे उभे अपि ज्ञानाधानानिरूपणे इत्यवश्यं साक्षिरूपं ज्ञानमङ्गीकर्तव्यमि

स्वतो ज्ञानविहीनं हि जगत्सर्वं चराचरं जडत्वात्स्वाश्रयस्य जगतो ज्ञानवत्तया ॥ १२ ॥ ज्ञानं विज्ञानतो जन्यमिति कैश्चिदुदीर्यते ॥ तन्न सं
गतमेव स्याज्जन्यत्वे जडमेव तत् ॥ १३ ॥ जडत्वानामेव जन्यत्वं ज्ञानं हि सम्मतं ॥

त्यर्थः ॥ १२ ॥ ननु चक्षुर्ज्ञानं ननु चक्षुरादिवत्प्रकाशमाने न निलीनेन विज्ञानेन स्वविषये जन्यत इति तादृशमतमाशङ्कते ॥ ज्ञानमिति ॥ त
न्निरस्यति ॥ तन्नेति ॥ यदि विहितविषयस्फुरणरूपं ज्ञानं जन्यं स्यात्तर्हि जन्यघटादिवज्जन्यत्वहेतुना जडमेव स्यात् ॥ अतो विषय
स्फुरणरूपं ज्ञानं यदि ज्ञानस्यापि जडत्वापत्तिरिति पादद्वयेन ज्ञानस्य स्फूर्तिमिति वक्तव्यमित्यर्थः ॥ १३ ॥

यस्माद्वदर्कं विज्ञानेन ज्ञानं विषये जन्यत इति न तद्युक्तमित्याह ॥ विज्ञानं चेति ॥ ४ ॥ ज्ञानस्य विज्ञानं जनकमिति वदन्वादी प्रष्टव्यः ॥ किं विज्ञा
नेन ज्ञानरूपेण परिणमते ॥ उत ज्ञानस्यारम्भकमिति नाद्य इत्याह ॥ ज्ञानस्येति ॥ विकारिणं एव क्षीरादेर्दध्यादिरूपेण परिणामो दृष्टः ॥ स
च विक्रियत्वात्स्वस्य न सम्भवति ॥ यदि ज्ञानस्यापि विक्रियास्यात्तर्हि क्षीरादिवद्देवत्वे स्यान्नैवेत् ॥ अतो विक्रियावत्त्वे सति नस्य ज्ञानत्वमेव
हीयेतेत्यर्थः ॥ १४ ॥ आरम्भकत्वमपि निराकरोति ॥ नथेति ॥ द्रव्यं हि द्रव्यान्तरारम्भकं तद्गुणपराणां तथा दृष्टत्वात् विज्ञानं तु न द्रव्यं गुण

विज्ञानं चापि ज्ञानस्य नैवोपादेकमिष्यते ॥ ४ ॥ ज्ञानस्य ज्ञानरूपेण परिणामो न सिध्यति ॥ अविक्रियत्वाज्ज्ञानस्य यदि तस्यापि विक्रिया ॥
१५ ॥ तर्हि क्षीरादिवच्चेत्त्वं नैवेत्येवं वेदनं ॥ तथा ज्ञानस्य विज्ञानं नैवारम्भकं ष्यते ॥ १६ ॥ अद्रव्यत्वाद्गुणत्वेन परैरङ्गीकृतत्वतः ॥ अस
द्रूपस्य ज्ञानस्य ज्ञानं नारम्भकं भवेत् ॥ ७ ॥ वन्ध्यासूनोरपि ज्ञानं तद्वद्यारम्भकं भवेत् ॥

त्वेन परैरङ्गीकारात् ॥ अतो ज्ञानद्रव्यस्याद्गुणसत्वाज्ज्ञा
नेनारम्भो न युक्तः ॥ १६ ॥ असद्रूपस्येति ॥ आरम्भवादे ह्यसदेव कार्यमुत्पद्यत इति स्थितिः ॥ तथा चासद्रूपस्य ज्ञानस्य ज्ञानमारम्भकमिति
न युक्तं ॥ यदि ह्यसदपि ज्ञानमारभेत तर्हि ज्ञानं वन्ध्यापुत्रादेरप्यारम्भकं स्यादारम्भकं स्यादसत्त्वाविशेषादित्यर्थः ॥ १७ ॥

सू॰प्रका॰ १३

नन्वप्रागसतः सत्तासंबंधरूपजनिरिति संगीकाराद्धटादेरिवात्यंतासतः कथं तदारंभकप्रसक्तिरित्यत आह ॥ असतः प्राक्स्वकार्याणामिति
॥ प्राक्कालमत्यंतासत्त्वमित्येवमादिना वरूपधर्मविशेषाश्रयत्वे च ॥ भाववत्त्वदाश्रयत्वे च ॥ भावत्वप्रसंगात्सतस्तत्कृतो नेदं न युक्तमित्य
र्थः ॥ परिणामारंभकत्वव्यतिरेकेणोत्पादकत्वानिरूपणादित्याशंक्य ज्ञानस्य जनकमित्युपसंहरति ॥ अत इति ॥ ९ ॥ उक्तमर्थमन्यत्राप्य
तिदिशति ज्ञानस्येति ॥ उक्तन्यायेनेति ॥ यदि हि ज्ञानं जन्यं स्यात्तर्हि जन्यत्वहेतुना घटवत्क्रमेवस्यादित्यनेन न्यायेनेत्यर्थः ॥ ननु रूपादि

प्रागसद्रूपता नस्य ज्ञानं नारंभकं भवेत् ॥ ९ ॥ असतः प्राक्स्वकार्याणां विशेषाणामभावतः ॥ अतो विज्ञानजन्यत्वं नास्ति
ज्ञानस्य सर्वदा ॥ ९ ॥ ज्ञानस्यापि न जन्यत्वमस्ति हेत्वर्थवासिनः ॥ उक्तन्यायेन जन्यत्वप्रतीतिर्भ्रांतिरेव हि ॥ १०
॥ ज्ञानस्यापि तथा भ्रांतिर्जन्यत्वप्रतिभासुराः ॥

विषयैश्चक्षुरादीन्द्रियसंप्रयोगानंतरं रूपादिविषयज्ञानं जायमानं दृश्यते ॥ कथं तर्हि तस्यागतिरित्यत आह ॥ जन्यत्वेति ॥ विषयाका
रपरिणतांतःकरणवृत्तिर्हि तत्र जन्यते अतस्तद्गीयं जन्यत्वं तदवच्छिन्ने चैतन्ये पि स्फटिके लौहित्यादिवदवभासते ॥ अतो भ्रांतिरे रामः
वज्ञाने जन्यत्वप्रतीतिरित्यर्थः ॥ १० ॥ ज्ञानस्यापीति घटादिविषयस्फुरणरूपस्य ज्ञानस्यापि जन्यत्वप्रतीतिर्भ्रांतिरेव ॥ नस्यापक्सधि १३
सहकृतिज्ञानान्वयव्यतिरेकानुविधायित्वं तस्यैव जन्यत्वस्य नव्याध्यवसानात् ॥ ११ ॥

एवं ज्ञानस्याजन्यत्वं प्रसाध्य नित्यत्वं साधयति ॥ भावत्वेति ॥ अजन्यस्यापि प्रागभावस्यानित्यत्वदर्शनात्तद्व्यावृत्त्यर्थं विशिनष्टि
भावत्वे सतीति ॥ विमतं नित्यं भावत्वे सत्यजन्यत्वादात्मवदित्यभिप्रायः ॥ ११ ॥ एवं ज्ञानस्य नित्यत्वं प्रसाध्यानंतरं तदेवात्मनः परमेश्व
रस्य प्रतिज्ञातं साक्षिचिन्मात्ररूपत्वं निगमयति ॥ यत्कृतमिति ॥ यदेतत्सर्वं जगतो भासकं नित्यं ज्ञानं तत्स्वभानं न परैरपेक्षेण भा
ति स एव सर्वस्य जगतः साक्षी द्रष्टा सर्वदेहेष्वात्मतया वर्तमानो वा ॥ व्यवस्थितः परमेश्वरः ॥ यज्ज्ञानमित्युद्देश्यस्य नपुंसकलिंगत्वेपि स
एवेति पुल्लिंगनिर्देशो विधेयापेक्षया ॥ उक्तं हि ॥ निर्दिश्यमानप्रतिनिर्दिश्यमानयोरेकतामापादयंति सर्वनामानि

भावत्वे सत्यजन्यत्वाज्ज्ञानं नित्यं सुरोत्तमाः ॥ ११ ॥ यत्कृतं भासकं भाति
स्वतः सुराः ॥ स एव जगतः साक्षी सर्वात्मा शंकराभिधः ॥ १२ ॥ ते
न कल्पितसंबंधाज्ज्ञानं भाति न स्वतः ॥ ॥

यपायेण तल्लिंगतामुपाददत इति ॥ नादृत्वा नानात्मकोयः स एव साक्षिरूपेणावस्थितः पराशिवो ननु जडरूप इत्यर्थः ॥ १२ ॥ त
स्य च नित्यस्वप्रकाशज्ञानमात्ररूपस्याज्ञानतत्कार्यरूपसर्वजगत्साक्षित्वमुपपादयति ॥ तेन कल्पितसंबंधादिति ॥ असं
गो ह्ययं पुरुष इति श्रुतेरसंगस्य तेः ॥ ज्ञानमात्ररूपस्य परशिवस्य न केनचिदपि पारमार्थिकः संबंधः शक्यते वक्तुं अ
तस्तज्ज्ञानवस्तुबंधोपि साक्षिणि परिकल्पितो विद्यत इति तत्संबंधत्वात्तेन साक्षिभावेन तत्स्वरूपेऽध्यस्तमज्ञानं भा
ति न तु स्वाभाविकेन प्रकारेणेत्यर्थः ॥ १२ ॥

सू॰ब्रह्मगी॰ अज्ञानजन्यमिति॥ तेनाज्ञानेन जन्यं यत्सर्वं परिणामरूपमन्तःकरणं ये च रागादयस्तद्धर्मास्तद्धर्मास्तत्सर्वं सोपादानं तत्ताज्ञानसंबंध
४५ चैतन्याद्वेदनांति न तु स्वभावतः॥१९॥ प्राणश्चापीति॥ प्राणेन्द्रियदेहादिकमप्युपादानभूताज्ञानसंबंधद्वाराचित्संवलितायाश्चित्तवृ
त्तेस्तथाभूतया परंपरया दृग्रूपसाक्षिचैतन्यसंबंधवशाद्वेदनांति न तु स्वतः इत्यर्थः॥ बाह्यविषयाश्चेति॥ बाह्यघटपटादिवि
षयजातमपि स्वसंप्रयुक्तचक्षुरादीन्द्रियसंबंधाच्चित्संवलिततद्विषयाकारान्तःकरणवृत्तिव्याप्ततया साक्षिचैतन्यसंबंधादेव
नांतीति॥२४॥२५॥ अनुमानादिवृत्तिस्थमिति॥ आदिशब्देनोपमानादिसंग्रहः॥ धूमवत्त्वादिसाध्यव्याप्तिहेतुजनितायान्तःक

अज्ञानजन्यं विविधं च रागद्वेषादयस्तथा॥१९॥ अज्ञानस्य च चैतन्याद्वेदनांति च स्वतः॥ प्राणश्चापि तथा बाह्यकरणानि
वपुस्तथा॥२०॥ चित्तवृत्त्यग्निसंबंधद्वारेणैव दृशान्वयात्॥ विभांति न स्वतो बाह्यविषयाश्च तथैव च॥२१॥ अनुमा
नादिवृत्तिस्थचैतन्यं सुरसत्तमाः॥ अर्थानामपि केषांचिद्भासकं तेन शंकरः॥२२॥ सर्वावभासकः साक्षी तेन ज्ञातमिदं जगत्॥

रणवृत्तिस्तत्प्रागुक्तरीत्या यद्वह्निस्थितं चैतन्यं तदपि स्वाश्रयभूतान्तःकरणवृत्तिजनकधूमवत्त्वादिहेतुव्यापकानामग्निम
त्त्वादीनां केषांचिदर्थानां परंपरया संबंधाद्भासकं भवति॥ अपरोक्षज्ञानविषयेषु हि अधिष्ठानस्फुरणसत्तावच्छिन्नवृत्तिव्या रामः
प्यत्ववत्फलव्याप्यत्वमप्यपेक्षितं॥ अनुमानादिपरोक्षज्ञानविषयेषु तु तादृशफलव्याप्यत्वमस्तीति वाच्यमिति वर १४
तोऽभिप्रायः ज्ञानमात्ररूपस्य परशिवस्योपपादितं सर्वसाक्षित्वं निगमयति॥ तेनेति॥ ॥

एवं जीवभावेन प्रविष्टस्यात्मस्थितस्य साक्षिचिन्मात्ररूपत्वं प्रसाधितं॥ तथा च कतरः स आत्मेति श्रुत्या प्रागेवावतारितस्य प्रश्नस्य सर्वसाक्षी चि
द्रूप एव स आत्मा न तु प्राणादिरिति वचनेनोत्तरं तमेवार्थं श्रुतिरूपतररूपेण प्रतिपादयति॥ येन वा पश्यति येन वा शृणोति येन वा गंधानाजिघ्र
ति॥ अतो रूपाणीत्यादिना॥ यत उक्तश्रुत्याद्युचास्वादु च विजानातीत्यस्याः श्रुतेरर्थसंग्रहं प्रतिपादयति॥ अतो रूपाणीत्यादिना॥ यत उक्तश्रु
त्यैवात्मनः सर्वमिदं विजानातीति श्रुतौ तेनेत्यात्मा साक्षिरूपेण सर्ववस्त्ववभासकः॥ अतः कारणात्तेनैव सर्वावभासकपरशिवस्

अतो रूपाणि तेनैव पश्यतीशो न मानवः॥२३॥ शृणोति तेन शब्दांश्च गंधानाजिघ्रति प्रियान्॥ अनेनैव सदा वाचं व्याकरोति तु मा
नवः॥२४॥ अनेन स्वादु चास्वादु विजानाति च मानवः॥

रूपेणानेन सर्वसाक्षितया हृदयमध्येऽवस्थितेन चक्षुःसंप्रयुक्तरूपजनितम
नोवृत्त्यभिव्यक्तेन चिन्मात्रेणैव रूपाणि पश्यति॥ तथा श्रोत्रसंयुक्तशब्दजनितमनोवृत्त्यभिव्यक्तेनानेनैव चिन्मात्रेणैव शब्दाञ्जा
नाति॥ गंधानाजिघ्रतीत्यत्राप्येवं योज्यं॥ सदा वाचमिति॥ व्याकर्तव्यशब्दविषयमनोवृत्त्यभिव्यक्तेनानेनैव चिन्मात्रेण वागिन्द्रियद्वा
रा वाच्यं वाक्यं व्यवहरति॥ एतच्चान्यस्यापि पादादेरपि कर्मेन्द्रियस्योपलक्षकं॥२५॥ अनेन स्वादु चेति॥ रसनेन्द्रियसंप्रयुक्तमधुरादि
रसजनितमनोवृत्त्यभिव्यक्तेनानेनैव चिन्मात्रेण स्वाद्वस्वादु विभागं जानाति॥ श्रुतिगतो वा शब्दश्चार्थः॥

ऐ॰आनगी॰
२५

एतद्धृदयं मनश्चेति ॥ चक्षुःश्रोत्रादिविभिन्नकरणजनितेषु रूपादिज्ञानेषु योयमनुगतश्चिन्मात्रांशः ॥ स एव साक्षिरूप आत्मेति ॥ न चैष हि द्रष्टा
श्रोतेत्यादिश्रुतेरसावेवोपलब्धा योनुगतश्चिन्मात्रांशः प्रदर्शितस्तस्य च परत्वप्रतीत्यादिकर्तृत्वाविवक्षितेर्दर्शिहि न वादनेनेतिकथं तृतीयां
त निर्देशः ॥ नेष दोषः ॥ अंतःकरणतद्वृत्तिपरिकल्पितभेदोपजीवनेन करणत्वोपचारात् ॥ अत एव कवचबहुधोपन्यासनं ॥ येनरू
पं रसं गंधं शब्दान् स्पर्शांश्च मैथुनान् ॥ एतेनैव विजानाति किमत्र परिशिष्यते ॥ एतद्वै तदिति ॥ आचार्यस्त्विति ॥ प्रज्ञया वाचं समारुह्य वाचा
सर्वाणि नामान्याप्नोति प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि रूपाण्याप्नोतीति ॥ कौषीतकिश्रुतेरेकस्यैव प्रज्ञाशब्दाभिधेयां
तःकरणस्य वाक्चक्षुरादिनानाविधकरणभावेनावस्थानात्तस्य चांतःकरणस्य प्रपद्यान्प्रविष्टस्य प्राणस्य च यो वै प्राणः सा प्रज्ञा
या वा प्रज्ञा स प्राण इत्येकत्वश्रुतेरुपलब्धिकरणत्वेनागुणभूतवान्प्राणेनामेति ॥ दर्शयितुं येन वा पश्यतीत्यादौ तृतीयांतप
दे चक्षुरादिभेदभिन्नांतःकरणपरतया व्याख्याय यदेतद्धृदयं मनश्चेति हृदयमनःशब्दाभ्यां निश्चयरूपं संकल्पविक
ल्पविकल्पात्मकमंतःकरणं सकलेंद्रियसाधारणं प्रतिपाद्य तदिति चक्षुरादिजनितमनोवृत्तिलक्षणोपाधिसाधान्यधिविव
क्षायां व्याकरोति ॥ यथा रूपः ॥ एतेनांतःकरणेनैकेन चक्षुर्भूतेन रूपं पश्यति ॥ श्रोत्ररूपेण शब्दं शृणोति ॥ श्रोत्ररूपेण शब्दं शृणो
ति ॥ घ्राणरूपेणरूपेण गंधं जिघ्रति वाग्भूतेन च वदति ॥ जिह्वाभूतेन रसयति ॥ स्वेनैव कल्पनारूपेण मनसा संकल्पयति हृदयरू
पेणाध्यवस्यति ॥ तस्मात्सर्ववि षयव्यापकमेकमिदं करणमिति ॥ [illegible] ॥ राम:
२५

चेत्तु हृदयमनःशब्दावपि संज्ञानादिशब्दवन्नामधेयप्रतिपादनेनोपधेयचित्प्राधान्यविवक्षया तानि च नामान्येवमाम्नातानि ॥ यदेतद्धृदयं मनश्चै
तत्संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञान
स्य नामधेयानि भवंतीति ॥ एतानि च नामानि चिन्मात्रस्वरूपस्य परस्य परशिवस्य व्यवहर्तृपुरुषतेहापेक्षयैवैतानि भवंतीति तत्र
व्यवहर्तृपुरुषसंबोधितयैवैतानि नामानि संगच्छंति ॥ शंकराख्यं तु विज्ञानमित्यादिना ॥ तु शब्दोवधारणे यदेतन्नित्यस्वप्रकाश
साक्षिचिदात्मकं सर्वदा सर्ववस्तुभासकं भानं शंकराख्यं ॥ प्रागुपन्यस्तं न त्वेव हृदयमनःसंज्ञानादिशब्दैस्तत्तदुपाधिसंबंधबला

शंकराख्यं तु विज्ञानं बहुधा शब्द्यते बुधैः ॥ केचिद्धृदयमित्याहुः श्रीतलं हे सुरोत्तमाः ॥ [illegible] ॥

तत्रत्याभ्या बहुधा विद्भिर्गीयते तेन स्वस्माच्चिदात्मनो हृदयमनःप्रभृति किंनतांतरमित्यर्थः ॥ हृदयमित्याहुरिति हृ
दयमिति कस्मादुक्तमध्यवसायांतःकरणं हृदयं ॥ तत्राध्यवसायात्मकं विवक्षितं ॥ हृदयस्वरूपेणाध्यवसतीति तथा
त्वप्रतिपादकाचार्यभाष्यस्य च प्रागुदाहृतत्वादेवं निश्चयरूपांतःकरणोपधानबलेन तदुपहितः प्रज्ञप्तिमात्रं ब्रह्म तत्स्वरूपम
पि हृदयशब्देन व्यवहरेत्यर्थः ॥ [illegible] ॥

स्व॰ब्र॰लगी॰ एवमनःसंज्ञादयोपि सत्वपरिणामरूपांतःकरणस्य वृत्तिभेदाश्चिन्मात्रस्य साक्षिणउपाधिभूताः॥ अतस्तदुपाधानवज्ञानस्य तानि नाम
२६ धेयानीति योजनीयं॥ उक्तं तान्याचष्टे॥ इत्येवमाद्याश्चांतःकरणस्य वृत्तयः उपलब्धुः शुद्धप्रज्ञानरूपस्य ब्रह्मण उपाधिभूतास्तदुपाधि
जनितगुणनामधेयानि संज्ञानादीनि॥ तत्र बाह्यांतःकरणस्य संकल्परूपा वृत्तिर्मनः॥ संज्ञानं॥ संज्ञप्तिर्यया योगादसौ चेतन इति
व्यपदिश्यते॥ आज्ञानं॥ आज्ञप्तिः॥ आज्ञाशक्तिरूपा वृत्तिः॥ विज्ञानं लौकिकसूक्ष्मवस्तुविषया वृत्तिः॥ प्रज्ञानं प्रज्ञप्तिः प्रज्ञा॥ य

मन इत्यपरे — तः संज्ञानमिति केचन॥ आज्ञानमिति विद्वांसः केचिद्वैश्वर्यवासिनः॥२०॥ विज्ञानमिति चाप्यन्ये प्रज्ञानमिति केचन॥
मेधेति ब्राह्मणाः केचिद्दृष्टिरित्यपरे बुधाः॥२१॥ धृतिरित्यपरे प्राज्ञा मतिरित्यपि केचन॥ मनीषेति महाप्राज्ञा जूतिरित्यपरे बुधाः॥२२

योक्तं॥ स्मृतिस्तत्तीतविषया मतिरागामिगोचरा॥ बुद्धिस्तात्कालिकी प्रोक्ता प्रज्ञा त्रैकालिकी मतेति॥ मेधा ग्रंथधारणसामर्थ्यं॥ दृ
ष्टिः॥ बहुद्वारेंद्रियद्वारा घटपटादिविषयाकारपरिणता वृत्तिः॥ धृतिः॥ देहेंद्रियादिधारणसामर्थ्यं मतिर्मननं॥ आगामिविष रा॰म॰
या वृत्तिः॥ मनीषा मनस ईषा तत्त्वतांत्र्यमितियावत्॥ जूतिः॥ रोगादिनिमित्तसोदुःखित्वभावनाः॥२२॥ २६

स्मृतिरनुभूतविषया॥ संस्कारजा वृत्तिः॥ इदं शुक्लमिदं कृष्णमिति भेदेन सम्यक्कल्पनारूपः॥ क्रतुरिदमित्थमेवेत्यध्यवसायः॥ का
मोऽसान्निहितविषयाकांक्षा॥२३॥ वशः संन्निहितस्त्र्यन्नपानादिविषयाभिलाषः॥ असुरिति श्रुत्युक्तं नाम प्राणवा
कतया प्रसिद्धत्वात्तदुपाधिकस्य प्रज्ञानब्रह्मणो प्रसिद्धमिति न दृष्टयुक्तं॥ एवमंतःकरणतदवस्थापहितं रूपतश्शब्दादिसकलवस्तुब
भासकं नित्यस्वप्रकाशसाक्षिचैतन्यमेवात्मेति प्रतिपादितं॥२४॥ तस्यैव ब्रह्मत्वादिस्तंबांते स्थावरजंगमात्मके जगति जीवभावे॥

स्मृतिरित्यास्तिकाः केचित्संकल्प इति केचन॥ क्रतुरित्यपरे प्राज्ञाः काम इत्यपरे जनाः॥२३॥ वश इत्यास्तिकाः केचित्सर्वाण्येता
नि मेनते॥ प्रज्ञानस्य शिवस्यास्य नामधेयान्यसंज्ञया॥२४॥

नोपादानभावेन च सर्वत्रावस्थानाभिप्रायेणापरिच्छेदत्वं श्रु
तिरुद्धं श्रुतिः सर्वात्मप्रतिपादयति॥ एष ब्रह्मैष इंद्र एष प्रजापतिरेते सर्वे देवा इमानि पंचमहाभूतानि पृथिवी वायुराकाश आपोज्यो
तींष्येतानीमानि च क्षुद्रमिश्राणीव बीजानीतराणि चेतराणि चांडजानि च जरायुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरु
षा हस्तिनो यत्किंचेदं प्राणि जंगमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितमिति॥

इमां कृतिं संगच्छतीति॥ एष ब्रह्मेत्यादिना॥ यः प्रागुक्तः स्वप्रकाशः साक्षीचिद्रूप आत्मा स एष एव ब्रह्म अपरं चीकृतपंचमहाभूततत्कार्यलिं
गशरीरसमष्ट्युपहितः सन् हिरण्यगर्भाभिधानो भवति ब्रह्मा नयतीत्यर्थः॥ यद्वा॥ ब्रह्मेति तिर्यक् सकलिंग तस्यापदविनागः॥ यस्तरं ब्रह्मस
प्रज्ञानादिलक्षणं जलतरंगाबुद्बुदादिष्वनुप्रविष्टसूर्यबिंबवत् सर्वप्राणेषु अंतःकरणोपाधिष्वनुप्रविष्टः॥ एष एव तन्द्रब्रह्मनामादित्यर्थः॥ ए
वमुत्तरत्रापि योजना॥ परमैश्वर्ययोगादिंद्रः यद्वा इदं कारास्परयं घटादि विदिदमित्यापरोक्षेण यः साक्षीसाक्षात्तं ब्रह्मसाक्षा
त्करोति स इंद्रः॥ श्रूयते हि॥ इदमदर्शमिति तस्मादिदंद्रो नामेदंद्रो ह वै नाम तमिदंद्रं संतमिंद्र इत्याचक्षते परोक्षेणेति॥ यद्वा

एष ब्रह्मैष इंद्र एष एव प्रजापतिः॥ एष एव हि देवाश्च भूतानि भुवनानि च॥२५॥

देवानामधिपतिरिंद्रस्तस्य इंद्रदेयेपि साक्षिरूपेणावस्थानादेष एव स इत्यर्थः॥ प्रजापतिः पंचीकृतस्थूलभूतारब्धब्रह्मांडांतर्वर्ति
प्रथमशरीरी विराट् देवा अग्न्यादयः॥ यो यमंतर्हृदि स्थितः स चिदात्मा एष एव ब्रह्मेंद्रादिदेहेष्वपि साक्षिरूपेणावस्थितः सा आत्मका
शसाम्येनैकापतिसंधानात्म देहप्रतीतिस्तूपाधिकृतेत्यर्थः॥ भूतानि भुवनानि चेति॥ सर्वशरीरोपादानभूतानि यानि आकाशादि
आदीनि पंचमहाभूतानि तत्कार्यरूपाणि यानि च भुवनानि लोकास्तन्मध्ये वर्तमानाये॥२५॥

अण्डजाः पक्ष्यादयः॥ ये च जारुजा जरायुजाः मनुष्यादयः॥ ये च स्वेदजाः स्वेदबिंदुपरिणामरूपायूकाद्याः॥ ये च उद्भिजाः भूमिमुद्भिद्य
जायमानास्तरुगुल्माद्याः॥ एवं सामान्यतश्चातुर्विध्येन सर्वजगत्त्रिर्दिष्टं विशेषतोपि निर्दिशति॥ हस्ति इत्यादि इति हस्तिप्रमुखा
ः प्राणिन इत्यर्थः॥ स्थावरमचलं पर्वतादि॥ जंगमं पादगमनशीलं॥ तथा यत्पतत्रि॥ पतत्री या माकाशे पतनशीलं यत्पतत्रि चेति
॥ कफकं तदन्यः स्थैर्विवक्षितं॥ एवं यदेतद्भूतभौतिकरूपं स्थावरजंगमात्मकं सर्वं जगत्तत्सर्वं प्रज्ञानब्रह्मस्वरूपे सर्वसाक्षिणि
अन्यत्रिस्थितिलयाधिष्ठानेऽज्ञानपरिकल्पितत्वात्तद्रूपेणैवैनैव प्रतीतिपर्यनीयमानत्वाच्च वस्तुतस्तत्स्वरूपात्ताननि

अंडजा जारुजाश्चैव स्वेदजा उद्भिजाश्च पि॥ अश्वा गावश्च मर्त्याश्च हस्ति यश्वास्ति येव च॥२६॥ स्थावरं जंगमं चैव त
थान्यदपि किंचन॥ सर्वमेतदयं जंतुः प्रज्ञानघनलक्षणः॥२७॥

रिक्तानि रंतरप्रज्ञानलक्षणः परमेश्वर एव तत्तु ततो निरिच्यत इत्यर्थः॥ सर्वं तत्प्रज्ञानेत्रमिति॥ प्रतिज्ञातार्थसंप्रतिपादना
य प्रज्ञानेत्रो लोक इति वाक्यं यतः सर्वोपि लोकः प्रज्ञानेत्रश्च हृदयान प्रवृत्ति करशादुदीरितप्रज्ञप्तिरूपसाक्षिणे नृतैर्भ्रंत्रक एव
परिदृश्यते॥ स्वतएव तत्सर्वं जगत्प्रज्ञानेत्रमित्यर्थः प्रज्ञाने प्रतिष्ठितमिति यत्सर्वसाक्षिभूतं प्रज्ञानमाधेयप्राधान्येन गुण
भूततयाधिकरणत्वेन निर्दिष्टं तस्याधेयसकलजगदुपालक्षितस्य प्रज्ञानमात्रस्य मुख्यतया ज्ञेयत्वं द्योतयितुं पुनराधारप्र
धान्येन निर्दिश्यत इत्युद्यतस्य ब्रह्मात्मत्वं प्रतिपादयति श्रुतिः॥२७॥

प्रज्ञा प्रज्ञानं ब्रह्मेति तदर्थं संगृह्णाति॥ प्रतिष्ठेति॥ पारमेश्वरी॥ परमेश्वरस्यैव जीवभावेनावस्थानात्तत्संबंधिनी या सर्वसाक्षिणी विशे
षाभ्यां गुहाशरीराभ्यां सर्ववस्तूनां प्रतिष्ठा आश्रयः॥ या ज्ञानपरिकल्पितनसकलजगदुत्पत्तिस्थितिलयाधिकरणत्वादृतएव तैत्ति
रीयके समाम्नानं॥ यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीति॥ एवं सकलकल्पनास्पदं सर्वदा
सर्ववस्तुवनात्मकं यत्साक्षिरूपं प्रज्ञानं साधकस्य हृदयमध्ये उपलभ्यते॥ एतदेव शिवरुद्रादिसंज्ञितं तत्कारणं ब्रह्म॥ य
दात्मा वा इदमेक एवाग्र आसीदित्यात्मशब्देन निर्दिष्टं॥ अयमर्थः॥ सोयं देवदत्त इत्यत्र परस्परविरुद्धतद्देशकालत्व

प्रतिष्ठा सर्ववस्तूनां प्रज्ञैषा पारमेश्वरी॥ प्रज्ञानमेव तद्ब्रह्म शिवरुद्रादिसंज्ञितं॥२८॥

वैशिष्ट्यं परित्यज्यांशाद्वस्याविरुद्धस्य देवदत्तस्वरूपमात्रस्य यथैक्यप्रतिपत्तिस्तथैवात्रापि प्रत्यक्त्वप्रकाशसाक्षिविशिष्टाविना
प्रज्ञानत्वादेन जगत्कारणपरशिवत्वादिना ब्रह्मत्वादेन च समानाधिकरणान्यथानुपपत्त्यासंसाक्षित्वजगत्कर्तृत्वादिविरुद्ध
धर्मवैशिष्ट्यत्यागेनोभयत्रानुगतं यच्चिदेकरसं प्रत्यस्तमितनसर्वोपाधिविशेषं प्रत्यग्ब्रह्मणः पारमार्थिकं स्वरूपं तत्से
संप्रतिपाद्यते॥ अज्ञानपरिकल्पितनेदमत्र मन्त्रिरासाय्येति॥२८॥

क्तौ सएतेन प्रज्ञेनात्मनास्माल्लोकादुत्क्रम्येत्यादिना ब्रह्मात्मैक्यविज्ञानस्य परमतत्वसाधनं प्रतिपादितं तत्संगृह्णाति॥ एवंरूपेति
॥वस्तुतः परशिवरूपस्य प्रत्यगात्मनः संसारित्वस्य स्वस्वरूपयाथात्म्यापरिज्ञानमूलत्वादज्ञानस्य ज्ञानैकनिवर्त्यत्वाज्ज्ञानमे
व ब्रह्मात्मैक्यलक्षणं या मुक्तेः साधनं कर्मादिकं तस्याज्ञानकार्यत्वादविरुद्धत्वेन तन्निवर्तकत्वाभावात्॥ अतएव श्रुतिः॥ क
र्मतत्तत्वान्निसाधनत्वं निषेधति न कर्मणा न प्रजया धनेनेति॥२९॥ ब्रह्मवेदनमात्रेणेति॥ मात्रग्रहणेनाज्ञानकर्म

एवंरूपपरिज्ञानादेव मर्त्योऽमृतो भवेत्॥ न कर्मणा न प्रजया न चान्येनापि केनचित्॥२९॥ ब्रह्मवेदनमात्रेण
ब्रह्माप्नोत्येव मानवः॥ अत्रनास्त्येव संदेह इत्थं शपथयाम्यहं॥३०॥

समुच्चयस्यामृतत्वसाधनत्वनिरासः॥ प्रत्यगात्मनो ब्रह्मात्मैकत्वज्ञानमात्रेणैवाविद्यानिवृत्तौ निरतिशयानंदरूपतया मुग
पत्सर्वकामतास्पदं ब्रह्मरूपं प्राप्नोत्येव॥ एतेन सर्वान्कामानाप्त्वामृतः समभवदिति सकृतेरर्थो वर्णितो भवति॥ अत्रत्याप
ख्यानं॥ ब्रह्मवेद ब्रह्मैव भवति॥ ब्रह्मविदाप्नोति परमिति च॥ इति एतेरेयकश्रुतिव्याख्यानं समाप्तं॥३०॥

स्टं.ब्रह्मगी.
१८

एवमेतेनैतरेयोपनिषदर्थपर्यालोचनया कर्मादिनिरपेक्षेण ब्रह्मात्मैकत्वसाक्षात्कारस्य परममुक्तिसाधनत्वं प्रतिपाद्य तैत्तिरीयोपनिषदर्थपर्यालोचनयापि तथात्वं प्रतिपादयितुं तदर्थं संगृह्य वक्तुमारभते॥ तद्विद्याविषयमित्यादिना॥ तैत्तिरीयके हि॥ ब्रह्मविदाप्नोति परमिति ब्रह्म प्रतिपिपादयिषया प्रक्रान्तोपनिषदर्थः सूत्रत्वेनानेन वाक्येनानेककार्योपाधिसंबंधवशाज्जीवतामापन्नस्य साधनचतुष्टयसंपन्नस्य मुमुक्षोः प्रत्यक्चेतनस्य ब्रह्मत्ववेदनमात्रेणाविद्यानिवृत्तिद्वारा निरतिशयानंदाद्वितीयब्रह्मात्मतावाप्तिस्तज्जिज्ञासाजननार्थं सूचितः॥ सूचितार्थः संग्रहविस्तराभ्यां व्याख्यातः॥ तत्र श्लोकेन सुखावबोधाय संग्रहव्याख्यानमृगुदाहरणेन दर्शितं॥ सा चैवमाम्नाता॥ सत्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्॥ सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति॥

रामः
१८

तत्र जिज्ञासूनां सुविज्ञासाजननेनैतत्प्रयोजनाभावात्तत्कृत्स्नं सूत्रत्वेनावासमुक्तानुक्तवस्तुमात्रं संगत्यभिधानपुरःसरं तत्साकल्ये चो र्थं संगृह्णाति॥ तदिति॥ सर्वस्मादपि वृद्धं यत्सत्यज्ञानं तद्ब्रह्म तत्समतत्त्वसाधनतत्परविद्याविषयतया परब्रह्मेति निर्दिष्टं तद्ब्रह्म सत्यादि लक्षणं॥ बृहति धात्वर्थस्यानुगमात्॥ तथाहि॥ बृंहति बृहि वृद्धाविति धातुर्दृश्यते॥ सा चात्र प्रतियोगिविशेषाद्यनुपादानान्निरतिशयैव विवक्षितेत्यतो निरतिशयवस्त्वंतरेण परिच्छेदाद्देर्निरतिशयत्वेनाज्ञेन॥ तथा च वस्त्वंतरकृतपरिच्छेदरहितमेव ब्रह्मवाच्येन वितु

तद्विद्याविषयं ब्रह्म सत्यज्ञानसुखाद्वयं॥

महीति॥ द्वैतप्रपंचस्यानृतस्वरूपेऽप्यस्तत्वेऽपि प्रतीतेर्वस्तुनस्तत्स्वरूपानतिरिक्तत्वात्तथा च वस्तुकृतपरिच्छेदनिराकरणेनैव देशकालकृतपरिच्छेदोऽपि निरस्तो वेदितव्यः॥ देशकालयोरपि परिकल्पितत्वेन वस्तुनस्तत्स्वरूपानतिरेकात्॥ एवं चेनारोपस्याधिष्ठानत्वेन तदवधित्वेन च त्रिविधपरिच्छेदरहितं यदद्वितीयं तत्सत्यमेवेष्टं॥

इतरथा निरधिष्ठानत्वमनिरवधिकबाधयोः प्रसंगात्॥ असतश्चासर्वप्रकारेणापि निरुपाधिकत्वे नाधिष्ठानावधित्वानुपपत्तेः॥ न च सत्यं
सत्यं सर्वदेशाप्रतिनानं चेन्न रविपर्यसमं स्यात् इतस्तत्प्रतिनानमेवेत्याहि पन्नं॥ तथा च स्वप्रकाशमेव तत्स्वरप्रकाश्यत्वे परेण वस्तुं
न रेण परिच्छेदान्निरतिशयबृहत्त्वाद्वाचकब्रह्मपदस्यापकोयं स्यात्॥ एवं ब्रह्मपदेन निरतिशयबृहत्त्वप्रतिपादनद्वारा यदानंत्यादिकं
सूचितं तत्तन्निर्विशिष्य च एवमसत्यं ज्ञानमनंतं ब्रह्मेति॥ एवंरूपस्य च ब्रह्मणो नत्यशेषतयावेद्यत्वप्रतिपादनाद्दानंदरूपस्य तथा
त्वानुपपत्तेर्निरतिशयसुखात्मत्वमपि तस्याभिप्रेतं॥ श्रवणे एवाम्नायते॥ आनंदो ब्रह्मेति व्यजानात्॥ विज्ञानमानंदं ब्रह्मेति च
॥ न दृष्टसुखं सत्यं ज्ञानं सुखाद्यमिति न चेन्नब्रह्मणः स्वरूपलक्षणं सत्यादिशब्दाः सत्वादिपरापरजातिप्रवृत्तिनिमित्त
काः॥ कथं निर्भेदमेकरसमुक्तविधब्रह्मस्वरूपं प्रतिपादयितुं शक्नुवंति॥ नैष दोषः॥ सच्चिदानंदैकरसे ब्रह्मणि परिकल्पि
ता लौकिकसत्यज्ञानादिषु सत्यत्वादिपरापरजातिप्रवृत्तिनिमित्तकैरपि सत्यादिशब्दैः सत्यज्ञानानंदैकरसव्यक्तेर्लक्षयि
तुं शक्यत्वात्॥ अनेन पदद्वंद्वेन तद्व्यतिरेकावच्छिन्नतया तत्स्वरूपं जगत्यति न कैश्चैकेनैव यद्येनजस्य स्वरूपस्य विज्ञानत्वा
त्यहंतरवैयर्थ्यमिति मंतव्यं॥ अनृतजडदुःखात्मकत्वव्यावृत्तिपरत्वेन सप्रयोजनत्वात्॥ यथाहुर्वार्त्तिककाराः॥ तत्रानंतानंतं च — राम॰ २०
दुःखव्यावृत्त्यैव विशेषणं॥ स्वार्थार्पणप्रणाड्या तु परिशिष्टोपविशेषणमिति॥

एवं वेद्यस्वरूपं प्रतिपाद्य वेदनप्रकारमाह॥ संसारकं इति॥ संसरत्यनेनेति संसारः संसार एव संसारकं अव्याकृतं कारणं तत्रैव तस्मिन्का
र्यभूताः सर्वे पदार्थाः अतीतभविष्यद्वर्तमानलक्षणे सुषुप्त्यादिकाले यतो नानागतवर्तमानाध्वनि निगूढत्वाद्गुहायां ते संप्रियं ते तस्मिन्नि
ति सुस्मा वा अव्याकृतं श्रुतिगतगुहानाम्नैनवाच्यं॥ तदेव विचित्रं दुर्घटकारणत्वस्वप्रकाशानिःसंगं च ब्रह्मस्वरूपज्ञाननिवर्त्यत्वाच्च मायाज्ञा
नादिसंज्ञं भवति॥ आदिशब्देनाविद्याऽक्षराक्षरेत्यादिनामसंग्रहः॥ एतदेवाव्याकृतं परमव्योमसंज्ञितं एतस्मिन्नु खल्वक्षरे गार्ग्याकाश
ओतश्च प्रोतश्च यो वै स बहिर्धा पुरुषादाकाशो यो वै सोऽन्तःपुरुष आकाश इति श्रुत्यंतरप्रसिद्धा अव्याकृतस्य व्योमशब्दाभिधेयत्वाद्दहराका
शापेक्षया परमत्वं चेत्यवधेयं॥ एवं च गुहायां परमे व्योमन्निति श्रुतिगते समानाधिकरणे सप्तम्यंतपदे यथाहुर्वार्त्तिककाराः॥ गुहायां पर

संसारके गुहावाक्ये मायाज्ञानादिसंज्ञिते॥२२॥ निहितं ब्रह्म यो वेद परमव्योमसंज्ञिते॥

मे व्योम इति सामानाधिकरण्यादव्याकृताकाशमेव गुहा तत्रापि निगूढाः सर्वपदार्थास्त्रिषु कालेषु कारणत्वादिति॥ तथा च
कार्यकारणात्मनां देहेंद्रियादिरूपेण च परिणते पंचकोशात्मके तस्मिन्नव्याकृते निहितं स्थितमित्यर्थो भवति॥ उपलक्षणाभि
प्रायमेतत्॥ सर्वांतरस्य निर्विशेषस्य ब्रह्मणो विशिष्टदेशसंबंधानुपपत्तेः॥ एवमन्नमयप्राणमयादिरूपस्मात्पंचकोश
रूपेण वेष्टिते सत्त्वरजस्तमोगुणात्मके अव्याकृते तन्निहितमुपलक्षमाणं सत्यज्ञानानंदैकरसमद्वितीयं ब्रह्म यः प्रत्यगात्म
स्वरूपत्वेन वेद॥ श्रवणमननादिसाधनजनितपानादद्गब्रह्माकारमनोवृत्त्या साक्षात्करोति स इत्थं परिष्ठासे बधः॥

सू॰ ब्रह्मगी॰ णं च कृतस्य ब्रह्मवेदनस्य फलमाह॥ मोक्ष इति॥ काम्यन्त इति कामाः सुखोपभोगाः सर्वे दिना सर्वकामानक्रमेण युगपदेकक्षणेनोपारूढानश्नुते
२१ प्राप्नोति॥१२॥ केन रूपेणेत्यपेक्ष्यते॥ विदितब्रह्मरूपेण स्वात्मतया साक्षात्कृतेन निरावरणेन यासर्वत्र सवितृप्रकाशवत्सर्वविस्तव नामकेन स
र्वप्रकाशात्मा तेन चित्स्वरूपेण ब्रह्मणा रूपेणेति शेषः॥ ब्रह्मविदेवं भूतः सर्वज्ञब्रह्मात्मकः सन्नवतत्त्वज्ञानेन तेन दग्धमहेतोरविद्यायाः समूलमुन्मूलितत्वेन
वासात्मनो निरतिशयानन्दाविर्भावेन तद्वेशानन्तास्सर्वा सुखविशेषा अपि स्वरूपप्रकाशात्र नथ मीदृशि निरयेत्रेण युगपद्व्याप्नोतीत्यर्थ
॥ अक्रमेणेति विवरणात्क्षणिकगत सहशब्दस्य न साहित्यमर्थः॥ अपि तु योगपद्यमेव स्वतिप्रायो वर्णितो भवति॥ तथा विविदिषंत ब्रह्मसह
पेणेति विवरणाद्ब्रह्मणा विपश्चितेति श्रुतिस्थ तृतीया पितु त्रेणा सहागत इतिवत्सहयोगे अपि तु इत्थंभूते तृतीया ज्ञानमयज्ञोदिनादि

मोक्षते सकलान्कामान्क्रमेणैव सुरर्षभाः॥१२॥ विदितब्रह्मरूपेण जीवन्मुक्तो न संशयः॥१३॥

दिहंता वेदनीयात्मा तात्त्वति॥ अत एव आत्मा वा इदमेक एवाग्र आसीत्॥ एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्माक
र्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेत्यादिश्रुतिभिरात्मनः पारमार्थिकैकत्वप्रतिपादनात्तानाविधशरीरेषु न
मथितः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेत्यादिश्रुतिभिरात्मनः पारमार्थिकैकत्वप्रतिपादनात्तानाविधशरीरेषु न
नानात्वप्रतीतेश्च घटाकाशो महाकाश इतिवदौपाधिकभेदकल्पनयाप्युपपत्तेस्तत्सृष्ट्वा तदेवानुप्राविशदिति न जीवेनात्मनानुप्र
विश्य नामरूपे व्याकरवाणीत्यादिश्रुत्या एकस्यैव प्रपञ्चस्रष्टुरात्मनो जाग्रतावेव नानाविधदेहप्रवेशनाच्चेतनाभेदेन जीवपरयोर्भे
दाविनयेन॥ अत एव नेदोपजीविनी सहयोगलक्षणा तृतीयानपुंसके त्वमिति प्रसंगादप्यकारे स्वेच्छाव्याख्यानं॥ तथा ऊर्ध्वः किमस्माद्विस्तु
नस्वयं दोन्यथा येन तेनाह॥ सयुगपदेकक्षणेनोपारूढानिति तेन सर्वज्ञरूपेण ब्रह्मणा स्थितः इति॥ जीवन्मुक्त इति॥१३॥ उक्तब्रह्मात्म
विज्ञानरथ्यकर्मशेषेण प्राणेन्द्रियदेहादिकं धारयन्मरुतः वक्ति तोपिमुक्त एव न पुनस्तस्य बन्धाशंकास्त्यर्थः॥ ॥

एवमागमानुसारेण तदर्थं प्रतिपाद्यं फलितमर्थमाह॥ प्रत्यगात्मनो ब्रह्मरूपत्वावभासकमज्ञानं प्रत्यगज्ञानं विविधं ज्ञायते नेनेति वि
ज्ञानमंतःकरणं तदुपनयस्वरूपेणावस्थिता सत्त्वरजस्तमोगुणात्मिका याशक्तिः॥ कारणशरीरमित्याख्यायते तत्स्याः साक्षिचैतन्यं पञ्चकोशं

प्रत्यगज्ञानविज्ञानमायाशक्तेस्तु साक्षिणं॥१४॥
एकब्रह्मत्वसंपद्यप्रत्यक्षाद्ब्रह्मविद्विजमाः॥

नवर्जिमात्मनो यद्विद्यात्मस्वरूपव्याप्त्या॥१४॥ यत्र सत्यं ज्ञानमनन्तं ब्रह्मेति॥ सत्यज्ञानानन्दैकरसं ब्रह्मतदुपनयमेकं संपद्यप्रत्युक्त
रीत्या संशयविपर्ययविरहेण सम्यक्सम्यक्साक्षात्कुर्वन्ब्रह्मविदाप्नोतीत्यादिश्रुत्यक्तब्रह्मविद्भवतीत्यर्थः॥

कैनोमन्त्रितस्यार्थस्य मंत्रहस्याख्यानानंतरं मंत्रवद्धं कानिरासाय विस्तरव्याख्यानमपेक्षितं तेन तस्माद्वा इत्यादिनाऽयं पनिषदित्यवमं
नेन॥ नहि नः परं संग्रहप्रतिपाद्यनेपाद्यते॥ तत्र तावत्सत्यं ज्ञानमनंतं ब्रह्मेति यदानंत्यं प्रतिज्ञातं तत्कोपपद्यते॥ वियदादिभूतनौ
तिक॥ प्रपंचजातस्य परिच्छेदकवस्तुनस्तस्य विद्यमानत्वादित्याशंक्य तदुपपादयितुं तस्य कारणत्वमाह॥ ब्रह्मरूपेत्यादिना॥ ए
ग्राम्यायते॥ तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवीति अस्याः श्रुतेरर्थः श्रुतेरर्थं

ब्रह्मरूपात्मनस्तस्मादेतस्माच्छक्तिमिश्रितात्॥२४॥

प्रतिपादयन्ति॥ ब्रह्मेति॥ तस्माच्छब्देन श्रुतौ ब्रह्मविदाप्नोति परमिति यद्बहितत्त्वं वाक्यान्निर्दिष्टं ब्रह्मतयरामृश्यते॥ एतस्मा
दित्येतच्छब्देनेति सत्यं ज्ञानमनंतं ब्रह्मेति सन्निहितमंत्रवाक्यं निर्दिष्टं॥ असंगोदासीनस्य परमार्थतो निरवद्यस्य स्रष्टत्वा
संभवमित्याशंक्य तेनैतत्संभावनया आह॥ शक्तिमिश्रितादिति॥ आत्मीकर्मपरिपाकवशेन सिसृक्षितकार्यप्रपंचोन्मुखानतस्व
रूपपरिकल्पितत्वेन तदाश्रिता माया शक्तिस्तन्मिश्रितात्तदुपाधिकादित्यर्थः॥२४॥ रामः
२२

एवं मायाशक्तिशबलाद्ब्रह्मस्वरूपादात्मनः सकाशात् अपंचीकृतः सूक्ष्मः शब्दगुणो वकाशात्मक आकाशः संभूतः समुत्पन्नः॥ पंचीकरणे नहि
तानि स्थूलीभवंति तथात्वं वायोर्वाक्यैः छांदोग्योपनिषदर्थकथनप्रस्तावे प्रतिपादयिष्यते॥ निमित्तकारणवाचिन्याः शब्दादपि पंचमीभवतिहेतौवि
धानात् तथाप्युपादानकारणवाचिन्याः शब्दादपि जनिकर्तुः प्रकृतिरितिस्मरणात्॥ एवं चात्र तस्मादिति पंचमी तदुभयरूपात्वं ब्रह्मणः प्रा
गदृष्टया॥ ब्रह्म हि कार्यस्य जगतो निमित्तमुपादानं च॥ सोकामयत बहुस्यां प्रजायेयेति कामयितृत्वेन स्वस्यैव बहुभावेन चा
भिन्ननिमित्तोपादानस्य श्रुतिप्रतिपादितत्वात्॥ बादरायणोपि ब्रह्मणोऽनेयद्रूपत्वं सूचयामास॥ प्रकृतिश्च प्रतिज्ञादृष्टांतानुरोधादिति

अपंचीकृत आकाशः संभूतो रज्जुसर्पवत्॥

येन सशब्दिव्यत्वादात्मवदाकाशस्यानित्यत्वं मन्यमानाः संभूत इत्यभिव्यक्तिपरतयोक्तमर्थमन्यथयंति ते वादरा
यणेनैव न वियदश्रुतेरित्यधिकरणेन निराकृताः॥ ननु वियदादिकार्यप्रपंचैनैव वस्तुना ब्रह्मणः परिच्छेदः स्यात्॥ तथा
ब्रह्मणोपादानं साक्षी रदधिष्ठायेन जगदाकारेण परिणमते॥ अथवा मृद्घटन्यायेन जगदारंभेन च दृश्यतयोरत्यंतरदंगी
कर्तव्यं तथा च ब्रह्मणो निरवयवत्वादिप्रसक्तिरित्याशंक्याह॥ रज्जुसर्पवदिति॥ नस्वयमारंभवादः परिणामवादो वा विवक्षितः॥ पे
नैवं प्रसंगेन॥ अपितु विवर्त एव विवक्षितः॥ यथा रज्जुरयमविकृतैव मन्दतमापयाससर्पाकारेण विवर्तते॥ एवं ब्रह्मापि निर्विकार

स्ः ब्रह्मगी॰ मेव सत्त्वं ॥ मायायाश्चित्विलासेन वियदादिजगदाकारेण विवर्त्तः ॥ न कारणस्वरूपाविरोधेन कार्यापत्तिर्नाशो विवर्त्तः ॥ अतो ब्रह्मणो निर्वि
२३ कारित्वाविद्यातादात्म्यत्वप्रसक्तिरिति न्यायः ॥ अयमेवार्थो बादरायणेनापि कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वेत्यत्र निर्णीतत्वात् ॥
एवं ब्रह्माकारस्य वियदादिभूतभौतिकप्रपंचस्याधिष्ठाने ब्रह्मणि कारणे मायापरिकल्पितत्वेन रज्जुसर्पवदेवाधिष्ठानाद्व्यतिरि
क्तत्वात् ॥ यथा च मत्कार्यघटशरावोदंचनादिकं कारणभूतमृद्व्यतिरेकेणालब्धसत्ताकत्वान्मृत्स्वरूपाद्घटाकारादिरूपविशेषम
तदाचक्षणघटादिशब्दस्य च वाचारंभणमात्रत्वात्कारणमृन्मात्रमेव न तु ततोऽन्यत् ॥ एवं ब्रह्मकार्यस्यापि कारणतन्मात्रब्रह्मणस्त

आकाशाद्वायुसंज्ञस्तु स्पर्शोऽपंचीकृतः पुनः ॥२५॥

कृतपरिच्छेदो न शंकनीय इत्यर्थः ॥ आकाशादिति तु न आरोपि
तस्याकाशादेरनिर्वाच्यत्वेन कार्यनिराधिष्ठानत्वायोगात् ॥ इदं सर्वमसृजत यदिदं किंच ॥ एतस्माज्जायते प्राणो मनः सर्वेन्द्रि
याणि च ॥ खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीति विशेषेण सर्वस्यापि द्वैतप्रपंचस्य ब्रह्मकार्यत्वश्रवणाच्चाकाशादित
कार्यविशेषारोपाधिष्ठानभूतं तदुपाधिकं ब्रह्मैवोपादानत्वेनाकाशादिनाभिः पंचभिर्निर्दिश्यते ॥ तस्मादात्मन आ राम:
काशरूपापन्नाद्ब्रह्मणः संकाशात्स्पर्शतन्मात्रापरपर्यायः सूक्ष्मो वायुः स्वकारणगुणगुणेन शब्देन स्वगुणेन स्प २३
र्शेन च गुणद्वयवान्समुत्पन्नः ॥२५॥

वायोरग्निरिति ॥ एवं वायुरूपापन्नाद्ब्रह्मणः स्वस्वकारणगुणांशाभ्यां शब्दस्पर्शाभ्यां स्वगुणेन रूपेण च गुणत्रयवान्सूक्ष्मोऽग्निः समुत्पन्नः ॥
तथा च वायोरग्निरिति तैत्तिरीयके तेजसो वायूपादानत्वश्रवणात् छांदोग्ये च तत्तेजोऽसृजतेति सद्रूपब्रह्मोपादानत्वश्रवणाच्च श्रु
त्योर्मिथो विरोधादप्रामाण्यमिति शंकानिरवकाशा तैत्तिरीयकेऽप्युक्तरीत्या ब्रह्मोपादानत्वस्याविघातात् ॥ अत एव भगवता व्यासेनाप्य
यमर्थमसूचयत् ॥ तेजोऽतस्तथा ह्याहेति ॥ अग्नेरापः इति ॥ तस्माद्वाग्निरूपापन्नाद्ब्रह्मणः सकाशात्कारणगतैः शब्दाद्यैस्त्रिभिर्गुणैः

वायोरग्निस्तथा चाग्नेरापश्चाद्भ्यो वसुंधरा ॥

स्वगुणेन रसेन च गुणचतुष्टयवत्य आपो जाताः ॥ अद्भ्यो वसुंधरेति ॥ अब्रूपापन्नात्तस्मादेव ब्रह्मणः कारणगतचतुष्टयगुणे
न स्वगुणेन च गंधेन पंचगुणा पृथिवी समुत्पन्ना ॥ अतः पृथिव्या ओषधयः ओषधीभ्योऽन्नम् अन्नात्पुरुष इति भौतिकप्रपंचसृष्टि
राम्नाता संगृह्णाति ॥ तानीति परमेश्वरस्य स्थानि वियदादि सूक्ष्मभूतानि तदाश्रैव पंचीकरणेन स्थूलीकृत्य तत्कार्यं भूतं ब्रह्मां
डादिकं मया निर्मितमिति ॥ ब्रह्मण उक्तिः ॥ परः शिवो हि वस्तुवियदादि सूक्ष्मभूतोपाधिकः सन् हिरण्यगर्भः ॥ पः प्रथमः स्व

सू॰ अ॰ गी॰ २४ रीरी प्रजापतिर्ब्रह्मेति च राजैश्वर्यपदिश्यते॥ न कर्तृकरणवहिमवेत्तीति कः सगर्भः॥ ब्रह्मांडसर्गस्य मध्ये पृथिव्यादिलोकांस्तेषु चौषधिवनस्प
त्यादिकं प्र वंभोग्यजातं देवासुरमनुष्यादीनो कृत्स्नाहं सृष्टवानस्मीत्यर्थः॥ देवा इत्येकं संबोधनं देवा इयं इति चत्र देवशब्दः कर्मदेवा

तानि कृतानि सूक्ष्माणि पंचीकृत्य शिवाज्ञया॥२६॥ तेभ्य एव सुराः स्पष्टं ब्रह्मांडाख्यमिदं मया॥ भुवनानि विशिष्टानि नि
र्मितानि शिवाज्ञया॥२७॥ ब्रह्मांडस्योदरे देवाश्च विविधाश्रमाः॥ वाद्ययो मनुष्याश्च तथा पश्वादयो जनाः॥२८॥ तत्र क
र्मानुरूपेण मया सृष्टाः शिवाज्ञया॥ ॥७॥

भिप्रायः॥ त्र्येषां देवानां देवा इति पृथक् प्रतिपादितत्वात्॥ तत्र कर्मानुरूपेणेति॥ तत्तत्प्राणिकृतपरिपक्वपुण्यपापनिवहस्य वै रामः
चित्र्येण तत्फलभूतविचित्रसुखदुःखोपभोगाय देवमनुष्यादिदेहेन नानाविधभोगायतनानि निर्मितानीत्यर्थः॥ २४

मनुष्यापि मदेषु प्राणिषु पुरुषस्यैव विद्याधिकार इति तस्यैव सृष्टिः स्पष्टा प्रतिपादिता॥ अत एव तैत्तिरीयके पुरुषाकारपरिणतदेहमध्येऽवस्थि
तस्यैवात्मनो ज्ञानविशेषाविर्भावेन विद्याधिकारवं स्थापनं पुरुषेत्वेवाविस्तरामात्मा सहितप्रज्ञानेन संपन्नतमो विज्ञानं वदति विज्ञानं प
श्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीप्सतीति॥ अन्नपरिणामरूपपुरुषशरीरतादात्म्यापन्नस्यात्मनः सर्वांतरब्रह्मरूपत्वं
प्रतिपादयितुं बाह्यांतरभावेनान्नमयप्राणमयमनोमयविज्ञानमयानंदमयाख्याः पंचकोशाः प्रतिपन्नासौ कथयि स वा एष पुरुषो
ऽन्नरसमय इत्यादिना स्फुटतो प्रतिपादितास्ता संगच्छन्ते॥ अस्थीमांसादिनानत्र नावश्रीव भावेनावस्थितस्य तादात्म्यापन्नोऽन्नमयश्च
ति शरीराणि भवंति॥ स्थूलसूक्ष्मकारणात्मना॥ तत्रान्नरसपरिणामरूपं कौशिकं स्थूलशरीरं तत्तादात्म्यापन्नोऽन्नमयः आत्मा
भवति॥ स वा एष पुरुषोऽन्नरसमय इति श्रुतौ तच्छब्देन प्रकृतमात्मानं परामृश्य तस्यान्नमयत्वप्रतिपादनात्॥ एवं प्रा
णकोशादीनां तादात्म्येन प्राणमयादित्वमपि तस्यात्मनोऽधिगंतव्यं॥ तस्य चान्नपरिणामरूपस्य स्थूलशरीरस्यात्मत्वोपदेशे
न सशरीरादन्यस्य पुत्रकलत्रादेरात्मत्वभ्रमो निवर्त्तितः॥ तस्य मध्येऽपि सूक्ष्मं तारतम्ये पंचदश सप्तदशात्मकं लिंगं तदात्मनः सू
क्ष्मशरीरं॥ तदुभयस्य हेतुभूताया मलिनसत्वप्रधानाऽविद्यास्तु प्रभावबलात्सा तस्यात्मनः कारणशरीरं॥ तत्र सूक्ष्मशरीरं प्रा
णमयमनोमयविज्ञानमयाख्यकोशत्रयांतर्गतं॥ आनंदमयस्तु कारणशरीरमिति विवेकः॥ सत्वरजस्तमोगुणात्मकमा

सू॰ब्रह्मगी॰ २५

वैया कार्यत्वान्नूनान्यपि गुणत्रयात्मकानि॥ तत्र वियदादिस्थरजस्तन्मात्रांशा ये पंच रजोंशास्तैरारब्धानि वाक्पाणिपादादीनि पंच कर्मेंद्रिया
णि॥ तद्रजोंशसमुदायारब्धः प्राणो नाम क्रियाहेतुः क्रियाशक्त्यात्मकः प्राणस्तस्य प्राणापानाद्याः पंच वृत्तयः॥ एवं पंचप्राणकर्मे
द्रियरूपप्राणमयकोशविशिष्टस्यात्मन उपदेशेन बाह्यस्यानात्मत्वं प्रतिपादयति श्रुतिः॥ तस्माद्वा एतस्मादन्नरसमयादन्योंतरस्त्वा
त्मा प्राणमय इति॥ तदेतदाह॥ अस्थीनि॥ अन्नमयस्यात्मनः॥ तस्माद्वा एतस्मादन्नरसमयादुपाधिभूतं पदस्थि स्याद्यादिरूपमन्न

नानेनान्नमयोऽप्यात्मा विभिन्नश्चांतरः स्वतः॥ अस्थिमांसादिरूपं यच्छरीरं भा
ति देहिनां॥ ३०॥ तस्मात्प्राणमयोऽप्यात्मा विभिन्नश्चांतरो यतः॥

कार्यपांचभौतिकं शरीरं तस्मात्स्थूलशरीरात्प्राणमयकोशविशिष्ट आत्मा विभिन्न एव ज्ञातव्यः॥ यतः कारणादयमांतरः॥ अंतरे देहमध्ये
वर्तमानोऽनुभूयते॥ अतो बाह्याद्देहात्प्राणमय आत्मा विवेकेन प्रत्येतव्य इत्यर्थः॥ अत एवास्मिन्कोशे बद्धहिरात्म्यादेकत्वसामान्यादत्र विका
रश्चास्य देहस्य कोशत्वं॥ एवमुत्तरत्रापि मयात्मोपदेशेन पूर्वस्य रूपस्य बाह्यतया विवेकेनात्मत्वं मनिरासात्कोशरूपत्वमवगंतव्यं॥ रामः २५

एवं प्राणमयोपदेशेन बाह्यस्यान्नमयस्यानात्मत्वं प्रतिपाद्य प्राणमयस्यापि कोशरूपत्वेनानात्मत्वं प्रतिपादयितुं तस्मादभ्यंतरं मनोम
यमात्मानमुपदिशति श्रुतिः॥ तस्माद्वा एतस्मात्प्राणमयादन्योंतर आत्मा मनोमय इति तत्स्वरूपं गृह्णाति॥ योयमिति॥ वियदादिपंचभू
तगतसत्त्वांशैरारब्धानि श्रोत्रादीनि पंच ज्ञानेंद्रियाणि तत्सत्त्वांशसमुदायपरिणामरूपमंतःकरणं तदुपादानभूतसत्त्वस्य स्वस्वा
त्मनात्मस्वरूपप्रकाशाभिव्यंजकत्वं स्वात्मनो चैतन्यामर्थ्यस्वभावात्तत्कार्यमंतःकरणमपि स्वरूपसुखाभिव्यंजकत्वात्मनास्वरूपप्रका
शाभिव्यंजकत्वात्मनाद्विधापरिणमतेन तत्प्रकाशाभिव्यंजकावृत्तिरपि द्विधा षड्जोऽनुवेधात्संकल्पविकल्पात्मिका मनःसंज्ञा जन

योयं प्राणमयोऽत्रात्मा नाति सर्वशरीरिणां॥ ३१॥ ततो मनोमयो ह्यात्मा विभिन्नश्चांतरः स्वतः॥

ते॥ रजःसंस्पर्शविरहाच्चैतन्यमस्मिन्निश्चयरूपा मतिर्बुद्ध्याख्याऽलभते॥ एवं मनोबुद्धिभेदभिन्नवृत्तिमदंतःकरणस
हकृतानि चक्षुरादीनीद्रियाण्यपि विमर्शनिश्चयरूपद्विविधज्ञानजनकत्वेन द्विविधानि भवंति॥ तत्र विमर्शज्ञानकपंचज्ञानेंद्रि
याण्यपि विमर्शयसहितेन मनःसंज्ञवृत्तिमदंतःकरणोपाधिविशिष्ट आत्मा मनोमयः स च प्राणमयात्प्राणापानादिसंघातप्राणमयाद
तरत्वेन विभिन्नः॥ तत्र हेतुमाह॥ स्वत इति॥ अंतरस्थितात्मस्वरूपचैतन्याभिव्यंजकत्वेन तन्मात्रस्वभावभेददांतरत्वमित्यर्थः॥
प्राणमयस्य रजःपरिणामरूपचालनादीरितं विमर्शकाशमभिव्यनक्ति॥ अत एव सुषुप्तौ मत्यामपि प्राणवृत्तौ जाग्रदवस्थेतत्स्यावि

सू॰ब्र॰गी॰ २६

शोषाभिव्यक्तिर्न हि स्वरूपमेत्॥ उच्छ्वासनिश्वासादिक्रियाप्रवर्तकः सन्नन्नमयदेहस्य धारणमेव वलं करोति॥ तथा च प्राणवायोः॥ अहमेवैत
त्स्वधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामीति॥ एवमनयोर्विविक्तस्वरूपत्वान्मनोमय आत्मा प्राणमयादांतरो विविक्त
स्वमन्येन वा इति भावः॥ एवं प्राणमयस्य वाह्यत्वेन कोशरूपत्वादनात्मत्वं प्रसाध्य मनोमयस्यापि तथात्वं प्रतिपादयितुं तस्मादन्यो
न्तरं विज्ञानमयमात्मानमुपदिशति श्रुतिः॥ तस्माद्वा एतस्मान्मनोमयादन्योऽन्तर आत्मा विज्ञानमय इति तैत्तिरीयश्रुतिः॥ यो यं मनोम

योऽयं मनोमयो ह्यात्मा जानि सर्वशरीरिणां॥ ७॥ विज्ञानमय आत्मा च ततोऽन्यश्चांतरो यतः॥ ८॥

ऽयं इति॥ प्रागुदीरितत्वेनात्मा निश्चयज्ञानजनक चक्षुरादीन्द्रियसाहितबुद्ध्याख्यवृत्तिमदंतःकरणविशिष्ट आत्मा विज्ञानमयः॥ विज्ञाय
तेऽनेनेति विज्ञानमुक्तविधमंतःकरणं तन्मयस्तद्विकारः सर्वविमर्शरूपान्मनोमयादंतरत्वेनाभिभिन्नः॥ अंतरत्वं च रजःसंसर्गविरहे
ण तत्रावस्थितात्मचैतन्यस्य निश्चयरूपेण विशेषतस्तत्राभिव्यक्तेः रनुष्ठेयपदार्थविषयनिश्चयज्ञानवत्त एव विद्याकर्मणोरधिका
रश्च इत्यभिप्रेत्य विज्ञानमयात्मनोऽयज्ञादिक्रियाहेतुत्वमाम्नायते॥ विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि चेति॥ रामः २६

मनोमयवद्विज्ञानमयस्यापि बाह्यत्वेनानात्मत्वं प्रतिपादयितुमस्मादप्यंतरमानंदमयमात्मानं श्रुतिरुपदिशति॥ तस्माद्वा एतस्माद्विज्ञानमया
दन्योऽन्तर आत्मानंदमय इति॥ तैत्तिरीयश्रुतिः॥ विज्ञानेति॥ विद्याकर्मणोः फलत्सुखमानंदस्तद्विषयं जोपाधिविशिष्ट आत्मानंदमयः॥ स
च फलरूपत्वेनांतरंगत्वात् फलरूपाद्विज्ञानमयादांतरो विविक्तश्च स एवात्मत्वेन बोद्धव्यः॥ विज्ञानमयस्तु तत्फलसाधनभूतवि
द्याकर्मनिष्पादकतया बहिरंगत्वाद्बाह्योऽनात्मा॥ एवं प्राणमयादिकोशत्रयस्य विवेकेनात्मनः सूक्ष्मशरीराद्विवेकः सिद्धो भवति॥ ज्ञा
नेंद्रियाणि पंचैव तथा कर्मेंद्रियाण्यपि॥ वायवः पंच बुद्धिश्च मनश्च सप्तदश विदुरिति हि॥ सूक्ष्मशरीरस्वरूपं॥ एतस्यैव सप्तदशकस्यैव
प्राणमयादिकोशत्रयरूपेणावस्थितस्य प्रतिपादितत्वात्॥ एवं स्थूलसूक्ष्मशरीराभ्यामात्मनः सिद्धेऽपि विवेके कारणशरीरादपि त

विज्ञानमय आत्मा ये विजानाति सकलात्मनां॥ ९॥ आनंदमय आत्मा च ततोऽन्यश्चांतरो यतः॥

स्य विवेकेन भवितव्यं न वेत्यर्थमिदं चिंतनीयं॥ किमानंदमय एव सर्वांतर आत्मा॥ उत ततोऽप्यंतरं ब्रह्मास्तीति॥ ननु सर्वांतरात्मत्वेनाभि
मतं॥ आनंदमयस्तु अन्नमयादिवत्सोपाधिक एवेति॥ न ह्यसौ ततोऽन्तर आत्मानंदमय इतिवदस्मादन्यः॥ तस्यात्मनोऽनुपदेशात्॥ मयटो वि
कारप्रायपठितस्य तद्बाधेन प्राचुर्यार्थतयाप्युपपत्तेः॥ प्रियशिरस्त्वादीनां सोपाधिकत्वेनाप्यस्मिन् संभवात् यदेष आकाश आनंदो न स्यात् से
षानंदस्य मीमांसा भवतीत्याद्यानंदशब्दाभ्यासस्य वसंतेव संतमेनं निपायजनेतिज्योतिःशास्त्रस्य ज्योतिष्टोमप्रतिपादकत्ववदानंदमयप्र
रत्वेन प्रयोजयितुं शक्यत्वादस्य स्यामानः स एव सर्वांतर आत्मेति चेन्न॥ मैवं॥ ब्रह्मपुच्छं प्रतिष्ठा आनंदमयपादिसर्वाधारस्य सर्वांतरस्यैव ब्र
ह्मण उपदेशात्र — त्वं प्राधान्येन विवक्षितं॥ ब्रह्मविदाप्नोति परमिति फलवद्ब्रह्मात्मज्ञानं प्रक्रम्य सत्यं ज्ञानमनंतं ब्रह्मेति प्रतिपादितत्वे

सू.ब्र.वा.
२७

नि॥ अस्ति ब्रह्मेति चेद्वेदेत्येवमस्य समानता॥ आत्मा सो हि तात्पर्यलिंग॥ उपक्रमोपसंहारावभ्यासोऽपूर्वता फलं॥ अर्थवादोपपत्ती च लिंगं
तात्पर्यनिर्णय इत्युक्तत्वात्॥ ब्रह्मशब्दस्य परिच्छिन्ने निर्विकारे ब्रह्मणि मुख्यः॥ ननु सावयवे आनंदमये न चैतस्य ब्रह्मपुच्छं प्रतिष्ठे
त्यानंदमयावयवत्वश्रवणात् प्राधान्यमिति मंतव्यं॥ ब्रह्मपुच्छमिति॥ पदस्य रूपादावात्मनीयमानस्यावयववत्वस्य ब्रह्मणि पदकस्मा
बाधात्॥ अनेन हि वाक्यस्थलीयस्त्वात्॥ आनंदशब्दात्मांसः सोऽपि निरतिशय निर्विकार सुखरूपे ब्रह्मणि मुख्यः॥ विज्ञानमानंदं ब्रह्मेत्यान
दो ब्रह्मेति व्यजानादित्यादिश्रुतिप्रसिद्धेः॥ यद्यानंदमय एवमवर्तिरच्यास्यानु॥ असन्नेव स भवति असद्ब्रह्मेति वेद चेदिति श्लोको दाह
रणमसंगतं स्यात्॥ तथा एवमानंदमयमात्मानमुपसंक्रामतीत्यन्नमयादिवदुपसंक्रमितप्रतिपादनेनोपपद्येत॥ अन्यस्यो वे॥
एतमेवमानंदमयमात्मानमुपसंक्रामतीत्यन्नमयादिवदुपसंक्रमितत्वप्रतिपादनं नापपद्येत उपसंक्रमितव्यस्याभावात्॥
तस्माद्ब्रह्मैव सर्वांतरं स्वप्राधान्येन निर्दिष्टमित्यंगीकर्तव्यं॥ पुच्छशब्दस्त्ववयवप्रायपतितोऽप्याधारत्वमात्रलक्षकः॥ एवं चानंदमये
रन्ति मयरोविकारप्रायपाठोऽनुगृहीतो भवति॥ तस्मादन्नमयादिवदानंदमयोऽप्युपाधिविशिष्ट इति सिद्धं॥ एतच्चानंदमय इति मं
यो न्यासादित्याधिकरणे निर्णीतं॥ स चोपाधिः प्रागुदीरितसात्त्विकांतःकरणपरिणामरूपा आत्मस्वरूपसुखव्यंजकवृत्तिः॥ सा च
प्रियमोदादिहेतुभूतानि घ्नते॥ निरतिशयानंदो ह्यात्मनः स्वरूपं॥ तच्च सुतकल्पोपस्थापिते इष्टपुत्रमित्रकलत्रादिदर्शनलाभो
पजनितैः प्रियमोदादिहेतुकैरंतःकरणवृत्तिविशेषैरभिव्यज्यते॥ अभिव्यक्तं च तद्विषयसुखमिति लोकोऽप्यवहरति॥ तत्र प्राणिकर्मप
नीते व्यंजकोपाधित्वेन॥ तथाविधाश्च हृदयंत्र यः स्वापमलयोर्हेतुकारणे सतत लाल्यते॥ तथा च कारणात्मना वेष्टितं तथाविधकर्मह
त्रिकमलिनसत्त्वप्रधानमविद्यापरपर्यायं नामरूपाज्ञानमेवानंदमयोपाधिर्विविक्षितः॥

राम:
२७

स्येमता नंदेन करणवृत्तिविशेषैरभिव्यज्यते॥ तथाविधिके प्रसन्नेऽन्तःकरणे आनंद इति च वदतो नाप्यकारस्यापि कारणसत्त्वपरत्वमेवाभिप्रेतो
र्थ इति व्याख्येयं॥ येन तथा व्याचक्षते तेषां तथाविधानंदजनकाद्विवेकोत्पन्नांतःस्यात्॥ ईदृशोपाधिविशिष्टो योऽयमानंदमयः सोऽपि प्रागुक्तरीत्याऽवि
द्यानमयाद्यंतरो ज्ञातव्य इत्यर्थः॥ एवं पंच कोशाः प्रतिपादिताः॥ तत्र वाक्यमात्रमन्नमयादेरंतरेण कोशेन यत्पूर्णत्वं श्रुतिः प्रतिपादयति॥ तेनै
ष पूर्णः स वा एष पुरुषविध एवेति तस्य पुरुषविधतामित्यन्वतीति॥ यो ऽयमिति॥ योऽयं प्रतिपादितः सोऽयं यद्यपि शिरःपुच्छपक्षादिना देहेन परिकल्पितोऽन्नमयः को
शः सोऽयं स्वस्मादांतरेण तथाविधपरिकल्पितावयवेन प्राणमयेन पूर्णः॥ यथा मूषाकारप्रतिमास्वात्मनि निषिक्ते नदनतामेण सर्वतः पूर्य

यो यमन्नमयः सोऽयं पूर्णः प्राणमयेन तु॥ ४४॥ मनोमयेन प्राणोऽपि तथा पूर्णः स्वभावतः॥ तथा मनोमयः सम्यक् पूर्णो ज्ञानमयेन तु॥ ४५॥
आनंदेन सदा पूर्णः सदा ज्ञानमयः सुराः॥ तथानंदमयश्चापि ब्रह्मणानेन साक्षिणा॥ ४६॥ सर्वांतरेण संपूर्णो ब्रह्मणा नान्येन केनचित्॥

ननेद्दृ॥ एवमुत्तरत्रापि योजना॥ ४७॥ ४८॥ ब्रह्मणानेनेति॥ यथाप्यानंदमयादन्योऽन्तरस्तत्र निष्पन्नः कश्चिद्दृशो नास्ति॥ तथापि ब्रह्मपुच्छं प्रति
ष्ठेत्यानंदमयाधारत्वेन निर्दिष्टं सत्यज्ञानादिलक्षणं स्वात्मनि मायापरिकल्पितमन्नमयादिसकलानात्मवस्तुसाक्षिभूतं पंचकोशातीतं स
र्वांतरं यद्ब्रह्म तस्य च वोऽद्यात्मान्याधारा सादन्नमयादयो प्याना नःस्वरूपाः॥ तेन सर्वाधिष्ठानेन साक्षिचैतन्येन रूपेण ब्रह्मणानंदमयोऽपि पूर्ण
आत्मनः॥ ४९॥ ब्रह्मणानेनेति॥ उक्तविधं ब्रह्मदेशकालवस्तुकृतत्रिविधपरिच्छेदराहित्येनाद्वितीयत्वादन्येन केनचिदपि वस्तुना तथापं
स्वयमेव सर्वमापूर्णापरिच्छिन्नं सदन्नेनेत्यर्थः॥

सू.ब्रह्मगी० २८ णानावनानिहितं गुहायामिति मन्त्रवाक्ये यद्गुहानिहितत्वं ब्रह्मणः प्रदर्शितं तदाख्यानं भवति॥ तथाविधस्य सर्वान्तरस्य ब्रह्मणः प्रति
पत्त्युपायत्वेनान्नमयादिपंचकोशाः प्रतिपादिताः न तूपासनार्थाः॥ ननु येन्नं ब्रह्मोपासते ये प्राणं ब्रह्मोपासते इत्यादिमन्त्रवाक्यादन्न
मयादीनामुपासनगितत्वं प्रतीयत इति चेत्॥ नैवं॥ सर्वान्तरीयस्योपासनाप्रकरणस्थस्यान्नाद्वै प्रजाः प्रजायन्त इत्यादिमन्त्रस्यान्न
न्माकोशत्वेन प्रतिपादितान्नप्राणादिसद्भावं द्रष्टव्यत्वं तु तत्कोशावसाने संवादत्वेनोदाहृतत्वात्॥ यद्यत्रोपासनाविधिपरस्तान्मनो
मनोमयकोशोदाहृतश्लोकेप्यप्राप्तिचोदनाश्रूयते अतो मनोमयकोशस्य तावदुपदेशार्थत्वमेव न तूपासनार्थत्वं तस्मादन्या
दृत्रापि तथैवांगीकार्यं॥ इतरथोपासनोपदेशरूपप्रतिपाद्यार्थत्वेदाहाके न दृश्यात्॥ संभवति वा तद्दृश्येत तद्भेदो न युक्तः॥ संभव
त्येकवाक्यत्वे वाक्यभेदस्य दुष्टत्वमिति न्यायात्॥ एवं सर्वान्तरं ब्रह्मोपादिश्य तस्य निर्विशेषत्वेन वाङ्मनसातीतत्वादसत्त्वमाशं
क्य तन्निरासाय मन्त्रोयमुदाहृतः॥ असन्नेव स भवति असद्ब्रह्मेति वेद चेत्॥ अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति॥ त
त्पदस्यप्यसदेव ब्रह्म न तथापि नदस्तीति वेदनीयमित्येवंविधस्य स्फुरणात्तत्त्वस्य संशयो भवति। किमसदेव ब्रह्मोत स
दिवेति तथा तस्य ब्रह्मणः सर्वगतत्वात् अविद्वानपि तद्ब्रह्म प्राप्नोति न वा यदि न प्राप्नोति तस्मात्सामान्याद्विद्वानपि तद्ब्रह्म न प्राप्नो
तीति वेति तावेतौ विद्वद्विद्वद्विषयौ प्रश्नौ तत्रैव प्रदर्शितौ॥ उताविद्वानमुंलोकं प्रेत्य कश्चन गच्छती॥ आहो विद्वानमुंलोकं प्रेत्य क रामः
श्चित्समश्नुता उ इत्यनुपुष्टुनं विचारार्थौ॥ तेषां त्रयाणामुत्तररूपात्मकतिः सोकामयतेत्यादिका॥ २८

नन्त्ररसरूपत्वाद्ब्रह्मणो यदस्तित्वं तन्न्यप्रतिपादितं श्रुतौ॥ रसो वै रसः स रसं ह्येवायं लब्ध्वानंदी भवतीति तत्संगृह्याह॥ यदिदंपिति॥ ब्रह्मपु
च्छत्रितिः सेनियदिदं पंचकोशानतेरथ्यपरोक्षतया भासमानं सत्त्वज्ञानमनंतं॥ ब्रह्मेति उदारितनवहृत्यं ब्रह्म॥ ५४॥ सोयं मधुरादिरसं वस्तव
श्यमस्य हि जिह्वाग्निः साक्षादव्यवधानेनास्वादनीयतादृसः॥ एतद्रसात्मकत्वमुपपादयति॥ एतमेवेति॥ आत्मज्ञो हि देहात्मना तनमना
यनं तमेव—वात्मानं निरतिशयानंदरूपतयारसात्मकं स्वात्मनि साक्षात्कृत्य वेषु देशेषु सुखी भवति॥ एतद्व्यतिरिक्तमधुराद्यानि
स्वादस्य रसत्वेन तु कौचकदाचिदेव सुखितः॥ अतो विद्वत्सु तत्र च प्रत्यगानंदस्य रसात्मकत्वमनोरमत्वाद्ब्रह्मणोस्तित्वं सिद्धमित्यर्थः॥ ५५॥ पुनर
यदिदं ब्रह्मपुच्छाख्यं सत्यज्ञानाद्यात्मकं॥ ५५॥ स रसः सर्वदा साक्षात्स्वात्मनया सुरपुंगवाः॥ एतमेव रसं साक्षात्स ध्यादेही सनातनं॥ ५६॥
सुखी भवति सर्वत्र नान्यथा सुरसत्तमाः॥ ५७॥ असत्यस्मिन्परानंदे स्वात्मभूतेऽखिलात्मना॥ कोजीवति नरो देवाः को वा नित्यं विचेष्टते ॥५८॥
पि तत्साधनार्थरूपतो॥ को ह्येवान्यात्कः प्राण्यात्॥ यदेष आकाश आनंदो न स्यात् एष ह्येवानंदयातीति तत्संगृह्णाति॥ असत्यस्मिन्निति॥ य
दि प्राणिनां शरीरमध्ये परमव्योम—गुहाकेऽव्याकृताकाशात्मा तु तो निरतिशयानंदरूपो यमात्मा न स्यात्॥ नहि कोपि जंतुर्जीवति प्राण
धारणं करोति वा प्राणनादि चेष्टां निमं कुर्यात्॥ तस्मात्तद्व्यतिरेकेण तत्रासोपि तस्य सत्वानुपपत्तेः॥ अनंत आरोपितं काप्यसत्त्वानुपपत्ते
त्वात्कारणस्य ब्रह्मणः सत्त्वमंगीकर्तव्यमित्यर्थः॥ तस्मादिति॥ यस्मादेवमानंदरूपो विद्यते तस्मात्सर्वप्राणिहृदयेष्वप्यपरोक्षे
भासमाने ब्रह्मरसशब्दाभिधेयं भवतिकुतोस्यानंदरूपतेत्यनत्राह॥ आनंदयतीति॥ यस्मादसौ संसारदुःखात्रिमूर्त॥

स॰ ब्रह्मगी॰ सं जीवात्मानं न त्वज्ञानघमस्तु रूपेण स्तुवयति ॥ तस्मादस्यानंदरूपत्वं एव चान्यत्राम्नायते ॥ एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजी
२८ वंतीति ॥ ४७ ॥ तया नयहेतुतयापि ब्रह्मणः सत्यत्वं समर्थितं भवतो ॥ यदा ह्येवैष एतस्मिन्नदृश्ये ॥ नात्म्ये ऽनिरुक्तेऽनिलयने
ऽभयं प्रतिष्ठां विंदते ॥ अथ सोऽभयं गतो भवति ॥ यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते ॥ अथ तस्य भयं भवतीति ॥ तस्य प्रकृतिय
दिति ॥ अदृश्यत्वादीनामादिशब्देन प्रकृतकानात्म्यादिसंग्रहः ॥ यद्दा स्वत्वेनास्मिन्स्यादिरूपे ब्रह्मणि किं रूपे अदृश्ये दृश्यप्रपंचरहिते ॥
अनात्म्ये आत्मनः संबंधितादात्म्यं स्थूलशरीरं तद्रहिते अनिरुक्ते सूक्ष्मभूतारब्धत्वात्सूक्ष्ममपि निरुच्यत इति निरुक्तं लिंगशरीरं

तस्मात्सर्वात्मनां चित्रेनासमानो रसो हरः ॥ आनंदयति दुःखार्त्तं जीवात्मानं कृपाबलात् ॥ ४९ ॥ यदा ह्येवैष एतस्मिन्नदृश्य
त्वादिलक्षणे । निर्भेदं परमेकत्वं विंदते सुरसत्तमाः ॥ ५० ॥ तदैवाभयमत्यंतं कल्याणं परमामृतं ॥ स्वात्मभूतं परं ब्रह्म समया
ति स्वयं वासितः ॥ रे तद्रहिते ॥ अभयते ॥ अभयते हि ॥ न तस्य कोऽप्यंतःकरणं च विद्यत इति ॥ अनिलयने निलीयतेऽस्मिन्कार्य
कारणप्रपंच इति निलयनं भावरूपमज्ञानं कारणशरीरं तद्रहिते ॥ एवंभूते ब्रह्मणि ॥ निर्भेदमन्यः ब्रह्मणा सह द्वित्वेवंविधभेद
रहितं पारमार्थिकमेकत्वं श्रवणमननादिसाधनैः साधको विंदते लभते ॥ तदैव तस्मिन्नेव समये अभयं भयरहितं भ
यहेतोर्भेदस्य निवृत्तत्वात् ॥ भेदाद्धि हि भयहेतुर्द्वितीयाद्वै भयं भवतीति श्रुतेः ॥ निरतिशयनिर्विकारानंदरूपतयात्यंतं श्रेयम राम॰ २९
नयरमं सर्वावस्थममृतं केवलचिद्रूपमनश्वरं एवंभूतं सत् ब्रह्म स्वैकत्वेन व्याप्नोति प्राप्नोति ॥ ५२ ॥

यदा खल्वेतस्मिन्मुक्तलक्षणे ब्रह्मणि अल्पमप्यंतरं भेदं पश्यति तदा तस्य अहमन्यः संसारी मत्तोऽन्यद्ब्रह्मेत्येवं भेददर्शिनो भयं प्रा
प्तिः किं न स्यादिति वक्तव्यं तद्भेददर्शनं भयहेतुः स्यादित्यर्थः ॥ ५३ ॥ ननु ब्रह्मणः सर्वत्र साम्येनावस्थानात्तत्प्राप्तावयोग्या भेददर्शिनोऽप्यभ
यप्राप्तिः किं न स्यादिति तत्राह ॥ सर्वेषामिति ॥ भेददर्शिनामभेददर्शिनां च सर्वेषां हृदयमध्ये आत्मत्वेनोपलभ्यमानेऽस
त्यादिलक्षणे ब्रह्मणि तत्स्वरूपेणानंतप्रकाशे त्वौदासीनमेव भवति अनधिकारिणं प्रत्युदासीनमेव ब्रह्म ॥ तस्य ब्रह्मजिज्ञासायाः परं
स्तु रवतात्मप्रकाशानंदत्वमर्थः ॥ ५४ ॥ पत्त्वद्वितीयनिरतिशयानंदब्रह्मात्मैकत्वविषयनिर्विचिकित्ससाक्षात्कारज्ञानैकनिष्ठस्य फ

यदा ह्येवैष एतस्मिन्नल्पमप्यंतरं नरः ॥ विजानाति तदा तस्य भयं स्यान्नात्र संशयः ॥ ५३ ॥ सर्वेषामात्मभूते पद्ब्रह्म सत्यादिल
क्षणे ॥ उदास्ते तत्सुरश्रेष्ठा यथाज्ञानं जनं प्रति ॥ ५४ ॥ तस्माद्विज्ञानैकनिष्ठानां तदेव परमं पदं ॥ तदात्मत्वेन यानानि केवलं रूप
या सुराः ॥ ५५ ॥ तेनाधीतवेदस्य महाभागैः सुरपुंगवाः ॥ मननेन विहीनस्य भयहेतुः सदा भवेत् ॥ ५६ ॥

पदं पदनीयं परमं सर्वोत्कृष्टमायातत्वात् यतस्तेन तदेव केवलं ब्रह्म तदा तस्मिन्साक्षात्कारसमये स्वात्मभावेन रूपपानातिप्रकाशते ॥
अत एवान्यत्राम्नायते ॥ नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ॥ यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते
तनूं स्वामिति ॥ यस्तु मननमधिकारे मननादिसाधनेन तत्स्वरूपं न साक्षात्करोति तस्यापि तदप्यतस्य ब्रह्म भयकारणं स्या
दित्याम्नातं ॥ तदेव भयं विदुषो मन्वानस्येति तत्सर्वगत्वेन तत्त्वेवेति ॥ तदेव ब्रह्म तु संगवद्दापिनोऽपि ब्रह्मसाक्षात्कार
निमित्तं मननमकुर्वाणस्य भयहेतुर्भवतीत्यर्थः ॥ ५६ ॥

उक्तं ब्रह्मलोकनयहेतुत्वाद्रथितुं शक्नोति मन्त्रो राम उदाहरति॥ भीषास्माद्वातः पवते भीषोदेति सूर्यः॥ भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम इ-
ति मन्त्रो राममुरः॥ वातः पवते भीतिरिति यः॥ भीषा इन्द्रश्चाग्निश्च मृत्युर्धावति पञ्चमं च मस्तिनरस्तन्नमंगच्छन्ति॥ भीषेति। वायुरादीनामखिलजगन्नि-
वहारनिर्वर्त्तिनः धिकृतानां महाप्रभाववतां देवानामपि ब्रह्मलयहेतुः किलकिमुतवक्तव्यमन्येषां प्राणिनां भयहेतुरिति भावः॥ परा॥ एवं भया-
नयहेतुत्वादपि ब्रह्मणोऽस्तित्वं सिद्धं॥ यदेष आकाश आनन्दो न स्यात्॥ एष ह्येवानन्दयातीति॥ यन्निरतिशयानन्दरूपत्वं ब्रह्मणोऽस्ति-

भीषास्मात्पवते वायुर्भीषोदेति दिवाकरः॥ भीषास्मादग्निरिन्द्रश्च मृत्युर्धावति पञ्चमः॥ अस्यैवानन्दलेशे-
नं स्वं जीवा विलसन्तु सर्वकाः॥ तं वन्दे मुक्तिनो देवा स्तारतम्यक्रमेण तु॥ ५७॥

त्वसाधनायोपन्यस्तं॥ तदुपपादनाय तत्तेषामानन्दं सार्वभौमादिहिरण्यगर्भान्तमुक्तं तारतम्येन गणनावेनावच्छिन्नमानन्दं प्रवाहप्र-
तिपादयन्निरुक्तिः॥ सैषानन्दस्य मीमांसा भवति॥ आदिनासएको ब्रह्मण आनन्द इत्येवमन्तेन तत्संगच्छन्ति॥ अस्यैवेति॥ ब्रह्मस्वरूपभूतोऽपौ-
यनिरतिशयानन्दः॥ अस्यैवानन्दस्यैव लेशेन ब्रह्मादिस्तम्बान्ताः सर्वेऽपि हि तत्तत्स्वरूपानन्दाभिव्यञ्जकोपाधिमहत्त्वाल्पत्वाभ्यां
तारतम्यभावेनावच्छिन्नमानन्दं प्राप्य सुखिनो भवन्तीत्यर्थः॥ ५७॥

न्तो सार्वभौमाद्यानन्दविशेषमुपन्यस्य तत्तच्छ्रोत्रियस्य चाकामहतस्येत्यानन्दन्तदभिप्रायं गच्छन्ति॥ तन्नहिति॥ तेषु तेषु सार्वभौमादिपदे-
षु तद्दोषेन्न रसानिशयत्वादिनिमित्तं परिज्ञाय ततो विरक्तस्यैषणात्रयविनिर्मुक्तस्य प्रसन्नचित्तस्य श्रवणमननादिसाधनकलापमनु-
ष्ठितवतः श्रोत्रियस्य ब्रह्मविदोऽनवच्छिन्नानन्दब्रह्मस्वरूपत्वस्य वर्णनक्लेशाभावतः सार्वभौमादिभेदेन तरतमभावेनावच्छिन्नः॥ सर्वोऽप्यानन्दस्त-
स्य विदुषः स्वरूपभूत इति तत्कृतमदेवच्छिन्नस्य सार्वभौमदर्यानन्दविशेषावनासते॥ तथाविदुषोऽपि स्वयं साधनानन्तरं नैरपेक्ष्येण तथावि-
धआनन्दो नातीत्यर्थः॥ ५८॥ एतेन सार्वभौमादिहिरण्यगर्भान्तस्तारतम्यभावेनावच्छिन्नानन्दविशेषाजलतरंगबुद्बुदादयः समुद्रस्वय

तत्तत्पदविरक्तस्य श्रोत्रियस्य प्रमादिजः॥ स्वरूपभूत आनन्दः स्वायं नातिपदे यथा॥ ५८॥ अयमेव वशिवः साक्षादादिमह-
दयेन था॥ अन्येषां हृदये चैव नानिमाश्रितया स्वयं॥ ५९॥

सैकं गतास्त्वद्वितीयं ब्रह्मपरिच्छेदकाभावान्निरतिशयानन्दरूपं
न विष्णतीत्यभिप्रेत्य तस्मिन्नर्थे जीवेश्वरभेदमंशमङ्गीकृत्य दर्शयति॥ स यश्चायं पुरुषे॥ यश्चासावादित्ये॥ स एक इति तत्संगच्छन्ति॥ स
यमेवेति॥ यः परमाकाशादिकारणत्वेन निर्दिष्टोऽविद्यास्वरूपतया सा सा क्रियमाणो निरतिशयानन्दरूपः परशिव एवादित्यहृदये
आदित्यो हि हिरण्यगर्भः॥ स चेश्वरात्मानं नन्दमयकृतादितं॥ दतीयवाक्येन तीयमितिस्मृतेः॥ तस्य प्रथमशरीरिणो हिरण्यगर्भस्य हृद-
ये विशुद्धसत्त्वप्रधानमायोपाधिकः स तस्मादादित्यव्यवधानत्वमाह॥ अनादृतज्ञानतया सर्वज्ञ ईश्वरो नानात्मर्थः॥ तथा एष एव प
रशिवोऽन्येषां जीवानां हृदये पञ्चकोशमध्यमलिनसत्त्वप्रधानाविद्योपाधिकः कश्चिद्भूः संसारमाश्रितेन जातिः॥ ६०॥

सू॰ ब्रह्मगी॰
३१

एवं विरुद्धस्वभावयोरप्यनयोर्जीवेश्वरयोरैक्यप्रतिपत्तिप्रकारमाह॥ विहायेति॥ माया नाम सत्त्वरजस्तमोगुणात्मिका प्रकृतिः सा चो हीरिव जी
वेश्वरोपाधित्वसाधारणरूपाच्च तत्तद्भेदेन तदंशमयमत्र विवक्षितं॥ तथा चोत्तयत्र स्थूलशरीरादितत्कारणभूतमायापर्यन्तं सर्वज्ञत्वकिंचिज्ज्ञत्वादि
विरुद्धधर्महेतुभूतं सांसारिकं त्याज्यमिति विविच्य तत्परित्यागाय तदनुगतं साक्षिचिन्मात्ररूपमत एव परिच्छेदकाभावात्सर्वसाक्षिभूतं तत्त
देकमेवेत्येवमेकोनयम् आत्मानं पश्यति स यथार्थदर्शी॥ रुद्रनारायणादीनामिति॥ ते हि परशिवस्यावतारविग्रहधारिणो जीवा विग्रहधारिणां

विहाय मांसं देहादिमायां तं तु विवेकिनः॥ सर्वसाक्षिणमात्मानं यः पश्यति स पश्यति॥१०॥ रुद्रनारायणादीनां
स्त्रीबालानां च साक्षिणं॥ एवं तर्कप्रमाणाभ्यां यः पश्यति स पश्यति॥११॥

णां तेषामन्येषां जीवानां च साक्षिभूतं चिन्मात्रमुक्तरीत्यात्मभावेन यः पश्यति स एव ब्रह्मवित्॥ एतेन सच्चिदानंदरूपस्य परशिवस्य
जीवेश्वरोपाधिकृतपरिच्छेदनिरासेन तस्यापरिच्छेदनिरासेन तस्यापरिच्छिन्ननिरतिशयज्ञानानंदैकरसत्वमुपपादितं भवति॥ यद्य
प्येतच्छ्लोकत्रयं परपदतात्पर्यप्रतिपादकस्य सर्वाकारमानितिमंत्रजातस्य व्याख्यानरूपत्वाद्वेदे समाम्नातत्वं॥ तथापि यदेष आकाश आनं
दो न स्यादित्युपन्यस्ततर्कसमर्थनार्थमित्येवमसंगतात्मानमिति द्रष्टव्यं॥ एवमद्वितीयं निरतिशयनिर्विकारसच्चिदानंदैकरसस्य
ब्रह्मणोऽखिलप्रतिपादनाद्द्वित्वं नास्तीति संशयो निराकृतः॥११॥

रामः
३१

विद्वानपि न प्राप्नोति वेति प्रश्नस्योत्तरमुत्तरश्लोकाभ्यामिति॥ स य एवंविदित्यादिका एतमानंदमयमात्मानमुपसंक्रामतीत्येवमंता नर्थसंग्रहा
ति॥ यस्यैवमिति॥ यस्य खलु विदुषः एवमुक्तप्रकारेण निरतिशयानंदब्रह्मात्मैकत्वज्ञानमस्ति स ब्रह्मविद् दृष्टादृष्टविषयसमुदायरूप
दखिलादस्माल्लोकात्प्रेत्य ध्येयं निरतिशयादिभेदनिराकारनात्मप्रपंचादात्मानमात्मना बुध्वा विविच्यान्नमयाद्यात्मभूतात्पुनरपि विवेकेनांतरं
प्राणमयाद्यात्मानमवलंब्य विचाराभ्यासेन तस्य बाह्यस्यान्नमयादेरनात्मत्वं जानानोऽन्नमयादिपंचकोशेभ्योऽप्यांतरं सर्वजगत्कस्य

यस्यैवं तर्कमानाभ्यामस्ति विज्ञानमास्तिकः॥ स लोकादखिलादस्माद्विविच्यात्मानमात्मना॥१२॥ अन्नादीनखिला
न्कोशानभ्यासेन विलापितान्॥ उपसंक्रामती शस्य प्रसादादेव केवलात्॥१३॥

नाभ्यंतरं सत्यज्ञानानंतानंदैकरसं ब्रह्म पुच्छं प्रतिष्ठेति सर्वाधारत्वेन यच्छ्रुतिदृष्टं ब्रह्म तदुपसंक्रामति साधकः परशिवार्पणबुद्ध्याऽनुष्ठि
तैर्यज्ञदानादिभिः प्रीणितस्य परमेश्वरस्य प्रसादेन विद्योदये सति भेदहेतोरविद्याया निवृत्तेस्तत्कृतभेदभ्रमनिरासात्सर्वगतत्वेन
नित्यप्राप्तमपि ब्रह्म कंठगतचामीकरन्यायेन पुनः प्राप्नोतीत्यर्थः॥ एवं च विद्वानेव प्राप्नोतीति प्रतिपादनादविदुषोऽपि ब्रह्मप्रा
प्तिरस्ति वा न वेति प्रश्नोऽपि निराकृतो वेदितव्यः॥१२॥१३॥

एवंवेदनमात्राद्रूपप्राप्तिप्रतिपादनेन ब्रह्मणोविशेषाभावोनीतिमुक्तत्वात्कालनागमस्य व्याख्यानरूपोयोवेदसोऽस्त्कृते॥ इति मंत्रभागस्य व्याख्यानोनवतिनाश्रु
दितीयनिरतिशयानंदानयप्राप्तिर्ज्ञानिमात्रसाध्येत्यस्मिन्नर्थे प्रतिपादितेऽर्थे श्रुतिः॥ संवादार्थं किंचिन्मंत्रमुदाहरामः चेवमाम्नातः॥ यतोवाचो
निवर्तन्ते अप्राप्य मनसा सह॥ आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति॥ नं संगच्छति॥ यत इति॥ यतो यस्मादुक्तलक्षणादानंदात्तिर्नि
र्विकल्पकाद्ब्रह्मणः सकाशाद्वाचो निवर्तन्ते॥ अभिधातुमशक्ताः परावर्तन्त इत्यर्थः॥ उक्तं चैतत्त्वयाह॥ निमित्तानामिति ज्ञातीनि हि शब्दानां प्र

यतोवाचोनिवर्तन्ते निमित्तानामभावतः॥ निर्विशेषविवेशब्दः कथं देवाप्रवर्त्त
न॥ ६४॥ विशेषं कंचिदाश्रित्य खलु शब्दः प्रवर्त्तते॥

वृत्तिनिमित्तानि निमित्तानि तेषां प्रवृत्तिनिमित्तानां अभावादित्यर्थः॥ एतदेवोपपादयति॥ निर्विशेष इति॥ यस्मादस्थूलमनणवमरूप
मित्यादिश्रुत्या ब्रह्म निर्विशेषमवगम्यते अतस्तथाविधे जात्यादिसकलधर्मरहिते कथमभिधायकाः शब्दाः प्रवर्त्तेरन् नैव प्रवर्तितुं श
क्नोतीत्यर्थः॥ ६४॥ विशेषं कंचिदिति॥ अभिधेयगतं जात्यादिकं कंचिद्विशेषं प्रवृत्तिनिमित्तत्वेनोपादायैव हि लोके शब्दः प्रवर्तते॥ अत रामः ३२
स्तद्रहिते ब्रह्मणि शब्दप्रवृत्तिरयुक्तेत्यर्थः॥

मद्रूपं॥ मत्स्वार्थ्याह कं॥ सर्वेंद्रियसहकारि तयासर्वविषयगोचरं मनः करणमपि स्वरश्मिभिः सह यस्मान्निर्विकल्पकाद्ब्रह्मणो व्यावृत्तं निवृत्तं
॥ ननु नत्रि रस्तसमस्तोपाधिकं वाङ्मनसातीतं चेत् समाभावे रकप्रमाणाविषयत्वात् शृंगवदसदेव स्यात्॥ नैष दोषः॥ अविषयमा
पि तत्स्वलक्षणपित्तुं शक्यत्वात्॥ तथा हि॥ सत्यज्ञानादिवाक्यानां वाच्यो वैकस्मिन्नर्थ सत्यादिप्रतिपादनद्वारा यथोदीरितं निर्विशेषं ब्रह्म विधिमुखेन ल
क्षणया प्रतिपादयति॥ अथात आदेशो नेति नेत्यादिकं तु व्यतिरिक्तसकलनिषेधेन प्रपंचव्यतिरेकावच्छिन्नं व्यतिरेकमुखेना द्वि

यस्मादेतन्मनः स्वस्वं व्यावृत्तं सर्गगोचरं॥ ६५॥

यत्तद्व्यतिरेकविनिर्मुक्तं तत्स्वरूपं लक्षयति॥ न चेदृशस्य वेदांतवाक्यस्याज्ञाततज्ञापनत्वेनोक्तं विधिरूपत्वाद्विधौ लक्षणा न
न्यायेति॥ स्थितेस्तत्र लक्षणा न युक्तेति वाच्यं॥ प्रतिनियतत्वावार्थस्यागमनिविधौ लक्षणास्वीकारे लक्ष्यार्थस्यानियतत्वादनेकते
न संदेहः स्यादित्यभिप्रायेणाहि विधौ लक्षणान्यायक्रत्वे तत्पन्न तु मुस्यान्तरेण संदेहो निवार्यते तत्र विधावपि धावपि॥ ल

लक्षणेन दृश्यतिपाइमेन वेद्यं बहिर्वेदेति॥ एवमत्रापि व्यतिरिक्तसकलनिषेधादनेकत्वसंदेहाभावात्परिशेषेणानन्दस्यैवलक्ष्यत
सिद्धेर्विधावपि लक्षणेन दृष्टा॥ न च लक्ष्यत्वविशिष्टस्यैव ग्रहणान्निरुपाधिकस्य शास्त्राविषयत्वमिति मंतव्यं॥ लक्ष्यस्वैव स्वोपलक्ष
णत्वेन ग्राह्यकोटावननुप्रवेशात्॥ अतो न वागविषयत्वोक्तिरनिधार्ह्यममिमिप्रायात्र एवोपनिषदेकवेद्यत्वमाम्नायाम्नातं
॥ तं त्वौपनिषदं पुरुषं पृच्छामीति विधिनिषेधमुख्यवाक्यद्वैविध्यात्तज्जनिता ब्रह्माकारमनोवृत्तिरपि द्वेधा भवति॥ तत्र विधिरूप
वाक्यजनिता मनोवृत्तिः स्वोपाध्यानबलेन निरूपाधिकं ब्रह्मविषयीकुर्वतीत द्वेषगमयति॥ न चैतान्निरुपाधिकस्य मनोवृ
त्त्यविषयत्वभंगः मनोवृत्तेरेवोपाधिमत्तावेनास्य सोपाधिकत्वात्॥ नाप्यवस्तुत्वं उपाधेरुपलक्षणत्वेन विषयकोटावव
ननुप्रवेशात्॥ एवं निषेधमुखेन प्रवृत्तवाक्यजनितमनोवृत्तिरपि समस्तोपाधिव्यतिरेकावच्छिन्नं तद्ब्रह्मगो
चरयंतीतरावच्छेदकं व्यतिरेकं स्वात्मानं चकतकरेजो न्यायेन निवर्त्तयति एतदेवाभिप्रेत्याम्नायते मन
सैवेदमाप्तव्यमिति॥६५॥

एवमुक्तरीत्या सोपाधिसंस्पर्शविधुरस्य निरस्तसमस्तोपाधिकस्यात्मनं न निर्विकल्पकस्य वाङ्मनसातीतत्वं सिद्धं॥ पराग्वस्तुविषयाणीन्द्रि
॥ पराग्वस्तुनिरूहेकासस्य ह निम्नाश्रद्धा निर्विषयायेषां तानि न योक्तानि॥ तथा चैव कठैराम्नायते॥ पराञ्चि खानि व्यतृणत्स्वयंभूरिति॥६६॥इ
तं यदप्रत्यवाङ्मनसातीतं तदद्वंद्वमद्वितीयं शीतोष्णादिसकलद्वंद्वनिर्मुक्तं वा अत एव निर्गुणं सत्यज्ञानानंदैकरसमेवंरूपं ब्रह्मस्वात्म
नावेन विदितं॥ ननु कथं तस्य वेदनं संभवति बुद्ध्यविषयत्वात्॥ नैष दोषः॥ व्यतिरेकावच्छिन्नं तद्विषयीकुर्वतामनसा अद्गूरविप्र

यस्माद्ब्रह्मगन्धादिस्वानिकर्मेन्द्रियाणि च॥ व्यावृत्तानि पराग्वस्तुविषयाणि स्वरोत्रमाः॥६६॥ तद्ब्र
ह्मानंदमद्वंद्वं निर्गुणं सत्यचिद्घनं॥ विदितात्स्वात्मरूपेण न बिभेति कुतश्चन॥६७॥

कर्षणव्यवस्थापयितुं ज्ञाक्यवद्यौस्योपपादितत्वात्॥ एवं ज्ञानेनाद्वितीयनिष्प्रपंचस्वप्रकाशचिदानंदब्रह्मात्मभावेनावस्थितो विद्वान्क
स्माच्चिदपि न बिभेति॥ नय हेनाःस्वातिरिक्तस्य वस्तुनो भावात्॥ न च वाच्योऽप्यर्थेक्षितो॥६७॥ उक्तब्रह्मविदोऽयन्फलमाम्नातं॥ एतं
ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमिति तदर्थं संगृह्णाति॥ एवमिति॥ योऽयमुक्तरीत्या गुरूपदेशात्क्रमे

स॰ रामगी॰
३४

णाद्वितीयब्रह्मात्मविस्त्रब्रह्मीभूतः अत्र तेन न स्पृष्टः साधुकर्मणा पुण्येन कृतेन वा असाधुकर्मणा पापेन न न परिलिप्यतात्मा नेमितिशेषः॥ मूलाज्ञा-
ननिविदृत्त्या नादित्यास्ति नस्य क्रियाकारकफलात्मकस्य प्रपंचस्यापि बाधितत्वात्॥ अज्ञानी हि मुमुक्षुर्विस्तारायां यदृच्छया नास्ति न क-
र्मकिरणत्वस्वयं प्रधिप्राप्तिस्वकृतपापफलं नरकप्राप्तिं च मनसा समलोकयन्॥ तामां विनेति॥ ज्ञानी तु नाविजन्मापादककर्मसंचय

एवं यस्तु विजानाति स्वगुरोरुपदेशतः॥ स साध्वसाधुकर्मभ्यां सदा न न परिप्लुतः॥६८॥ तस्यैव तापकरूपेण विज्ञान-
मखिलं जगत्॥ प्रत्यगात्मतया जानाति ज्ञानार्थैर्देहान्तवाक्यजात्॥६९॥

स्पृज्ञानाग्निना दग्धबाह्यविजन्मानावेन न तपतीत्यर्थः॥६८॥ स यएवं विद्वानेतेनात्मानं शृणुते इति वाक्यार्थमाह॥ तस्यैव तापके-
ति॥ तस्यैव प्रस्तूपिक्रियाविषयो मोक्षप्रपंचः॥ तापकानि साध्वसाधुकर्माणीति॥ एवं द्वैविध्येनावस्थितमपि सर्वं जगद् द्वितीय
ब्रह्मात्मैकत्वज्ञानाधिदिदृक्षुः स्वस्वरूपतयैव जानाति॥ नन्वस्माद्व्यतिरिक्तं किंचिदस्त्यतिये नासौ तथ्येन॥६९॥ रामः
३४

अन्यस्त्वमिह मुच्यते॥ क्रियाकारकलक्षणः सर्वोपि प्रपंचः स्वात्ममात्रतयैव तस्य नातीत्याह॥ कर्त्रेत्यादिना॥

फलं कारयिता कर्म करणं कार्यमास्तिकाः॥ सर्वमात्मतया जानाति प्रसादात्पारमेश्वरात्॥७०॥ प्रमाता च प्रमाणं च प्रमेयं प्र-
मितिस्तथा॥ सर्व०॥७१॥ नियोज्यश्च नियोगश्च साधनानि नियोजकः॥ सर्व०॥७२॥ भोक्ता भोजयिता भोगो भोग्योपकरणानि च॥ सर्व
०॥७३॥ ग्राहकश्च तथा ग्राह्यं ग्रहणं सर्वतोमुखं॥ सर्व०॥७४॥ अन्यथाज्ञानमज्ञानं संशयज्ञानमेव च॥ सर्व०॥७५॥ घटज्ञानं पटज्ञा-
नं कुड्यादिज्ञानमेव च॥ सर्व०॥७६॥ घटः कुड्यं कुसूलं च पटः पात्रं च पर्वताः॥ सर्व०॥७७॥ पातालाद्याश्च लोकाश्च सत्यलोकादयो-
पि च॥ सर्व०॥७८॥ ब्रह्मांडं नक्षत्रा नामंडानां शतकोटयः॥ सर्व०॥७९॥ समुद्राश्च नदाकाश्च नद्यः सर्वनिदाघ्नापि॥ सर्व०॥८०॥
मेरुमंदरहवर्षाश्च पर्वताश्च महत्तराः॥ सर्व०॥८१॥ वनानि वनदेशाश्च वन्यानि विविधानि च॥ सर्व०॥८२॥ हता वृक्षविविधाः लुपरू-
णगुल्मादयोपि च॥ सर्व०॥८३॥ आकाशादीनि भूतानि भौतिकान्यखिलान्यपि॥ सर्व०॥८४॥ शब्दस्पर्शादितन्मात्ररूपाणि स-
कलानि च॥ सर्व०॥८५॥ कृमिकीटपतंगाश्च हंसाश्चापि च जंतवः॥ सर्व०॥८६॥ पशवश्च मृगाश्चैव पन्नगाः पापयोनयः॥ सर्वमात्म-
तया जाति प्रसा०॥८७॥ मनुष्याश्चैव मानंगाश्च अश्वा उष्ट्राः खरश्चापि॥ सर्व०॥८८॥ यक्षराक्षसगंधर्वप्रमुखाः सिद्धकिन्नराः॥ सर्व०॥८९

कर्मदेवाश्च देवाश्च देवराजोथ विट्स्वराट् ॥ सर्व० ॥ ९० ॥ अहं च मद्भिन्नानि सर्वममकांश्च देहिनः ॥ सर्व० ॥ ९१ ॥ विष्णुर्विष्णुविभिन्नानि च
विष्णुनकाश्च देहिनः ॥ ९२ ॥ रुद्रो रुद्रविभिन्नानि च रुद्रनकाश्च देहिनः ॥ ९३ ॥ ईश्वरस्तद्विभिन्नानि च नदीयाः सर्वदेहिनः ॥ सर्व० ॥
९४ ॥ सदाशिव समाख्यश्च शिवस्तस्य विभिन्नतयः ॥ सर्व ॥ ९५ ॥ दिशाश्च विदिशाश्चैव सान्नन्तास्तत्र मण्डलाः ॥ सर्व० ॥ ९६ ॥ वा
सुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः ॥ सर्व० ॥ ९७ ॥ मत्स्यः कूर्मो वराहश्च नारसिंहोथ वामनः ॥ तद्रूपाश्च तथानि
तिसं० ॥ ९८ ॥ आश्रमाश्च तथा वर्णाः संकराविविधा अपि ॥ सर्व० ॥ ९९ ॥ निषिद्धं वा निषिद्धं च निषेधयोपि च ॥ सर्व
० ॥ १०० ॥ शरीरमिन्द्रियं प्राणो मनो बुद्धिरहंकृतिः ॥ १०१ ॥ कामक्रोधादयः सर्वे तथा शान्त्यादयोपि च ॥ सर्व० ॥ १०२
॥ जीवात्मा परमात्मा च तयोर्निर्देश्यभेदकः ॥ सर्व० ॥ १०३ ॥ जडशक्तिप्रभेदाश्च चिच्छक्तिस्तद्भिदापि च ॥ सर्व० ॥ १०४
आस्तिकाश्चेरिताश्चार्थनास्तिकाश्चेरिता अपि ॥ सर्व० ॥ १०५ ॥

नन्वेवंविधं सर्वं जगद्विदुषः स्वात्मतया मननीयं चेदात्मनः सविशेषात्वापत्तिरित्याशंक्याह ॥ आत्मना मेति ॥ स्वस्मिन्नारोपितप्र
पंचमनात्मकं साधनान्तरनिरपेक्षेण स्वयमेव प्रकाशमानं यस्साक्षिचिन्मात्रं स एवात्मा ॥ सत्त्वं तु जगद्दृश्यत्वाच्छुक्तिरूप्यवन्मि
थ्याभूतमित्यर्थः ॥ नन्वेवमात्मा स्वयंप्रकाशस्तर्हि विदुषामप्यसौ प्रकाशमान एवेत्यत्र न एवं सर्वे मुच्येरन्नित्यत आह ॥ तपि
स्वप्रकाशमपि तं त्वमहमिति शब्देन तदर्थविषयमनोवृत्त्या वाहंकारवैशिष्ट्येनैव जानन्ति लौकिकाः ॥ १०६ ॥ परमार्थतो निर

आत्मानममुराः स्वेन नासायो नातिसंततं ॥ तमेव त्वमहंशब्दप्रत्ययाभ्यां तु जंतवः ॥ १०६ ॥
आवहारे विजानंति न जानंत्येव तेर्थतः ॥ अर्थतश्चास्य वेत्तारो न विद्यंते गाःद्भुतः ॥ १०७
एवमात्मानमद्वैतमात्मानो वेद यः स्थिरं ॥

न समस्तोपाधिकमद्वितीयं चिन्मात्रस्वरूपं नैव जानन्ति व्यवहारे नित्यमद्वितीयत्वादेवास्यात्मनः परमार्थतो वेदितारो नै
व विद्यन्ते वेदनस्य प्रमातृप्रमाणादिभेदसापेक्षत्वात् ॥ १०७ ॥ नहि विद्वानपि कथं न वेदेत्यत आह ॥ एवमिति ॥ एवमु
क्तप्रकारेण श्रवणादिसाधनजनिततया निरस्तसमस्तोपाधिकब्रह्मात्मविषयमनोवृत्त्यावरणाज्ञानापनये सति अ
द्वितीयमात्मानं स्वरूपप्रकाशं नैव विद्वान् साक्षात्करोति ॥ एवं विदुषो यज्ज्ञानं प्रहर्षितो नाम्नो एतत्साम गायन्नास्ते इत्यादि

सू.सं.य.गी. ३६ त्मा सुवर्णज्योतिरित्यनेन॥ तदेतच्च प्रयोजनकथनेनोपपादितं श्रुतौ एतत्साम गायन्नास्त इति॥ सोयमित्यादिना॥ हाउ हाउ इत्यादि
सुवर्णज्योतिरित्यन्तं तत्साम तस्यायमर्थः॥ यदेतावन्तं कालं लोकेऽन्यो नोपपररूपं जगद्भिन्नमासीत्॥ तत्सर्वमहमेव तन्मन्त्रो
स्य किं विरहास्ति अहो३ इदं महदाश्चर्यं स्वप्रकाशचिल्लक्षणपरमज्योतीरूपोहमेव सर्वमभिजितवानीति॥ तत्साम गायन्निममर्थ
ममर्थमनुसंदधानो विद्वान् विक्षेपहेतोरभावाद् व्याकुलमास्त इत्यर्थः॥ ८॥ एतद्दृष्टान्तेनोपपादयति॥ तथेति॥ ९॥ प

सोयमर्थमिमं नित्यं गायन्नास्ते स्वतावतः॥ ॥ यथा नर्तनमीशस्य स्वभावाल्लोकरञ्जकं॥ तथा विद्याविनाहारव्यागीतिर्लो
कोपकारिणी॥ ९॥ अथैवाहि गुणारीगीतिर्लोकानां हितकारिणी॥ तस्यैवास्य गुरोर्गीतिर्लोकानां हितकाम्यया॥ १०॥ आत्म
कामस्य रुद्रस्य गीतिर्व्याख्यानलक्षणा॥ परोपकारिपकारिणी तद्गीतिरस्यास्ति सद्गुरोः॥ ११॥

रमेश्वरनर्तनवद्विद्गानमपि लोकरञ्जहेतुरित्युपपाद्य परतत्त्वप्रतिपत्त्युपायतामपि तस्य दृष्टान्तेनोपपादयति॥ यथै
वेति॥ आदिगुरोः परमेश्वरस्य कर्तरि षष्ठी॥ तत्कर्तृका गीतिः परतत्त्वव्याख्यानरूपा या ईश्वरगीतेति कूर्मपुराणे प्रसि
द्धा॥ सा यथा॥ परतत्त्वोपदेशेन गीतिर्लोकोपकारिणी॥ एवमस्य विदुषो गीतिरपि परतत्त्वप्रतिपादनेन जगदनुग्रहाये रामः
त्यर्थः॥ ११॥ ३६

न चायमुपदेशो वाक्यान्तरादपि प्रसिद्ध इति विदुषो गानमयुक्तमित्यत आह॥ लौकिकेति॥ १२॥ व्याख्यागाने इति॥ मस्त्र

लौकिके ह्यपि गाने तु प्रसादं कुरुते शिवः॥ किं पुनर्वैदिके गानेन तोगानं समाप्यते॥ १२॥ व्याख्यागा
नेयथाशोक्तस्कशिवप्रदिश्यप्रतक्षितः॥ लौकिकीमपि वा गीतिं कुर्यान्नित्यमतन्द्रितः॥ १३॥ गीतिज्ञानं
शिवप्राप्तः सुतरां कारणं भवेत्॥ १४॥ गीतिज्ञानेन योगस्यापद्योगाद्देवशिवेक्षणा॥ १५॥ गीतिज्ञो यदि योगेन न
याति परमेश्वरं॥ प्रतिबोधकबाहुल्यादेनमापश्चिन्नामवेद्विजः॥ १६॥ अतस्तु संसारविनाशने रतः
श्रुतिप्रमाणेन च तर्कवर्त्मना॥ प्रबोधमासाद्य शिवस्य तं पुनः सदैव गायन्विचरेदिमां महीं॥ १७॥

तत्रार्थरूपं गद्यपद्यात्मकं व्याख्यागानं॥ तत्र देशीप्रभाषया परमेश्वरविषया गीतिर्लौकिकी॥ १३॥ श्रुतीत्युपनि
षदिति॥ १७॥

सू.ब्रह्मगी. ३७ यदिदं ब्रह्मविद्यानिगमनं तत्संगृह्णाति॥ इत्यादिना॥ अनेन यथोक्तप्रकारेण परतत्वविषयाऽऽउपनिषदुपदिष्टा उपनिषन्नाम ब्र-
ह्मविद्या प्रत्यगात्मानं निरस्तसमस्तोपाधिकं ब्रह्मोपनीय नेदं त्वमहेतुभूतमविद्यां तत्कार्यं च निवर्त्तयतीति तच्छब्दकृत्य-
त्रैः॥ उक्तं ह्याचार्यैः॥ उपनीयेममात्मानं ब्रह्मापास्तद्वयं यतः॥ निहंत्यविद्यां तज्जं च तस्मादुपनिषन्मता॥ २॥ ॥

इत्युपनिषत्परतत्वविषया कृत्स्नदुरितासकलदुःखविनिर्हंत्री॥ कष्टरुद्रयस्य मनुजस्य न च दे-
या न भक्तिसहितस्य तु शिवस्य खलु देया॥ ८॥ ॥ इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभव-
खंडे ब्रह्मगीतासूपनिषत्सु तृतीयोध्यायः॥ ॥

इति श्रीकाशीविलासक्रिपरमभक्तश्रीमत्र्यंबकपादाब्जसेवापरायणेनोपनिषन्मार्गप्रवर्त्तकेन माधवाचार्येण विरचितायां सू- राम:
तसंहितातात्पर्यदीपिकायां यज्ञवैभवखंडे उपरिभागे ब्रह्मगीतासूपनिषत्सु ब्रह्मविद्याख्यायो तृतीयोध्यायः॥ ३७

एवमैतरेयकतैत्तिरीयकयोरपि ऐदंपर्यं प्रतिपादितं॥ अथ सामवेदोपनिषदो ब्रह्मात्मैकत्वपरत्वं वक्तुमारभमाणस्तावत्केनेषितमिति-
त्याम्नातयोपनिषदर्थं संगृह्णाति चतुर्थेनाध्यायेन यथोदीरितं ब्रह्मात्मत्वमुपदेशगम्यं वक्तुं तत्कर्तृगम्यमिति॥ अमुमर्थं द्योत-
यितुं कस्यप्रश्नप्रतिवचनाभ्यां ब्रह्मोपदिश्यते केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः केनेषितां वाचमिमां
वदंति चक्षुः श्रोत्रं क उ देवो युनक्तीति प्रश्नः॥ श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणश्चक्षुषश्चक्षु-

ब्रह्मोवाच॥ अस्ति देवः स्वतःसिद्धः साक्षी सर्वस्य सर्वदा॥
संसारार्णवमग्नानां साक्षात्संसारमोचकः॥ १॥

रिति प्रतिवचनं॥ तदेतदुभयमर्थतः संगृह्णाति अस्ति देव इत्यादिना॥ स्वतःसिद्ध इति प्रामाणिकं पारमार्थिकं सत्य-
त्वं विवक्षितं॥ साक्षीति॥ स्वपरव्यवहारहेतुभूतं चित्प्रकाशरूपत्वं साक्ष्यप्रपंचानंतत्वं निर्विकल्पकूटस्थनित्यत्वं च॥ २॥ सर्वेषा-
मिति॥ तेन सर्वसाक्षित्वेन स्वतंत्रेण परमेश्वरेण सर्वप्राणिहृदयं जीवभावेनानुप्रविश्यावस्थितेनेच्छामात्रात्प्रेरितं प्रव-
र्त्तितं सत्स्वविषये मनश्चेमनः प्रवर्त्तते॥ न च देहेंद्रियादिसंघात एव तत्प्रेरक इति वाच्यं॥ तस्य प्रसिद्धत्वेनोपदेशवैय-

मू: भ.गी.
३८

र्थ्यप्रसंगात्॥ अनन्तरं व्यतिरिक्तेन चिन्मात्रज्योतिषा केन चित्प्रेरितमेव मनः स्वविषयं प्रत्यायतनीति युक्तमस्य रूपं तु॥ प्राणापानादिपंचवृ
त्त्यात्मको मुख्यप्राणश्च तेन प्रेरित एव प्राणो दिनचेष्टां करोति॥ तथा सर्वत्र इत्यव्यवहारहेतुभूतं वागिंद्रियं दमपि चिन्मात्रस्वरूपे
णेतेन प्रेरितमेवाभिवदनरूपं स्वकार्यं करोति॥२॥ चक्षुः श्रोत्रयोरप्येवं योज्यं स्वनानीति॥ उक्तव्यतिरिक्तानि बुद्धींद्रियाणि कर्मे

सर्वेषां तु मनस्तेन प्रेरितं नियमेन तु॥ विषये गच्छति प्राणचेष्टते वाग्वदत्यपि॥ चक्षुः पश्यति रूपाणि श्रोत्रं शब्दं शृणोत्यपि॥ अन्यानि
खानि सर्वाणि तेनैव प्रेरितानि तु॥३॥ स्वं स्वं विषयमुद्दिश्य प्रवर्तन्ते निरंतरं॥ प्रवर्तकत्वं चाप्यस्य मायया न स्वभावतः॥४॥

न्द्रियाणि चेत्यर्थः॥४॥ ननु गोदासीनस्य कूटस्थनित्यस्य निस्तरंगसमुद्रकल्पस्य चिन्मात्रस्वरूपस्यात्मनः कथमिदं विधप्रेरक
त्वं संभवतीत्यत आह॥ प्रवर्तकत्वमिति॥ माययेति॥ सत्वप्रधानमायापरिणामरूपदेहेंद्रियाद्युपाधिसंपर्कवशेनेत्यर्थः॥४॥ राम:
३८

ननु प्रेरकस्यात्मनस्तत्वतोऽन्यत्वेऽयं मनस आदिकमिति दिना पतिर्जायेतेत्यत आह॥ इंद्रियाणामिति॥ मनः प्रभृतीनामिंद्रियाणां सद्रूपेण स्थि
त्यध्यस्तत्वात्मप्रायाः पिंडन्यायेनाधिष्ठानसत्वमेवारोपितेषु मनः प्रभृतिषु धर्मत्वेन प्रतिभातीति॥ न चैतेषां स्वाभाविकं सत्वमस्तीत्यर्थः
॥५॥ एवं मनस आदिकं पश्येच्छामात्रात्स्वस्वव्यापारे प्रेर्यते स किंरूप इति प्रश्नो नुक्तोप्यर्थादेव गंतव्यः॥ अस्य चोत्तरमाह श्रोत्रमिति॥ श्रोत्रं
तावदिंतरमपंचकैवद्रूपतास्तर्वाधिष्ठानतत्वेनाभिव्याप्तस्यात्मनस्त्वमस्तमित्यविवादं तच्च श्रूयते च्छ्रुतेनेकस्राव्यश्रवणसाधनमिंद्रियम
धिष्ठानतेनात्तरं तु प्रविश्य स्वप्रकाशचिद्रूपः परत्वात्तस्य श्रोत्रत्वं श्रवणसाधनसामर्थ्यमर्पयतीति॥ सर्वांतरप्रकाशात्मचैतन्यो

इंद्रियाणां तु सत्वाच नैव स्वाभाविकी मता॥ न मायापिंडवत्तस्य सत्वयैवसुरर्षभाः॥५॥ श्रोत्रमात्मानि चा
ध्यस्तं स्वयं देवो महेश्वरः॥ अनुप्रविश्य श्रोत्रस्य ददात्यपि तिश्रोत्रतीह तः॥६॥ मनस्यात्मनि चाध्यस्ते प्रवि
श्य परमेश्वरः॥ मनस्त्वं तस्य सत्वस्थो ददाति नियमेन तु॥७॥

तिः समवधाने न हि तत्स्वविषयशब्दाभिव्यंजनसमर्थं भवति श्रोत्रं तस्मात् श्रवणसामर्थ्यप्रदानात्तथाविधं सर्वांतरं चैतन्यं श्रो
त्रमिति निर्दिश्यते॥६॥ एवं मनस्यात्मनि इत्यादावपि योज्यं॥ सत्वस्थ इति॥ कार्यस्यांतःकरणेऽनुगतत्वात्कारणभूतं सत्वं तस्य चैतन्यप्रका
शाभिव्यंजनसामर्थ्यात्तेनात्मनेत्यर्थः॥ मननसामर्थ्यं युक्तं हि मनस्तत्सामर्थ्यमुदीरितरितस्तस्य चैतन्येन धायनं॥ इति तन्म
नसो मनस्त्वप्रदत्वेन॥७॥ वाचो वागिति॥ आत्मन्यध्यस्तं वागिंद्रियमनुप्राप्य तत्सत्वप्रधानेनाभिवदनसामर्थ्यरूपवा

म॰ आत्मग॰ ३९ र्कं प्रवर्तत इत्यर्थः॥ तथा त्वात्मस्थस्त्र स्वपं चरन्तैः प्राणस्यापि प्राणेन नादिक्रियासामर्थ्यरूपं प्राणत्वं प्रयच्छति॥ अत एवाम्नायते॥ कु
र्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति॥ मध्ये वामनमासीनं विश्वेदेवा उपासत इत्यादि॥ चक्षुषश्चक्षुरुपस्तथेति॥ यथा श्रोत्रस्य श्रोत्रस्य श्रो
त्रत्वेन थ इत्यर्थः॥८॥ श्रोत्रग्राह्यत्वात्मस्य पलक्षणं यत्वादेनाश्रोतेन्द्रियसंग्रहायाह॥ अत्येषामिति एवं श्रोत्रादिकल्पनास्वरूपकल्पि
तानां च तेषां श्रवणादिसामर्थ्यप्रदं सर्वान्तरं चिदेकरसं ब्रह्मेत्युपदिष्टं॥९॥ न चेदृशं वस्तु ध्यानादि विद्धि विक्तयास्पष्टं कस्मात्तु

चक्षोर्वाक्यमनुप्राप्य प्राणस्य प्राणतां हरः॥ दृष्टानि निषमे नैव चक्षुद्वं चक्षुषस्तथा॥८॥ अन्येषामिन्द्रियाणां तु कल्पितानां
मनीश्वरः॥ तत्रूपमनुप्राप्य दृष्टानि निषमेन तु॥९॥ न तत्र चक्षुश्च वाक् च मन प्राप्तानि खानि च॥ न गच्छन्ति स्वयंज्यो
तिः सत्त्वाचेऽपरमात्मनि॥१०॥

रूपतः स्वीमामारोपितं निरसितुमाम्नायते॥ न तत्र चक्षुर्गच्छति नो मन इति तत्संगृह्णाति॥ न त्वेति॥ वाक्केति शब्दाजनकमिन्द्रियं तन
दृष्टिविष्यः शब्दः श्रोत्रमनतत्र वाक् शब्दे न विवक्षितं॥ तस्मादेतानि च चक्षुरादीनि ब्रह्मणि मायया अध्यस्तत्वात् कल्पितानि॥ अ
नःस्वात्मत्वेन ब्रह्मणि कथं तेषां प्रवृत्तिर्विषयविषयीभावस्य भेदसापेक्षत्वात्॥ तद्विषयत्वासमर्थनायाह॥ स्वयंज्योतिरि राम॰ ३९
ति॥ प्रकाशचिद्रूपस्य सर्वान्तरस्य चक्षुरादिकरणं प्रति साक्षिणस्तद्विषयत्वानुपपत्तिरित्यभिप्रायः॥१०॥

एवं चक्षुरादिसर्वप्रमाणाविषयं परब्रह्मवस्तु रूपमागमोपिकं प्रत्याययेदित्याशंक्य विदितादविदितव्यतिरेकात् वच्छिन्नं तत्प्रतिपा
दयितुं शास्त्रमिन्यभिप्रत्याम्नायते॥ अन्यदेव तद्विदितादथो अविदितादधीति॥ तत्संगृह्णाति॥ स इति॥ श्रोत्रस्य श्रोत्रमित्या
दिनानिर्दिष्टः श्रवणादिसामर्थ्यप्रदोयः सर्वान्तरः स्वप्रकाशः साक्षी चिद्रूप आत्मा॥ स विदितादिदिक्रियाफलव्याप्तादि प
यादन्यो विलक्षण॥ तथा अविदितादज्ञायमानादपि विलक्षणः स्वयंप्रकाशमानत्वादिदं विदितात्मामन्यत्वेन नागमप्रमाणत्य
तिपत्तुं शक्य इत्यर्थः॥११॥ एवमात्मन्युपदिष्टेपि तत्तो न्यदेव किंचिदुपासनीयं ब्रह्मेति शिष्यशंकानिरासार्थमाम्नायते॥
यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥ यन्मनसा न मनुते येनाहुर्मनो मतं तदेव ब्र
ह्म॥ तं विद्धि नेदं यदिदमुपासते॥ यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति तदेव ब्रह्म॥ तं विद्धि॥ नेदं यदिदमुपासते॥

स देवो विदितादन्यस्तथैवाविदितादपि॥ वाचा च मनसा चैव चक्षुषा च तथैव च॥११॥ श्रोत्रेणापि सुरश्रेष्ठाः प्राणेनान्येन केन
चित्॥ न शक्यो गोचरीकर्तुं स त्वमेवामयोदितं॥१२॥ यस्मादमखिलं नित्यं गोचरं रूपवद्वेः॥ तदेव परमं ब्रह्म विद्धि॥ यूयं॥ मन
नं॥१३॥

यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति तदेव ब्रह्म॥ तं विद्धि॥ नेदं यदिदमुपासते॥ यच्छ्रोत्रेण न शृणोति येन
श्रोत्रमिदं श्रुतं तदेव ब्रह्म त्वं विद्धि॥ नेदं यदिदमुपासते॥ यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते॥ तदेव ब्रह्म त्वं विद्धि नेदं
यदिदमुपासत इति॥ तत्संगृह्णाति॥ वाचा चेति॥ पूर्वाङ्गादिनिरिन्द्रियैर्विषयीकर्तुं मात्रशक्यं विदितादविदितात्मामन्यत्वे
न निर्दिष्टं स्वप्रकाशसाक्षिचिद्रूपं॥१२॥ यस्य च सर्वान्तरस्यात्मनश्चित्प्रकाशेन वाङ्मनसानीन्द्रियाखिलं जगत्स्वयंप्र
काशसाक्षिचिद्रूपं॥ रूपमिव प्रकाश्यते॥ स व्यापारे प्रेर्यते च तदेव च सर्वान्तरं ब्रह्म त्वं विद्धि॥ जानीत॥ न तस्माद
न्यदिदंकारास्पदमित्यविकारार्थः॥१३॥

णइंद्रियादिविविक्तस्य तत्साक्षिणः प्रत्यगात्मनः शुद्धस्वरूपतत्त्वज्ञानमुपदिश्य तस्य फलमाम्नायते॥ अतिमुच्य धीराः प्रेत्यास्माल्लो
कादमृता भवंतीति तदर्थश्रुतेः॥ एवमिति॥ धीमंतो विद्वांसः॥ एवमुक्तप्रकारेण देहेंद्रियादिकमात्मनो विविच्य तेनो विविक्ते
मद्वितीयं ब्रह्मात्मतत्त्वं प्रमाणेन कार्त्स्न्यं गुरूपदेशद्वारेणाधिगमनं तन्निदिध्यासनेन जनितं निर्विचिकित्सं साक्षात्कारलक्षणेन
स्वानुभवेन ये जानंति ते अमृतत्वलक्षणां मुक्तिं प्राप्नुवंतीत्यर्थः॥२४॥ इत्थं स्वात्मतयोपदिष्टस्य ब्रह्मणो वागातिसमर्थं शिष्य
स्याहं मा ब्रह्म जानामीति कर्मकर्तृभावलक्षणेन ज्ञानेनास्य वस्तुविषयत्वं प्रतिपादयितुं तथाविधभेदबुद्धिनिर्मुक्तम
खंडैकरसं ब्रह्मात्मतत्त्वं स्वरूपप्रकाशेनैव ज्ञेयं ज्ञानविषयं गुरुशिष्ययोर्न क्लिष्टकल्पिरूपेण श्रुतिः प्रवदते॥ यदि म

एवं जानंति ये धीरास्तर्कतन्त्रप्रमाणतः॥ गुरूक्त्या स्वानुभूत्या च भवंति खलु ते ऽमृताः॥२४॥ सुज्ञानमि
ति न ब्रह्म मनुध्वं यदि हे सुराः॥ दभ्रमेव हि तत्साक्षि ब्रह्म वेद्यं कथं न वेद्यकं॥२५॥

न्यसे सुवेदेति तत्प्रतिवचनरूपं शिष्यवाक्यं तदेति॥ दहरमेवापि नूनं त्वं वेत्थ ब्रह्मरूपमिति गुरुवाक्यं॥ नाहं मन्ये सुवेदेति नो न वेदे
ति वेद च इति तत्प्रतिवचनरूपं शिष्यवाक्यं तदेतदुभयं संक्षिप्य तमर्थं संगृह्य ब्रह्मणो देवात्मकपरिच्छेदाभि॥ सुज्ञानमिति॥ हे देवाः यूयं
स्वात्मभूतं ब्रह्म सुज्ञानं सुष्ठु अस्माभिर्बुद्धिवृत्त्या विषयीकृतमिति यदि जानीथ॥ तदा अवच्छिन्नस्य तावत् न ब्रह्म बुद्धिवृत्तिपरिच्छे
द्यमल्पमेव न वेत्थ॥ तथा च॥ वस्तुगोचरमेव ज्ञानं स्यादित्यर्थः॥ तथाविधबुद्धिवृत्तेः साक्षित्वेन भासकं तद्ब्रह्म कथं तत्प्रका
श्यत्वेन तत्प्रकाशात्मरूपस्य ब्रह्मणो वेद्यत्वासंभवाद्बुद्धिवृत्तिवेद्यं सोपाधिकमेव रूपं न तु निरूपाधिकमिति वेद्यस्य दभ्र
त्वं॥२५॥ रा॰म॰ ४०

यस्य खलु तद्ब्रह्मविविक्तिपाजन्यफलमागतं मंतरेणैव स्वात्मतया प्रत्यक्साक्षिरूपेणैव स्वात्मतया प्रत्यक्साक्षिरूपेण विदितं तत्स्व
रूपप्रकाशेनैव भानं भवति स च प्रकाशो नित्य इति नैव प्रतिकर्तृत्वमपि नास्ति तस्य विदुषस्तदनवच्छिन्नं निरस्तसमस्तोपाधिकं ब्रह्मज्ञानं
भवति॥२६॥ शिष्याचार्यसंवादेन निर्णीतमर्थं श्रुतिरबाधारयति॥ यस्यामतं तस्य मतं मतं यस्य न वेद सः॥ अविज्ञातं विजानतां विज्ञातम
विजानतामिति तां संगृह्णाति॥ यस्येति॥ यस्य साधकस्य नैश्चात्म्यभूतं ब्रह्म अमतं मनोवृत्त्या ऽविषयीकृतं केवलस्वरूपप्रकाशेनैव प्रकाशितं तत्

यस्य स्वात्मतया ब्रह्म विदितं कर्मतां विना॥ तस्य तज्ज्ञानकर्तृत्वविहीनस्य मतं हि तत्॥२६॥ यस्यामतं तस्य
मतं मतं यस्य न वेद सः॥ अविज्ञातं विजानतां विज्ञातमविजानतां॥२७॥ ब्रह्मज्ञाने घटज्ञाने भ्रां
तिज्ञानेपि चास्ति कः॥ नैव कर्तृ न कर्मापि ब्रह्म चित्केवलं नतत्॥२८॥

स्य न ब्रह्म मतं ज्ञानं भवति॥ यस्य तु तद्ब्रह्म मतं मनसा विषयीकृतं तेनासौ तत्कानानि तस्मात् तद्ब्रह्म वयं जानीम इति तु स्वरूपप्रकाशेनैव तज्ज्ञा
तं भवतीत्यर्थः॥२७॥ ननु यस्य खल्वमतं तत्कथं तस्य मतं तस्मात्परस्परविरोध इति बुद्धिवृत्तिविशिष्टरूपेण जानतां मननगतमेव भवति॥ बु
द्धिवृत्त्यवच्छिन्नतां विरुद्धत्वादित्याशंक्य मतत्वामतत्वयोरविरोधार्थं प्रतिपादनं समर्थयितुमाम्नायते॥ प्रतिबोधविदितं मतमिति॥ बुद्धिवृ
त्तयो बोधाः सर्वास्वपि वृत्तिषु तद्भासकसाक्षिरूपेणावच्छिन्नमनुगतस्वप्रकाशचैतन्यं प्रकाशत्वमिति विचारात्मतया मितस्फुरत इति श्रुतेरि

त्यर्थमिथ्यात्वं संपत्स्यतीति॥ ब्रह्मेति॥ परेण श्रवणमननादिसाधनजनितनिरस्तसमस्तोपाधिपरमार्थब्रह्मविषयं ज्ञानं॥ यच्च व्यावहारिकसत्य घटादिविषयं चक्षुरादीन्द्रियसंयोगजनितं ज्ञानं॥ यच्च प्रातीतिकसत्यशुक्तिरूप्यादिविषयं भ्रांतिज्ञानं तेषु सर्वेषु ज्ञानेषु निरुपाधिकं

यस्य कर्तृतया ज्ञातं ब्रह्मलोकपतिर्गुरोः नस्य ब्रह्मात्मतं यस्याकर्मितस्य मतं हि तत्॥२०॥ अकर्तृविषयं यस्य कः प्रकाशः स्वात्मने वस्तु॥ विना न कश्चित्प्रमाणेन मां ब्रह्म यो वेद सः॥२१॥ एवंरूपपरिज्ञानमपि दृश्यतये वस्तु॥ यस्य ज्ञाति स नस्याज्ञो ब्रह्म न ब्रह्मात्मवित्कथं॥२२॥ ब्रह्मविद्यापि ज्ञाता चेद्वेद्या न वतिकं भवेत्॥ अवेद्यं ब्रह्म वेद्यविद्यापि संगमात्॥२३॥ वेद्यापि विद्या सर्वथा स्याद्विशेषो नवेक्ष्य वं निर्विशेषं परं ब्रह्म नो विद्यात्वात्मवित्॥२४॥ विद्याया आश्रयत्वेन विषयत्वेन वा भवेत्॥ ब्रह्म नैवात्मयात न च ब्रह्म भवेत्कथं॥२५॥

स्वात्मनूनं चिदेकरसं ब्रह्माविशुक्तिरूप्यादिविषयं भ्रांतिज्ञानं तेषु किंतु तस्य सर्वस्य साक्षितेन भासकं स्वप्रकाशज्ञानमेव केवलं न वेदित्यर्थः॥२५॥

एतदेव ब्रह्मणः कर्तृकर्मभावराहित्यमुपपादयति॥ ब्रह्मसंबंधेति॥ ननावदपरिच्छिन्नार्थप्रतिपादक ब्रह्मविद्धिक्रियस्यासंगस्य ब्रह्मणो विद्यां प्रत्याश्रयत्वं विषयत्वं वा संभवति॥ यथाविधधर्मत्वे नैव परिच्छेदापरिच्छिन्नार्थप्रतिपादक ब्रह्मशास्त्राभिधेयत्वमेव नस्य हीयते॥ अतो परिच्छिन्नस्य केनचिदपि पारमार्थिकः संबंधो दुर्निरूपः इति विद्याः परमार्थतो ब्रह्मसंबंधरहितैवेत्यंगीकार्यं॥ सा चेदेवंविधा तथा सति तयाविद्यया ब्रह्म वेदितुमशक्यं विहितक्रियाजन्यफलभागित्वादेव तस्य स्वयमेव तथाविधफलात्मके ब्रह्मण्येव ह्यरितक्रियाफलभागिता सनवाद्दनुपयोगा च॥ नहि परमार्थतो निरस्तसमस्तोपाधिकस्य स्वयंप्रकाशमानस्याधानाधेयातिशयस्य विद्यया कश्चिदुपयोगोस्ति॥ येन तत्कृत्य

ब्रह्मसंबंधहीना चेद्विद्या ब्रह्म तु वेदितुं॥ अशक्यं न तदेह देवाः को वा ब्रह्मात्मविद्भवेत्॥२६॥ ब्रह्मणएवध्यस्तमायाशिनिष्टक्रिंकरु तेनुसा॥ विद्याय दिनमावायः प्रत्यगात्मत्व संभवात्॥२७॥

फलभागितया न देयतास्यात्॥ तत्रैवमवेद्यत्वे सति को नाम ब्रह्मात्मविद्भवेत्॥ कर्मत्वकर्तृत्वलक्षणांधर्मसंबंधस्य पेक्षत्वाद्ब्रह्मात्मविद्यस्य अतो विद्याया कृत्योपाधिव्यतिरेकावच्छिन्न तयात्स्वात्मनूनं ब्रह्मसाक्षात्कुर्वन्वाऽन नसातीते स्वप्रकाशं ब्रह्मैव केवलं न वेत्॥ ननु ब्रह्मात्मविदित्यर्थः॥२६॥ एवं स्वप्रकाशो ब्रह्मणि विद्यया प्रकाशजनकत्वासंभवेपि तत्स्वरूपावरणविद्यानिवृत्तिजननद्वारा तत्संबंधमात्रं का निरस्यति॥ ब्रह्मणीति॥ प्रत्यक्त्वेन साक्षात्कृते परमार्थतो निरविद्ये ब्रह्मणि मायातत्कार्यसंस्पर्शस्यासंभवाद्विद्यानिवृत्त्यर्थाविद्यमेनदपि न विचारासहमित्यर्थः॥२७॥ एतदेवोपपादयति॥ स्वपरिशिनिप्रसिद्धानिजो नोषिते पाम पिचि

न्यकाशाश्रितं बंधवलेनैवप्रकाशकत्वमिति॥ तथाविधस्वप्रकाशचिदात्मा परंज्योतिः॥ श्रूयते हि॥ येन सूर्यस्तपति तेजसेद्धः॥ तमेव भांत
मनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति॥ परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति च॥ ज्ञानावरणमोवदाच्छादकत्वादविद्यमानस्य
नामरूपप्रपंचस्योपस्थापनाच्च मायानामाधिकं न मतं॥ सा च कथमुद्दीरितेन जगद्गुणं ब्रह्ममयेदिविषयीकुर्यात्॥ नहि प्रकाशमानं स्वयं नै
न मच्छादयति विषयीकरोतीत्यर्थः॥२८॥२९॥ ननु क्रमेण ब्रह्मस्वरूपे विद्यायाश्च किंचित्करत्वे॥ ब्रह्मविदाप्नोति परं ब्रह्म वेद ब्रह्मैव भवति

प्रत्यगात्मा परंज्योतिर्माया सा तु महत्तमः॥ तथा सति कथं माया संभवः प्रत्यगात्मनि॥२८॥ तस्मात्तर्कप्रमाणाभ्यां स्वानुभूत्या च चि
द्घने॥ स्वप्रकाशैकसंसिद्धे॥ नास्ति माया परात्मनि॥२९॥ व्यावहारिकदृष्ट्येयं विद्याविद्या न चान्यथा॥ तत्त्वदृष्ट्या तु नास्त्येव तत्त्वमेवास्ति
केवलं॥३०॥

॥ अपि परापयानरं त्वरमधिगम्यत इत्यादिश्रुतिसिद्धं विद्यायाः स्वरूपप्राप्त्युपायप्रतिपादनं व्याहन्येतेत्याशंक्या
ह॥ व्यावहारिकेति व्यवहारमात्रसिद्धं मायापरिकल्पितं प्रपंचमाश्रित्य हि प्रत्यक्षादिप्रमाणानि प्रवृत्तानि॥ अतो वेदोपि तदंतर्गतत्वा
द्व्यावहारिकदृष्ट्यैव विद्यायाश्चाविद्यानिवृत्तिद्वारा तत्प्राप्त्युपायत्वं नास्ति॥ अतो विद्याविद्याचेत्येतद्द्वयमपि व्यवहारदृष्ट्यैव॥ परमा
र्थदृष्ट्या तु द्वितीयस्वप्रकाशब्रह्मात्मकत्वमेवास्ति॥३०॥

एवं परमार्थतो ब्रह्मणो संगतत्वेन विद्यासंबंधाभावाद्ब्रह्मणि तरतमगोचराणां सर्वेषां बुद्धिवृत्तीनां यद्भासकं साक्षिस्फुरणं तत्परिशेषात्स्वप्र
काशमद्वितीयं चेति प्रबोधविदितं मतमिति श्लोकत्रयार्थं निगमयति॥ व्यावहारिकदृष्टिरिति॥ व्यवहारदृष्टेः पुरुषस्यापि घटपटादिविषयमनोवृ
त्तिषु सर्वत्र साक्षिचित्प्रकाशस्य भासकत्वेनाव्यभिचारित्वात्तदनुगतस्वपरव्यवहारहेतुप्रकाशस्वरूप एव प्रत्यगात्मा॥ तस्माद्व्यभिचा
रिणि चित्प्रकाशे ब्रह्मणि रज्ज्वाविद्रमेशोत्सर्पधारादिवद्व्यभिचारिदृश्यप्रपंचस्य परिकल्पितत्वेन मिथ्यात्वात्प्रकाशरूपं ब्रह्माद्वैतमेवेति
सिद्धमित्यर्थः॥३१॥ ननु अद्वैतमिति द्वैतनिषेधविशिष्टं ब्रह्म प्रतीयते॥ तथा च कथं निर्विशेषब्रह्मसिद्धिरित्यत आह॥ अद्वैतमि

व्यावहारिकदृष्टिस्तु प्रकाशाव्यभिचारतः॥ प्रकाश एव सततं तस्माद्द्वैतमेव हि॥३१॥ अद्वैतमिति चोक्ति
श्च प्रकाशाव्यभिचारतः॥ प्रकाश एव सततं तस्मान्मौनं हि युज्यते॥३२॥

ति॥ अद्वैतोक्तिरपि प्रकाशाव्यभिचारात् व्यभिचाराद्व्याप्यभिचारिचित्प्रकाशात्मनो ऐक्यरूप्यावगमादित्यर्थः॥ प्रकाश एवेति॥ प्रकाश
स्वरूपाद्यस्माद्द्वैतनिषेधस्य द्वैतत्वनिषेधस्याद्वैतं वस्तात्मनोप्यन्यव्यवसाम्येन स्वेनैव निवर्तनात्तन्निषेधविनिर्मुक्तः केवलं चित्प्रका
श एवावशिष्यते॥ स च स्वसत्तायां प्रकाशव्यतिरेकविरहितत्वात्स्वप्रकाश इति सततं तत्राप्यर्थः॥ एवं निर्विशेषचित्प्रकाशात्मनि ब्र
ह्मणि शब्देन मनसा च विषयीक्रियमाणे तत्तदुपाधिविशिष्टप्रसंगात्तूष्णीमवस्थानमेव विदुषः स्वरूपप्रतिपत्त्युपाय इत्युपसंहरति
॥ तस्मादिति॥ श्रोत्रादीनीन्द्रियाणि समनस्कानि विषयेभ्यो व्यावर्त्य निर्मुखे विक्षेपवासनाविनिर्मुक्ते प्रसन्नांतःकरणे सम्यक्प्रत्य

क्तेन स्वस्वरूपं ब्रह्म स्वयमेव प्रकाशत इत्यभिप्रायः॥ एतावतायस्यामतं तस्य मतमिति श्रुत्यर्थः॥ सम्यक् उपपादितो भवति॥३३॥ ननु मौ
नमात्रं चेद्ब्रह्मोपदेशः स च सर्वेषां सुलभ इति तत्सिद्ध्यर्थं न प्रयतितव्यमित्यत आह॥ यस्य श्रीशीति॥ नवपरंपरासु चक्रीश्च मथ धर्मशीलि
भिः परमेश्वरं समाराध्य समासादितेन तत्प्रसादस्य साधनचतुष्टयसंपन्नस्य कस्यचिदेव मुमुक्षोः पुरुषस्य महान् पुरुषार्थस्तौ नातिनी
रोयमर्थो जाति॥ नान्यस्येत्यर्थः॥३४॥३५॥ एतावमतं तत्वं हि विदितः इत्यादिना साधनांतरनिरपेक्षस्य यथोक्तज्ञानस्य यदमतं तत्प्रा

यस्य ज्ञादिप्रमाणैश्च तर्कैः श्रुत्यानथैव च॥ स्वगुरोरुपदेशेन प्र-देन शिवस्य तु॥३३॥ अङ्गीकृतैरपि धर्मैश्च कालपाकेन धार्मि
काः॥ अयमर्थो महान् एष मानिशंकरस्य गुरुषस्य तु॥३४॥ यस्य प्रकाशितः साक्षादयमर्थो महत्तरः॥ तस्य नास्ति क्रियाः सर्वा ज्ञानं
चाप्यक्षयं ब्रवन्॥३५॥ अयमर्थो महान् यस्य स्वतएव प्रकाशितः॥ न स जीवो न ब्रह्मा स न वान्यदपि किंचन॥३६॥ अयमर्थो
महान् यस्य स्वतएव प्रकाशितः॥ न तस्य वर्णा विद्यन्ते नाश्रमाश्च तथैव च॥३७॥ अयमर्थो महान् यस्य स्वतएव प्र
काशितः॥ न तस्य धर्मोऽधर्मश्च न निषेधो विधिर्न च॥३८॥ एतमर्थं महान्तं यः प्राप्तः शंभोः प्रसादतः॥ स शम्भुरेव नै
वान्य इति मे निश्चिता मतिः॥३९॥
पायतं प्रतिपादितं॥ तज्ज्ञानस्य यत्किंचिन्नेनेति विस्तरेणोति॥ यस्येत्यादिना॥ अहथवन इति॥ स्व
स्मनोऽद्वितीयब्रह्मसाक्षात्काराज्ञानकर्मणोः साधनभूतवस्त्वंतरप्रतिज्ञासमावादद्वितीयब्रह्मात्मनावस्थितस्य विदुषस्तज्ज्ञानं धिका
रस्त्यर्थः॥३९॥ न केवलमेतावदेव मेवदोपजीवनेन प्रवृत्तः सकलोपि व्यवहारस्तस्य न संभवतीत्याह॥ अयमर्थो महानित्यादि॥
पर्याये॥३६॥

श्रुतावान्मनाविंदतेवीर्यमिति॥ यद्विद्याप्रकाशितात्मस्वरूपेणैव विद्यातत्कार्यानिवृत्त समर्थं वीर्यं विद्यालब्धमतः श्रुतिप्रतिपादितं तद्दर्शयति॥ वैभवं त
स्येति॥ वैभवं महत्वं निर्वीर्यस्य महत्वासंभवात्तेन महत्वेन स्वकारणमूलं निरतिशयं वीर्यं लक्ष्यते धनसहायमंत्रौषधादिसाधनजनितं वी
र्यं हि नित्यवस्तुजनितत्वादमृतत्वव्यतिरिक्तस्यैव फलस्य साधनमिति तत्परिच्छेदं शक्यं॥ आत्मविद्याजनितवीर्यत्वं तथाविधमिती
श्वरोपि न तद्दशक्नोतीत्यर्थः॥ एषाममृतत्वसाधनभूतविद्यायुक्तत्वेनाश्चर्यविविदिषुद्वारेविद्यमानएवयत्नतः संपादनीया त

एतमर्थं महान्तं यः प्राप्तः शंभोः प्रसादतः॥ तस्याहं वैभवं वक्तुं न शक्तः सत्यमीरितं॥४०॥ एतमर्थं महान्तं यः प्राप्तः शंभोः प्रसाद
तः॥ वैभवं तस्य विष्णुश्च न शक्तो वक्तुमास्तिकाः॥४१॥ एतमर्थं महान्तं यः प्राप्तः शंभोः प्रसादतः॥ वैभवं तस्य रुद्रश्च न शक्तो व
क्तुमास्तिकाः॥४२॥ एतमर्थं महान्तं यः प्राप्तः शंभोः प्रसादतः॥ वैभवं तस्य वेदाश्च न शक्ता वक्तुमास्तिकाः॥४३॥ अस्मिन्देहे यदि
ज्ञातः पुरोक्तोर्थो महानयं॥ समाप्ताः सर्वपापानि निर्वाणि यान्ति मानवाः॥४४॥
स्मिन्नस्यपितद्संपादने पुरुषस्यात्यंतिकसं
सार एवेतिस्क निरधिकारिणं प्रत्यक्षपरिहरति॥ इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः इति॥ अस्याः श्रु
ते रर्थं श्रुते॥ अस्मिन्निति॥ अस्मिन्विद्याधिकारिणि मनुष्यादिशरीरे सत्येव यदि परमार्थं ब्रह्मरूपोर्थो यदि ज्ञातः स्यात्तदा
स विद्वान् परमार्थसत्यं निरस्तसमस्तोपाधिकमद्वितीयं ब्रह्मलक्षणं मुक्तिस्वरूपं प्राप्नोति॥

उक्तमर्थं व्यतिरेकमुखेनोपपादयति ॥ अस्मिन्निति ॥ यद्यस्मिंश्चिद्याधिकारिणि देहे सत्यप्यात्मस्वोपहनने तेन श्रवणमननादिसाधनानुष्ठानाद्वि
द्यया नावेन ब्रह्म मुक्तोऽर्थी न ज्ञानतः स्यान्न हानस्यानिरतिशयानन्दावाप्तिलक्षणपरमपुरुषार्थहानिर्भवति ॥ तथा च तस्य विदुषः संसारप्रवाहपातएव
वेति नैव कदाचिदपि मुक्तिः सिध्येदित्यर्थः ॥ ४५ ॥ एवमन्वयव्यतिरेकाभ्यां विविदिषुशरीरे विद्यायाः सोऽलम्यमभिधाय तत्फलमाभ्यापतेष्वन्तेर
पु विचिन्त्य धीराः प्रेत्यास्माल्लोकादमृता भवन्तीति ॥ वद्याच द्वे स्वशरीर इति ॥ ये नाम प्राज्ञाः स्वकीयशरीरे देहान्तरेषु स्वोपाधिषु घटशरावादिषु
च द्रस्वरूपविज्ञात्मैनावस्थिनमुदारिनजदृष्णब्रह्मात्मनत्वश्रवणमननादिभिः साक्षात्कृत्य धीराधैर्यवतो दृढनिश्चयाः संसारमयराहि

अस्मिन्देहे न विज्ञानतः पुरोक्तो ऽर्थो महान्परिहिः ॥ विनष्टिरेव महानीतस्यैव परागतिः ॥ ४५ ॥ स्वशरीरे स्वपरे हप्सु समं निश्चित्य तं दृढं ॥ अ
थधारान्न जायन्ते ह्यमृतास्त्वत्वं तिहि ॥ ४६ ॥ बद्धो मुक्तो महाज्ञानज्ञस्यादिभेदतः ॥ एक एव सदा नानिना नैव स्वभवक्तयं ॥ ४७ ॥

तावन्नन्ति ॥ ते पुनरेतद्देहपातानन्तरं न जायन्ते विद्यपासकजसंसारनिष्टमव्रता विद्यायाः सफलं निवर्त्तितत्वात् ॥ अपितु अनश्वरब्रह्मात्मक | राम:
त्वं गन्तीति ॥ ४६ ॥ न चैकस्यैवात्मनः स्वेतरसर्वशरीरेषु कथं साम्येनावस्थानं बद्धमुक्तादिव्यवस्थान्यथानुपपन्नातन्नानात्वस्यावश्यंपनावादि | ४५
त्याशंक्याह ॥ बद्ध इति ॥ यथा स्वप्रावस्थायामेजस अन्नेनैव महीमहीधरादिलक्षणस्वप्नेपदार्थरूपेणानेवाभासते ॥ तथैकएव चिद
त्मा स्वाविद्यापरिकल्पितोपाधिनानात्ववशेन बद्धो मुक्तो विद्वान् इत्येवमाद्योपाधिकविरुद्धधर्मसंसर्गितया नानेव भाति ॥ ४७ ॥

न चैवमात्मन एकस्मिंश्चिदुपाधौ केनचिद्दिद्ययात्मनि साक्षात्कृते सति अविद्यानिवृत्तायथैकस्यात्मनो मुक्तत्वे पुनरविद्यासंबन्धानुपपत्ते जीवस्य
पस्य सर्वस्य मुक्तिरयत्नतः सिद्धेत्याशंक्याह ॥ अत इति ॥ यत एक एवात्मा अतः श्रवणमननादिसाधनकलापमनुष्ठितवतो विदुषः स्वस्यमु
क्तेऽव स्वव्यतिरिक्तानात्मानात्मनीतवतास्वस्य स्वरूपमपि तत्रदंतः करणोपाधिपृथक्त्वमुक्तिसमयेतेषामपि मुक्तिमसौ विद्याज्ञानजानात्येव ॥ ४८ ॥ तथा
×तिविंबरूपेण दर्पणप्रतिबिंबितमुखवाभासवदाभासतया प्रतीयमाना नानात्मनीनवस्तास्वस्माद्व्यतिरिक्तत्वा× पितुस्वासंसारावस्थायांस्वस्व
त्मात्वाविद्यायास्वस्यान्येषां शारीरिणां च संसारमपि जानाति ॥ जोतिनिवृत्तो मुक्तिं च ॥ यथैव तयान्येष्वात्मा सरूपात्त्वात्मानः स्वसंसारद

अतः स्वमुक्तो वान्येषामात्मासानामपि धुवं ॥ मुक्तिं जानाति हे देवा आत्मनविद्वरः ॥ ४८ ॥ स्वसंसारदशायां तु स्वस्यान्यासर्वदेहिनां ॥ अ
भासानां च संसारं वेदमुक्तिं तथैव च ॥ ४९ ॥ प्रारब्धकर्मपर्यन्तं कदाचिच्चरमात्मवित् ॥ जगज्जीवादिकं वेद कदाचिन्नैव वेदतत् ॥ ५० ॥

शायां स्वयाविद्यया परिकल्पितसंसारं विद्योदयपर्यन्तं जानात्येवेति ॥ विद्वद्दशामुक्तेष्वपि विदुषां तेषां न संसारित्वनिवृत्तिरित्यर्थः ॥
४९ ॥ न चैवमविदुषां स्वाविद्यावशादस्य जगत्प्रतिभासः विदुषस्त्वविद्यानिवृत्तानकार्यस्यांजगतः प्रतिभासो नुपपन्न इत्य
त आह ॥ प्रारब्धेति ॥ कर्माणि द्विविधानि आरब्धफलान्यानारब्धफलानि च ॥ तत्रानारब्धफलवदारब्धफलानां ज्ञानं निवृत्तस
भावेन गेनोनोपवृत्तपयितव्यत्वात्तावत्पर्यन्तं कदाचित्फलभोगसमये तत्साधनभूतं भोक्तृभोग्यात्मकं जगदविद्वानपि जानाति
॥ कदाचिदद्वितीयब्रह्मात्मानुभवसमये तु नैव तज्जगज्जानातीत्यर्थः ॥ ५० ॥

न त्वविदुषवविदुषोपि जगत्प्रतीतिरस्तीति चेन्न तस्य को विशेष इत्याह॥ कदाचिद्ब्रह्मेति॥ यस्य वस्य प्रमस्यतं ब्रह्मणि॥ अथ अस्त तया प्रतीयमा
नमखिलं जगदस्ति नन्तत्सर्वं ब्रह्म जानाति आरोपितस्याधिष्ठानब्रह्मात्मनैव कदाचित्प्रतीतिसमये विद्वान् जानात्यर्थः कदाचित्संमाध्यवस्था
यां तु अधिष्ठानब्रह्मरूपात्मज्ञानेनारोपितस्य विलापनात्स्वात्मनो विष्णुपंचस्याभावादेव जगत्नैव जानाति॥ अतो विदुषोऽध्यस्तत्वेनैव
कादाचित्को जगत्प्रतिभासः॥ अविदुष इव न परमार्थत्वेन सार्वकालिक इत्यर्थः॥५२॥ जगज्जीवादीनि॥ यदा चैवं विदुषो विक्षेपसम
ये ब्रह्मबाध्यत्वोक्तभोग्यप्रपंचात्मनाभासते॥ तदाविदुषस्त्वोक्तन सुखाद्युपभोगोपि साधनवदाभासरूपयैव भोगोपि साधयति॥५३॥ य

कदाचिद्ब्रह्म जानाति प्रतीतमखिलं सुराः॥ कदाचिन्नैव जानाति स्वभावादेव तत्त्ववित्॥ जगज्जीवादिरूपेण यदा ब्रह्म विभासते॥
तदा दुःखादिभोगोपि भाति चाभासरूपतः॥५२॥ यदा ब्रह्मात्मना सर्वं विजानाति स्वतः एव तु॥ तदा दुःखादिभोगोयमाभासोपि न वि
भासते॥५३॥ जगज्जीवादिरूपेण पश्यन्नपि परात्मवित्॥ न तत्पश्यति सद्रूपं ब्रह्म वस्त्वेव पश्यति॥५४॥

दा तु समाधिसमये प्रतीतं सर्वं जगत्स्वकीयबाधावधिकं तत्त्वस्तात्मना ब्रह्मावशेषेण विजानाति॥ तदा दुःखसाधनस्य जगतो प्रतिभासात्
हेतुकः संसारदुःखादिरपि नैव तस्य प्रतीयत इत्यर्थः॥५३॥ न च विद्वानविद्वानपि सकलं जगद्दृष्टानुवृत्तं पश्यति तत्कुतस्तत्प्रति रामः
जगतः॥ आभासरूपत्वेन त आह॥ जगदिति॥ आरोपितं जगत्पश्यन्नपि अधिष्ठानसच्चिद्रूपपरमार्थब्रह्मात्मनैव पश्यति न तु ना ४५
मरूपात्मनेत्यर्थः॥५४॥

एतदेव ब्रह्मव्यतिरिक्तस्याद्वैतं विदुष उपपादयति॥ ब्रह्मण इति॥ वस्तुतस्तावद्ब्रह्मव्यतिरिक्तं नास्ति नेह नानास्ति किंचनेति॥ श्रुतेः॥ अवस्तु
तोपि नैवास्ति अवस्तुनस्तस्य सर्वस्य जगतस्तत्स्वरूपेऽध्यस्तत्वेन तदनन्यत्वनियमात्॥ एवं च विद्वान् पश्यन् शिवव्यतिरिक्तं कथं जानाति इत्य
र्थः॥५५॥ अतो विदुषः सर्वदा ब्रह्मज्ञानमेवेति निगमयति॥ ब्रह्मरूपेणेति॥ अधिष्ठानब्रह्मरूपेण वा आरोपितभोग्यत्वोक्तप्रपंचात्मना वा यथा
यथा विदुषः॥ व्यथा प्रतिभानं ज्ञानं भवति॥ तथा तथा साक्षाद्ब्रह्मैव तस्य भातीति संबंधः॥५६॥ उक्तरीत्या सर्वं जगद्भवभासोपि विदुषः समाध्यवस्था

ब्रह्मणोन्यत्सदा नास्ति वस्तुतो वस्तुतोपि च॥ तथापि शिवादन्यत्कथं पश्यति तत्त्ववित्॥५५॥ ब्रह्मरूपेण वा साक्षाद्भोक्तृगज्जीवात्मनापि वा॥
यथा यथा साक्षाद्ब्रह्म भाति तथा तथा॥५६॥ यथा यथा भासोयं स्वभावादेव भासते॥ तथा तथानुसंधानं योगिनः स्वात्मवेदनं॥५७॥ नाम
तस्यार्थतश्चापि महादेवो यदि प्रभुः॥ किं जहाति तथा विद्वान् किं गृह्णाति सुरर्षभाः॥५८॥ अयं ब्राह्मणकारस्य स्याज्ज्यवायदि विद्यते॥ मह
वतस्य हायतस्य नावो न विहन्यते॥५९॥ नो न विशिष्यत इत्यपसह इति तत्र ते ति॥५७॥ महादेवश्चार्थपर्यालोचनयापि न विदुषः
स्वस्मादन्यत्किंचिद्धेयमुपादेयं॥ वा संभवतीत्याहा नामत इति॥५८॥ महत्त्वं तस्येति त्रिविधपरिच्छेदराहित्यं हि तस्य महत्त्वं तस्मात्सर्वप्र
त्यगात्मस्वरूपाच्छिवादन्यस्मिन्हेयोपादेयवस्तु निस्त्रीक्ष्यमाणे विहन्यते इत्यर्थः॥ इष्टापत्तिशंकां निवारयति॥ भावनेति॥ न हि महत्त्वे
परमेश्वरस्य स्वरूपनचतद्धि हेतुं युष्मत्तेतस्यैवाभवप्रसंगादित्यर्थः॥ ॥ ॥

सू॰ ब्र॰लग॰ नतु महत्त्वं परमेश्वरस्य न स्वभावः अपि तु तत्स्वधर्मः इति नोक्तदोषापत्तिरित्याशंक्याह ॥ महत्त्वं नैवेति भेदाभावादिति ॥ परमात्मनः एकमेवाद्वितीयमिति
४६ स्वगतसजातीयभेदनिरासस्य श्रुत्या प्रतिपादितत्वात् ॥ प्रत्यक्षादिप्रमाणानां च ग्रहणासामर्थ्यस्य दृष्टमेधायै प्रागुपपादितत्वाच्चेत्यर्थः ॥ ध
र्म्यधर्म्मित्वेति ॥ नहि स्वयमेव स्वस्य धर्मो भवतीति धर्मधर्म्मिभावो नियमेन भेदसापेक्ष इति व्यापकभेदाभावान्न धर्मधर्मिभा
वोपि न संभवतीत्यर्थः ॥ ८ ॥ ननु उक्तन्यायेन स्यात्मनो भेदो नास्ति चेत्स्वप्रपञ्चनात्मलक्षणैः भेदः प्राप्नोतीति सविशेषत्वं ब्रह्मण इत्या

महत्त्वं नैव धर्मोस्ति भेदाभावात्परात्मनः ॥ धर्मधर्म्मित्ववार्त्तैव भेदे सति हि विद्यते ॥ ८ ॥ भेदो भेदरहस्याद्वै दाभेदः साक्षात्परात्मनः ॥ नास्ति
स्वान्यातिरेकेण स्वयमेवास्ति सर्वदा ॥ ९ ॥ ब्रह्मैव विद्यते साक्षाद्वस्तुतो वस्तुतोपि च ॥ तथा सति शिवज्ञानी किं त्यक्त्वा किं नु हाति किं
॥ १० ॥ मायया विद्यते सर्वमिति केचन मोहिताः ॥ शिवरूपातिरेकेण नास्ति माया च वस्तुतः ॥ ११ ॥

शंक्याह ॥ भेदरहितेति भेदवद्भेदादेरप्यसिद्धत्वाद्ब्रह्मस्वरूपव्यतिरेकेण सद्भावो नास्तीत्यर्थः ॥ ९ ॥ हेयोपादेयविषयत्वागप्रतिपाद
कानां सर्वरहितत्वं विदुषो निगमयति ॥ ब्रह्मैवेति ॥ ब्रह्मैवेति ॥ अध्यस्तप्रपञ्चस्य सदसद्विलक्षणत्वेन वस्तुतो वस्तुतश्चाधिष्ठान
ब्रह्मणः पृथगभावाद्द्वितीयं ब्रह्मैव सर्वतः प्रतिभातीति ज्ञानी किं त्यक्त्वा किं वा उपाददीतेत्यर्थः ॥ १० ॥ नास्ति मायेति ॥ प्रपंचस्य रामः
कारणत्वेन परिकल्प्यमानमायायाः अपि सदसद्विलक्षणत्वान्मायाभ्यां मयं जगदस्तीति विरुद्धाभिधानमित्यर्थः ॥ ११ ॥ ४६

माययेति ॥ यदि मायायाः सत्त्वमंगीकृत्य तत्त्वतः प्रपंचजगदस्तीति स्वीक्रियते तर्हि हि देवैकिं परशिवस्य त्रिविधपरिच्छेदराहित्यलक्षणं महत्त्वं भज्ये
तेत्यर्थः ॥ १२ ॥ अस्ति चेदिति ॥ आकाशादीनामिव परशिवस्य महत्त्वमापेक्षिकं चेत्तर्हि अनंतं ब्रह्म एकमेवाद्वितीयमिति त्रिविधपरिच्छेदराहित्यप्र

माययावाशिवारन्यद्विद्यते चेच्छिवस्य तु ॥ महत्त्वं परमं साक्षाद्धीयते सुरपुंगवाः ॥ १२ ॥ महत्त्वस्य तु संकोचो नास्ति सम्यङ्निरूपणे ॥ अस्ति चेत्प्रमाणं स्या
च्छ्रुतिः सत्यार्थवादिनी ॥ १३ ॥ तस्मादस्ति महादेव एव साक्षात्स्वयंप्रभः ॥ आनंदरूपः संपूर्णोनितरो न्यस्तु किंचन ॥ १४ ॥ इममेव तु तत्कालेनि
ष्टा काष्ठा सुरोत्तमाः ॥ प्रत्यक्षादिप्रमाणानां वेदांतानां महीश्वराः ॥ १५ ॥ स्मृतीनां च पुराणानां भारतस्य तथैव च ॥ वेदानुसारिविद्यानामन्या सा
मास्ति कोत्तमाः ॥ १६ ॥ शैवागमानां सर्वेषां विष्णुप्रोक्तागमस्य च ॥ ब्रह्मरुद्रागमस्यापि सुराः सम्यङ्निरूपणे ॥ १७ ॥ बुद्धागमानां सर्वेषां त
थैवार्हतिमस्य च ॥ यक्षगंधर्वसिद्धादिनिर्मितस्यागमस्य च ॥ १८ ॥ परमाद्वैतविज्ञानं कस्य मत्प्रसादतः सिध्यति ॥ कस्य देवस्य वा प्रसा
दाच्छिवस्यैव हि सिध्यति ॥ १९ ॥ परमाद्वैतविज्ञानं शिवस्यापि नेतेन सः ॥ स्वमात्रसिद्धं देव्या श्रुतिवाया अस्ति कोत्तमाः ॥ २० ॥

निपादित्वप्रतिपादिका श्रुतिः प्रमाणं स्यादित्यर्थः ॥ प्रतिपादितमर्थं निगमयति ॥ तस्मादिति ॥ १४ ॥ ॥ ॥ ब ॥

ब्रह्महदेवेभ्यो विजिग्ये इत्यादिकायाः श्रुतेरर्थं विकुमारनमाणस्तदुपोद्घातमनेन तत्त्वज्ञानं सोमम महेश्वरप्रसादलभ्यं तं दर्शयति ॥ प्रसादादेवेत्यादिना ॥

प्रसादादेव रुद्रस्य शिवायाश्च तथैव च ॥ परमाद्वैतविज्ञानं विष्णोः साक्षान्ममापि च ॥ ७२ ॥ विरिंचस्य देवस्य स्वराडहंकृतस्य चात्मनः ॥ सम्राडहंकृतस्य चान्येषां प्रसादाद्देवदेवतं ॥ ७४ ॥ युष्माकमपि सर्वेषां शिवस्य परमात्मनः ॥ परमाद्वैतविज्ञानं प्रसादादेव नान्यथा ॥ ७५ ॥ यक्षराक्षसगन्धर्वसिद्धादीनां सपाश्वराः ॥ परमाद्वैतविज्ञानं प्रसादादेव शूलिनः ॥ ७६ ॥ मनुष्याणां च सर्वेषां पश्वादीनां तथैव च ॥ परमाद्वैतविज्ञानं प्रसादादेव शूलिनः ॥ ७७ ॥ प्रसादे सति कीटो वा पतंगो वा नरोथवा देवो वा दानवो वापि लभते ज्ञानमुत्तमं ॥ ७८ ॥ एवमेव हि जंतूनां परिज्ञानं दृढानिश्चानविष्णुना हि मन्यश्च सत्यमेव मयोदितं ॥ ७९ ॥ आदाने च तथा दाने न स्वतंत्रो महान्हरिः तथैवाहं सुरश्रेष्ठाः सत्यमेव मयोदितं ॥ ८० ॥ स्वतंत्रः शिव एवायं स हि संसारमोचकः ॥ तं विना न मयोद्दिष्टं ज्ञानं न संसेतेर्जनैः ॥ ८१ ॥ विष्णुना च परेणापि महादेवेन निधिर्विनिर्जंतुं समुद्दिष्टं शक्यते न हि मन्नमाः ॥ ८२ ॥ हवीन्यायेन संसारादुद्धरामि जनान्निमान् ॥ प्रसादेन तेन हे देवाः साक्षादित्युक्त्वैव च ॥ ८३ ॥ देवदेवस्य रुद्रस्य रूपं तस्य वै भवं ॥ को वा जानाति नास्त्येव सत्यं जानाति वा न वा ॥ ८४ ॥

रामः
४१

उद्दीरितलक्षणस्य परतत्त्वस्यासंतनिर्विशेषत्वेन दुर्ज्ञानत्वमन्महतामिंद्रादिदेवानामप्यपदेशागम्यत्वमीश्वरप्रसादलभ्यत्वं च दर्शयितुमाख्यायिकारूपां श्रुतिमाम्नायते ॥ ब्रह्महदेवेभ्यो विजिग्ये इत्यादिकायाः श्रुतेस्तात्पर्यं विवृणोति ॥ पुरासुराणामित्यादिना ॥ ८६ ॥ नस्य ह ब्रह्मणो वि

दुर्विज्ञेयो महादेवो महतामपि देहिनां ॥ प्रसादेन विना देवाः सत्यमेवोदितं ॥ ८५ ॥ पुरासुराणां सर्वेषामसुराणां दुरात्मनां ॥ महामोहोन संग्रामः संजातो दुर्निवारकः ॥ ८६ ॥ असुरैः पीडिता देवा बलवद्भिः सुरान्तरां ॥ तत्र दृष्ट्वा भगवानाजाः सर्वज्ञः करुणाकरः ॥ ८७ ॥ देवानां विजयं देवाश्चासुराजयं ॥ दत्ते तेन सुरैः शीघ्रं समसुरास्तु पराजिताः ॥ ८८ ॥ अविज्ञाय महादेवं देवेन वयं परिमोहिताः ॥ वयं विजयमापन्ना असुराश्च पराजिताः ॥ ८९ ॥ इत्यहमानसंछन्नाः सर्वे देवाः पुरातनाः ॥ अतीव प्रीतिमापन्ना अनवस्सुरपुंगवाः ॥ ९० ॥ पुनर्विश्वाधिको रुद्रो भगवान्करुणानिधिः ॥ स्वस्य दर्शयितुं तेषां दुर्ज्ञेयत्वं तथैव च ॥ ९१ ॥ तेषां ख्यातिनिरस्त्यर्थमपि साक्षान्महेश्वरः ॥ आविर्बभूव सर्वज्ञो यक्षरूपेण हे सुराः ॥ ९२ ॥

जये देवाश्च महीयंत तत ऐक्षंतास्माकमेवविजयोऽस्माकमेवायं महिमेति । अश्नतिवासस्यानिदं तमर्थं दर्शयति ॥ अविज्ञायेत्यादिना ॥ ८९ ॥ तद्देषां विजज्ञौ तेभ्यो ह प्रादुर्बभूवेति ॥ अश्नतिवासस्यार्थं ब्रूते ॥ पुनर्विश्वाधिक इत्यादिना ॥ स्वस्य दर्शयितुमिति ॥ स्वनाम्ना दुरवगमत्वं तेषामिंद्रादीनां दर्शयितुमित्यर्थः ॥ ९१ ॥ ९२ ॥

सू॰ ब्रह्मगी॰ ५८

नत्वयज्ञाननकिमिदं यज्ञमितियाकस्यार्थश्रुतेः नेदं चेति॥९५॥ तेऽग्निमब्रुवन्नित्यादिश्रुतिभागस्यार्थमाह॥ पुनरग्निमित्यादिना॥९६॥ अथवायुम ब्रुवन्मित्यादिश्रुतेवाक्यस्यार्थसंग्रहमाह॥ नत्वावायुमाहूयेत्यादिना॥२००॥ नथेति॥ पथास्याग्निरग्निर्वाअहमस्मात्यब्रवीज्जातवेदावा

नंदश्चायज्ञमत्यं नंविस्मयेनसहामराः॥ विचार्यसर्वेसंत्यकिमिदंयज्ञमित्यपि॥९७॥ पुनरग्निसमाहूय देवाःसर्वेविमोहिताः॥ अग्ने वंस्त्वविजानीहिकिमेतद्यज्ञमित्यपि॥९८॥ अग्निश्चर्वाअहमस्मीतियत्तंप्रत्याहसोपिच॥ सोपिप्रोवाव मगवांस्त्वयिकिंवीर्यमित्यत्र॥ ९६॥ पिग्निस्तथाकरोमीतिप्रोव्ययज्ञंगतोभवेत॥ यज्ञरूपोमहादेवःकोसीत्याहानजंप्रत॥९५॥ तिदंसर्वदहेयंयदिदंभूम्यांव्यवस्थि तं॥ इत्याहाग्निस्तृणंतस्मैनिधायपरमेश्वरः॥९७॥ एतद्दहेतिनोवान्सम्यमानोप्यनापत॥ अग्निःसर्वजवेनैवनदग्धुंतृणमास्तिकः॥ २ अशक्तोऽलन्नयायुक्तोमीनोगच्छत्सुरान्प्रति॥ मायानस्यैवविज्ञातुंनशाकवैनवृंसुराः॥९९॥ वित्रयप्रमहायास्यादिमाहाग्निःसुरान्प्रति॥ न

स्तुत्वावायुमाहूयविजानीहातिचाब्रुवन्॥२००॥ सोपिगत्वातथातेनयज्ञरूपेणशंत्तुना॥ नशेप्रतिहतोभूत्वातथागच्छत्सुरान्प्रति
॥२०१॥

हमस्मीत्यहंकारयत्रस्तत्वेनअपिब्रह्मणअभिभूतः॥ एववायुरपिवायुर्वाअहमस्मीत्यब्रवीन्मातरिश्वावाअहमस्मीत्येव म रामः ५८
स्मीत्येवमहंकारयुक्तंवाक्यंब्रुवन्नत्रांप्रतिहतोऽभवविस्मयः॥२०२॥

अथेंद्रमब्रुवन्मघवन्नेतद्विजानीहिकिमेतद्यज्ञमितिनथेतितदभ्यद्रवत्तस्मात्तिरोदधइतिश्रुतिवाक्यस्यार्थमाह॥ पुनरिंद्रइति॥
२०२॥ एवंमघाहंकाराणांतद्ब्रह्मस्वरूपोपदेशायपरज्ञाकैःसंनिधानमात्मयत॥ मतस्मिन्नाकाशेस्त्रियमाजगाम॥ बहुशोभमा

पुनरिंद्रःस्वयंमोहादहंताकंचुकावृतः॥ विज्ञातुंयज्ञमभ्यगमत्तत्रैवतिरोदधे॥२०२॥ इंद्रोतीवविषण्णस्तमहातापसमन्वितः॥ वि
धारूपास्तुमांदेवीध्यात्वाकारुणिकोत्तमां॥ २॥ लौकिकैर्वैदिकैःस्तोत्रैस्तुष्टावपरमेश्वरीमाशिवाकरुणामूर्तिर्जगन्मातात्रयीम
यी॥ ३॥ शिवात्मिकापरानंदवांकरस्यापिशंकरस्यापिवांकरी॥ सेद्ध्याहिमवत्पुत्रीस्वभक्तजनवत्सला॥ ४॥ महादेवस्यमाहात्म्
दुर्ज्ञेयंसर्वजंतुभिः॥ इतिदर्शयितुंदेवीतत्रैवाविरभूत्स्वयं॥ ५॥ नामाराध्याशिवामिंद्रःशोभमानुसर्वतः॥ उमांपर्वतराजेंद्रकन्य
कामाहवचनंत्वत्॥ ७॥ किमेतद्यज्ञमत्रैवप्रादुर्भूततिरोभूतिमित्याहितं॥ वक्तुमर्हसिदेवेशिममकारुणिकोत्तमे॥ ८॥ देवीपरम
कारुण्याद्ब्रह्मप्रतिस्वत्तु॥ प्रादुर्भूततिरोभूतमित्याहाशेषनायिका॥ ९॥ दुर्विज्ञेयोमहादेवोविष्णोःसाक्षादजस्यच॥ अन्येषाम
पिदेवानांनवापिमघवन्नशं॥ १०॥ प्रदर्शयितुमात्मानोदुर्ज्ञेयितंस्वयंपरं॥ आविर्भूतोनचान्येनकारणेनसुराधिप॥ ११॥

नामुमांहैमवतींतांहोवाचकिमेतद्यज्ञमितिब्रह्मेतिहोवाचेति॥ एतद्वाक्यार्थमाह॥ लौकिकैरित्यादिना॥२०४॥ ॥ ॥

सू॰अ॰गी॰ प्रसादेनैव लभ्यन्ते द्विजये महीयसीमितिवाक्यस्मृतानां यथार्थमाचष्टे॥ स एवेति॥२२॥ प्रसादे सुतीनिक्करीत्याद्वारीनामपि न च ज्ञानस्य परमेश्वरप्र
५९ सादलमसत्वाद्वैष्णमपीश्वरप्रसादे सत्येव परशिवस्वरूपं ज्ञातुं शक्नोतीत्यर्थः॥ प्रसादस्य स्वरूपमाह॥ प्रसादो नामेति॥ कर्मसा

स एव सर्वदेवानां नवापि विजयप्रदः॥ पराजयकरो त्वेषां नमेव शरणं व्रज॥२३॥ इत्यस्यासामहो देवी चिद्रूपा सर्वसाक्षिणी॥ न ज्ञानं पापहं चीनु
न त्वेवं न हि नानवत्॥२४॥ पुनर्देवा महादेवं महाकारुणिकोत्तमं॥ दुर्विज्ञेयं सुरश्रेष्ठाः स्वतं चेनुक्तिमुक्तिदं॥२४॥ निर्दुःसतिश्चितं तस्मात्समस्तं नव
कारणं॥ प्रसादे सति विज्ञातुं शक्यते परमेश्वरः॥२५॥ प्रसादेन विना नैव शक्यते सर्वजंतुभिः॥ प्रसादेन विना विष्णुर्न जानाति महेश्वरं॥२६॥
तथाहं च नराना मिदेवनाः सकलाश्चपि॥ प्रसादस्य तु सिध्यर्थं खलु सर्वे सुरर्षभाः॥२७॥ प्रसादेन विना देवं ये जानंति सुरर्षभाः॥ ते जानंति
विना पीयूषं गंधं हस्तेन केवलं॥२८॥ प्रसादो नाम रुद्रस्य कर्मसाम्यं तु देहिनां॥ देवि कालोकनाज्ञातो विशिष्टतिश्चयः सुराः॥२९॥ प्रसादस्य
स्वरूपं तु मया नाथो श्वरायणेन च॥ रुद्रेणापि सुरा वक्तुं न शक्यं कल्पकोटिभिः॥३०॥ केवलं लिंगगम्यं तु न प्रसन्नं शिवस्य च॥ शिवायाश्च
हरेः साक्षान्ममत्वान्यास्य चास्तिका॥३१॥
स्यादिति॥ सुखदुःखहेतुभूतयोर्धर्माधर्मलक्षणयोः कर्मणोरुपभोगेन प्रक्षीणत्वं साम्यं समतीत्यर्थः ॥ राम:
॥ गुरुः शक्तिपातस्वरूपनिरूपणप्रस्तावे चतुर्थेऽध्याये॥२९॥ ५९

महर्षयः स्मरंनेत्रां गविक्रियाकंपनं तथा॥ स्रोतः शरीरपातात्म्य भ्रमणं चोद्भवं तथा॥२२॥ आकाशे वा स्थितिर्देवाः शरीरांतरसंस्थितिः॥ अहंकृतिं च
देहस्य प्रकाशावेनयासनं॥२३॥ अनधीतस्य शास्त्रस्य स्वत एव प्रकाशनं॥ निग्रहानुग्रहे शक्तिः पर्वताद्यश्व भेदनं॥२४॥ एवमादीनि लिंगानि प्र
सादस्या सुरर्षभाः॥ तीव्रातीव्रतरः शनो प्रसादो न समो भवेत्॥२५॥ एवं रूपः प्रसादश्च शिवया च शिवेन च॥ ज्ञायते न मयानान्यैर्नैव नारायणे
न वा॥२६॥ अतः सर्वं परित्यज्य शिवादन्यत्र दैवतं॥ तमेव शरणं गच्छेत्सद्यो मुक्तिर्यदीच्छति॥२७॥ विष्णुर्न ब्रह्मा च मद्भक्तानास्तिनास्ति परा गतिः
तां तु सेवसे वर्षीयां सर्वमिवममयाद्दिवं॥२८॥ शंभुं तु मपि त्वस्मान्महेश्वरं॥ आश्रये सर्वभावेन प्रसा× नकस्य देहोऽस्मिन्न मसाहो गम्यते यथा॥ न
तथा विष्णुनक्रस्य न मद्भक्तस्य देहिनः॥२९॥ तस्मान्मनुष्युर्मा वि×दं कुरु तेहि सः॥३०॥ प्रसादे सति देवेशो दुर्ज्ञेयोऽपि सुरर्षभाः॥ शक्य
ते मनुजैर्द्रष्टुं प्रत्यगात्मतया सह॥३१॥ प्रसादे सति देवेशो दुर्ज्ञेयोऽपि सुरर्षभाः॥ शक्यते मनुजैर्द्रष्टुं सहासमूर्त्तिर्मानिवत्तु॥३२॥ प्रसा
दे सति देवेशो दुर्ज्ञेयोऽपि सुरर्षभाः॥ शक्यते मनुजैर्द्रष्टुं सहासर्वात्मरूपतः॥३३॥

स्कं॰ ब्रह्मगी॰
५०

साक्षिमात्रतयेति॥ सर्वज्ञमीश्वरं देवं जगच्च स्वप्रत्यस्तमिताद्वितीयसाक्षिचिन्मात्रतया यः पश्यति स एव यथार्थदर्शीत्यर्थः॥ ॥

सर्वसाक्षिणमात्मानं विदित्वा सकलं जगत्॥ साक्षिमात्रतया नित्यं यः पश्यति स पश्यति॥३४॥ परमाद्वैतनिष्ठा हि निष्ठा काष्ठा सुदुर्लभा॥ शिवाद
न्यतया ज्ञाता देवो वा वेद एव च॥३५॥ परमाद्वैतविज्ञानी स्वयं तु परदेवता॥ तस्यैव परमा मुक्तिर्नहि सम्यक्कारणं॥३६॥ गौतमस्य मुनेः शापा
द्धीचस्य च शापतः॥ जन्मांतरकृतात्पापाद्यमयोनिरोचरे॥३७॥ महापापवतां नृणां परमाद्वैतवेदने॥ प्रद्वेषो जायते साक्षाद्देवजन्मनि वापि च॥
३८॥ महापापवतां नृणां शिवज्ञानस्य साधने॥ सर्वांगोद्धूलने तिर्यक्त्रिपुंड्रस्य च धारणे॥३९॥ रुद्राक्षधारणे रुद्रलिंगस्यैव तु पूजने॥ प्रद्वे
षो जायते नित्यं शिवशास्त्रजपेपि च॥४०॥ अनेकजन्मसिद्धानां श्रौतस्मार्तानुवर्तिनां॥ परमाद्वैतविज्ञानं वांछा नित्यं प्रजायते॥४१॥ प
रमाद्वैतविज्ञानी मया साध्यः सदैव तु॥ नारायणेन रुद्रेण तथा देवैर्विशेषतः॥४२॥ परमाद्वैतविज्ञानी यत्र कुत्रास्थितः सुराः॥ तत्र
संनिहिता मुक्तिर्नत्रिकाद्यविचारणा॥४३॥ परमाद्वैतविज्ञाननिष्ठस्यैव महात्मनः॥ शुश्रूषा क्रियते येन तेन तप्ता होमममस्तके॥४४॥ रामः
५०

न्निगद्याख्यानमतः॥ इति श्रीकाशीविलासक्रियाशक्तिपरमभक्तश्रीमत्त्र्यंबकपादाब्जसेवापरायणेनोपनिषन्मार्गप्रवर्तकेन श्रीमाधवाचा

परमाद्वैतविज्ञाननिष्ठस्य परयोगिनः॥ समं देवा न पश्यामि न हरिर्न महेश्वरः॥४५॥ परमाद्वैतविज्ञाननिष्ठाय परयोगिने॥ शरीरमर्थप्रा
णं श्वपरद्याश्रद्धया सह॥४६॥ परमाद्वैतविज्ञाननिष्ठस्यैव परयोगिनः॥ मुमुक्षोः शुद्धविद्यायाः साधनं हि न संशयः॥४७॥ वेदबाह्येषु तंत्रेषु नरा
णां वासनापि च॥ कुतर्कवासनालोकवासना च सुदुर्जया॥४८॥ पुत्रमित्रकलत्रादिवासना चार्थवासना॥ देहेंद्रियमनोबुद्धिप्राणादावपि वा
सना॥४९॥ पांडित्यवासना भोगवासना कांतिवासना॥ प्रद्वेषवासना रुद्रवेदनारायणादिषु॥५०॥ ज्ञानसाधनकृते शुचिपुंड्रोद्धूलनादिषु॥
प्रद्वेषवासना पापवासना सुरपुंगवाः॥५१॥ परमाद्वैतविज्ञानजन्मनः प्रतिबंधकः॥ तस्मात्तु मुमुक्षुः श्रद्धालुर्वासनामखिलामिमां॥५२॥ विसृज्य
परमाद्वैतज्ञाननिष्ठो भवेत्सदा॥ वेदादिनमहाद्वैतपरिज्ञानस्य वैभवं॥५३॥ न शक्यं वक्तुमस्माभिस्तस्माद्देवाः परस्य ते॥ कथितमखिलदुःखध्वंस
कं वः समस्तं परमशिवसुखैकात्म्यप्रापकं सद्य एव॥ विगतसकलदोषा वेदवेदांतनिष्ठा हृदयकुहरनिष्ठं कर्म हीति चैतत्॥५४॥ इति
श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभवखंडे उपरिभागे ब्रह्मगीतासूपनिषत्सु ब्रह्मविद्यायां तलवकारोपनिषद्व्याख्यायां चतुर्थोऽध्यायः॥

र्यविरचितायां सूतसंहितातात्पर्यदीपिकायां यज्ञ॰ उ॰ ब्रह्मगीतासू॰ तलवकारोपनिषद्व्याख्यादीपिकायां चतुर्थोऽध्यायः॥ ॥

अथ सामशाखान्तरोपनिषदोप्युदीरितब्रह्मात्मैकत्वपरत्वमध्यायद्वयेन प्रतिपाद्यते॥ अत्र हि श्वेतकेतो निष्प्रपंचमद्वितीयं ब्रह्म तस्मात्मतेनो
पदेष्टुं कार्यप्रपंचस्य कारणत्वेन ब्रह्मणोऽनन्यत्वे नैकविज्ञानात्सर्वविज्ञानं प्रतिज्ञाय सदृष्टान्तमुपपादितं॥ उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवती
त्यादिना एवं सोम्य स आदेशो भवतीत्यंतेन तां श्रुतिं नानार्थतः संगृह्णाति॥ श्रुतीत्यादिना॥ श्रुतीवगुह्यमसंतरहस्यं उपदेशगम्यमिति यावत्॥ अ
दृश्यं तेनाप्यनेन दृढितीयं स ब्रह्मात्मेनेन आदेशः॥ यद्वा आदिश्यते अस्मादादेश इति कर्मणि ल्युत्पत्त्या उक्तविधं ब्रह्मैवादेशशब्दार्थः॥ अनेनार्थप्रकाश
कमिति॥ अपरिच्छिन्नार्थप्रकाशकं ब्रह्म स्वात्मनि परिकल्पितस्य सकलस्य जडप्रपंचस्य भासकं॥२॥ तस्मादेशो विशिष्यते॥ यस्येति॥ यस्य स्वरू

ब्रह्मोवाच॥ श्रुतीवगुह्यमादेशमनंतार्थप्रकाशकं॥ वक्ष्ये युष्माकमद्याहं शृणुत श्रद्धया सह॥२॥ यस्य श्रवणमात्रेणाश्रु
तमेवाश्रुतं भवेत्॥ अमतं च मतं चैव मतं ज्ञातमविज्ञातं च समनमाः॥३॥

कारणभूतस्य सद्रूपस्य ब्रह्मणः कर्म्मणि षष्ठी॥ ब्रह्म
विषयेण श्रुतिजनितज्ञानेनाश्रुतं श्रुतिजनितज्ञानाविषयीकृतमपि सर्वकार्यं जगत्स्वकारणब्रह्मात्मना तयाश्रुतमेव भवेत्॥ अ रामः
याअमतमतर्कितमपि कार्यं जगद्यन्मननेन मतं तर्कितं भवति॥ तथैवाविज्ञातमनिश्चितमपि यद्वोत्तरनिश्चयज्ञानेन तन्मननतया ५१
विज्ञातं निश्चितमेव भवति॥ तथाविधमादेशमिति संबंधः॥३॥

ननु कस्मिंश्चिद्विज्ञाते कथमन्यद्विज्ञातं स्यादित्याशंकायां कारणभूतस्य ब्रह्मणः कार्यजगतोऽनन्यत्वं दृष्टान्तेनोपपादयति॥ एकेनैवेत्यादिना॥ मृदिति
त्यर्थः॥ कारणत्वेनानुगतमव्यतिरेकेण घटादिकार्यस्य पृथगवस्थात्मकत्वाद्भिन्नत्वे॥४॥ नन्वेवं कारणब्रह्मणः कार्यस्य जगतोऽनन्यत्वे तस्य
सविशेषत्वापत्तिरित्यवशं परजगतस्तद्भिन्नत्वमेव व्यमिस्यतत्राह॥ कार्यमिति॥५॥ नाभिन्नमिति प्रतिज्ञानमर्थं साधयितुं विकल्पयति॥ भिन्नपक्षेत
ति॥ तत्रा— पक्षमनुवदति॥ नचेदिति॥६॥ साकिं कार्यगतसत्ता कारणसत्तैव उत ततोऽन्येति विकल्प्याद्ये कार्यस्यासत्त्वमेवायातमिति प्रतिपा

एकेनैव तु पिण्डेन मृत्तिकायाश्च यथा सुराः॥ विज्ञातं मृन्मयं सर्वं मृदभिन्नं ततः सदा॥४॥ एकेन लोहमणिना सर्वं लोहमयं यथा॥ विज्ञातं स्याद्यथै
केन नखानां कृन्तनेन च॥५॥ सर्वं कार्ष्णायसं ज्ञातं तदभिन्नं ततः सुराः॥ कार्यं तु कारणाद्भिन्नं न भिन्नं नो भयात्मकं॥५॥ भिन्नपक्षे तु सद्वस
त्कार्यं सदेव वा सद्वै कारणसत्ता वा कार्यसत्ताथवा परा॥६॥ यदि कारणसत्तैव कार्यसत्ता न चापरा॥ नहि कारणसत्ताका कथं सत्तानिराभवे
त्॥७॥ सत्ता कापि न चेद्भिन्ना कारणात्कार्यसंज्ञितं॥ इति वा न्नचिवार्णैविकार्ये संज्ञमसद्भवेत्॥८॥

स्यादिति॥ यदि नहीति॥ कारणसत्तैव चेत्कार्यसत्ता
नहि साचैकेति कार्यस्य पृथक्सत्ताभावात्कारणाभिन्नत्वमेवेत्यर्थः॥७॥ नन्वेवं सत्ताया एकत्वेऽपि कारणात्कार्यं पृथगेवानुभूयत इत्याशंकामनू
द्य निराचष्टे सत्तेति कारणसत्तैव कार्यसत्ता नामरूपाकारस्वभावतः कार्यं सदेवोपपन्नमिति भिन्नं कार्यं सदिति चेन्न स्यात्तन्मात्रमित्यर्थः॥८॥

सं॰ ब्र॰ गी॰
५२

णनैवासत्त्वमुपपादयति॥ सत्ताहीनस्येति॥ सत्ताहीनस्येति॥ सत्ताहीनस्य कार्यस्य नरविषाणादेरसत्त्वमेव हि युक्तं — द्वितीयसत्ताया अनवस्थापत्ति
नरविषाणस्यापि सत्त्वप्रसंगादित्यर्थः॥ अत एवास्मिन्पक्षे कार्यस्यासत्त्वे सति सत्कार्यमिति॥ वचनं निरर्थकमित्यर्थः॥१९॥ एवं तर्हि कारणसत्तातोऽन्यै
व कार्यसत्तेति द्वितीयः कल्पोऽस्त्विति आशंकते॥ नैवेति॥ नन्विति निराकरोति नहीति॥२०॥ कारणसत्तातः पृथग्भूता सा कार्यसत्ता किं सद्रूपेण भिन्ना उ
तासद्रूपेणेति विकल्प्याद्यं प्रत्याह॥ सद्रूपेणेति॥ चेदिति॥ उभयोरपि सत्तयोः सद्रूपेणैकरूप्यावगमात्तेन रूपेण भेदो न युक्त इत्येकैव सत्ता न द्वे

सत्ताहीनस्य कार्यस्यासत्त्वमेव हि युज्यते॥ प्रागसत्त्वे तु कार्यस्य सत्कार्योक्तिर्वृथा भवेत्॥१९॥ नैव कारणसत्तैव कार्यसत्ता परैव तत्॥ नहि सा का
र्यसत्ता तु तया कारणसत्तया॥२०॥ सद्रूपेणैव भिन्ना स्यादसद्रूपेण वा भवेत्॥ सद्रूपेणेति चेदेका सत्ता भिन्ना न सा भवेत्॥२१॥ असद्रूपेण वै
भिन्ना कार्यसत्ता नयापदि॥ नहि सा नैव सत्ता स्यादसत्त्वादेव शून्यवत्॥२२॥ पश्य सत्कार्यमित्येतन्न कार्यं न हि तद्भवेत्॥ वंध्यापुत्रो न कस्यापि व
स्तुनः कार्यमिष्यते॥२३॥

दित्यर्थः॥२१॥ द्वितीयमनूद्य दूषयति॥ असद्रूपेण भिन्नेति॥ सा सत्त्वेव न भवति शशविषाणादिवदसत्त्वादेवेत्यर्थः॥
२२॥ एवं सत्कार्यपक्षं निराकृत्य असदेव कार्यं कारणाज्जन्यमिति पक्षमपि निराकरोति॥ पश्य सदिति॥ प्रागसतः सत्तासंबंधोत्पत्ति॥ परैर रामः ५२
भिमता सा च वंध्यासुतवदसतः कार्यस्य न संभवतीति तस्य कार्यत्वमेव हीयत इत्यर्थः॥२३॥

ननु प्रध्वंसात्प्रागवस्थानेऽपि कार्यता किं न स्यादित्यत आह॥ प्रध्वंसोऽपीति॥ प्रध्वंसोऽपीति॥ प्रध्वंसस्यापि कार्यत्वं न संभवति उदीरितलक्षणाया उत्प
त्तेस्तत्राऽयोगात्॥ उत्पत्त्यसंभवं प्रतिपादयति॥ नास्तीति॥ कर्तृकरणादिकारकसंबंधवतो हि घटादेर्जनिक्रियोपलभ्यते॥ असतः प्रध्वं
सस्य शशविषाणवन्निर्धर्मकत्वात्तथाविधधर्माश्रयत्वेन तद्रूपत्वप्रसंगात्॥ कारकासंबंधलक्षणो धर्मोऽस्तीति संभवति॥ अतस्तदपेक्षया जनि
क्रियापि नास्तीति तस्य कार्यत्वं न युक्तमित्यर्थः॥२४॥ न च सत्त्वेऽपि कार्यस्यास्त्वसतो वंध्यासुतादिशेषाद्विशेषेण च तस्य कार्यत्वं सिध्यतीति शं
कामनुभाषते॥ असत्त्वेऽपीति॥२५॥ कोऽसौ विशेषः किं कारकसंबंधः उत जनिक्रियाश्रयत्वं आहोस्वित्सत्तासंबंध इति विकल्प्याद्यं प्रत्याह॥ कोऽपि

प्रध्वंसोऽपि न कार्यः स्यात्तस्योत्पत्तेरसंभवात्॥ नास्ति कारकसंबंधः प्रध्वंसस्य सुरोत्तमाः॥२४॥ तस्यानुत्पत्तिरूपत्वात्कुतो वा नास्ति ज
निक्रिया॥ असत्त्वेऽपि विशेषोऽस्ति कार्यस्येति मतिर्यदि॥२५॥ को विशेषोऽस्य संबंधः कारकैर्यदि तन्न हि॥ विशेषे सति संबंधः
संबंधोऽस्य स एव हि॥२६॥

शेष इत्यादिना॥ निर्विशेषस्यासतः कारकसंबंधित्वे वंध्यासूनोरपि तत्संबंधित्वसंभावनया
कार्यत्वप्रसक्तिरित्यवश्यं केनचिद्विशेषेण विशेषितेऽसति कारकसंबंधो वक्तव्यः स च विशेषोऽयमेव संबंधश्चेत्तर्हि स
विशिष्टस्वरूपसिद्धिरित्यन्योन्याश्रयता॥ यदि संबंधादन्यः स विशेषस्तर्हि तेनापि केनचिद्विशेषितेनैवासति भवितव्यं॥ स च विशे
षः किं स्वीकृतसंबंध एव उत्तेनाधारतीयो वा विशेषः॥ आद्ये अन्योन्याश्रयत्वं॥ द्वितीयेऽपि चतुर्थ्यादिविशेषानंगीकारे चक्रकापत्तिः
॥ अंगीकारे त्वनवस्थेत्यसतः कार्यस्य कारकसंबंधलक्षणो विशेषो दुर्निरूप इत्यर्थः॥ ॥

सू.अ.ल.गी. ५३

द्वितीयं पक्षमाह॥ ज्ञप्तिक्रियेति॥ ज्ञप्तिक्रियाश्रयत्वलक्षणोऽपि विशेषोऽपि केनचिद्विशेषितस्य सतः स्यादिति वक्तव्यं इतरथा तत्र विषाणस्यापि तादृग्विशेषप्रसं-
ङ्गात्॥ सत्त्वविशेषः किमिदमेव ज्ञप्तिक्रियाश्रयत्वमन्यो वा इदमेव चेदात्माश्रयत्वमितरादिप्रागुक्तो दोषः पर्यवसन्न इत्यर्थः॥ उक्तदोषप्रसक्त्या त-
त्संबंधलक्षणो विशेषस्तृतीयः कल्प्योऽपि न युक्त इत्याह॥ संबंधेति॥ २८॥ प्रतिपादितमसतः कार्यस्यासंभवमुपसंहरति॥ अत इति॥ यत उक्तरीत्या
नरविषाणवदसतो विशेषसंबंधो दुर्निरूपः॥ अतोऽसत्त्वाविशेषात्तद्वदेव तस्य कार्यत्वं न युक्तमित्यर्थः॥ सदसदात्मकं कार्यमिति तृतीयपक्षं स्वमि-

ज्ञप्तिक्रियाश्रयत्वं चेद्विशेषोऽस्यात्तदापि तु॥ एवोक्तदोषः संप्राप्तस्तस्य नास्ति निवारकः॥ २७॥ सत्तासंबंधवत्त्वं चेद्विशेषोऽस्य न तन्न तदापि
दोषः पूर्वोक्तः प्राप्नोत्येव न संशयः॥ २८॥ अतोऽसतो न कार्यत्वं सदसत्त्वं न संगतं॥ उक्तदोषद्वयापत्तेरतः कार्यं तु कारणात्॥ २९॥ अभिन्न-
मेव भेदस्यासंवादेव वस्तुतः॥ भेदाभेदसमारब्धा तु सुतरां नैव सिध्यति॥ ३०॥ कारणात्कार्यजातस्य भेदाभावाच्च वस्तुतः॥ कार्यकारणभेद-
प्रकारकव्याहृतिस्तथा॥ ३१॥ उत्पत्तिश्च स्थितिर्नाशस्तथैवार्थक्रियापि च॥ नामरूपविशेषश्च सर्वं ह्यन्यान्न प्रसिध्यति॥ ३२॥

रस्येति॥ सदसत्त्वपीति॥ एवं कारणाद्भिन्नस्य कार्यस्य सदसदादिविकल्पेन निरूपयितुमशक्यत्वात्कारणाभिन्नमेव तत्कार्यमित्यंगीकर्तव्य-
मित्युपसंहरति अतः कार्यमिति॥ २९॥ तत्र हेतुमाह॥ भेदस्येति॥ भेदाभेदस्य धीरेति॥ भावाभावयोरेकत्र समुच्चयितुमशक्यत्वाद्भेदपक्षोक्त-
दोषोक्तदोषप्रसंगात् भिन्नं वाऽभिन्नं नियामिके भेदाधीननिरूपणत्वेनात्माश्रयादिदोषप्रसक्त्या परमार्थतः क्वचिदपि निरूपणासंभवादित्यर्थः॥ भेदा-
भेदपक्षमिति॥ भेदाभेदपक्षस्तु सुतरां न युक्त इत्यर्थः॥ ३०॥ ननु कार्यस्य कार्यस्य कारणादन्यत्वे भेदप्रतीतिः का गतिरित्यत आह॥ कारणे-
ति॥ परमार्थतः कार्यस्य कारणाद्भेदेऽस्य विद्यावशात्कार्यकारणादिभेदप्रतिभासः संभवतीत्यर्थः॥ ३१॥ ३२॥

रामः ५२

एवं कार्यस्य कारणमात्रत्वं प्रसाध्याभिन्नार्थं श्रुतिं योजयति॥ अत इति॥ विक्रियत इति॥ विविधं क्रियत इति विकारः कार्यवर्गः॥ यतस्तद्भेदप्र-
तिनामोक्तंत्या॥ अतः सर्वोऽपि विकारो वाचैव केवलमस्तीत्यारभ्यते न तु वस्तुतोऽस्ति॥ घटोऽयं शराव इत्यादिनामधेयमात्रत्वमेव॥ सदा सर्व-
प्रदा ध्वस्तावस्थायामिव स्थितिकालेऽपि कार्यस्य कारणमात्रमेवावशिष्यते॥ ३३॥ नन्वेवं विकारस्य नामधेयमात्रत्वे श्रुत्यादिसत्त्वमुक्तमन-
वतीत्याह द्वास्य कथं कारणानन्ततसमुत्तेनन्यत्वं सदसतोऽपरस्परविरोधादित्याशंक्याह॥ प्रातीति॥ केनेति॥ कार्यस्य हि देहरूपे दृष्टबुद्धोदय॥

अतः सर्वो विकारस्तु वाचा केवलमास्तिकाः॥ अस्तीत्यारभ्यते नामधेयमात्रं हि सर्वदा॥ ३३॥ प्रातीतिकेन रूपेण विका-
रो सत्य एव हि॥ कारणाकारवान्सत्यः साक्षात्सदानुगः॥ ३४॥ कारणाभिन्नरूपेण कार्यं कार्यं कारणमेव हि॥ स-
द्रूपेण सदा सत्यं श्रोत्रे नोक्तिमथा खलु॥ ३५॥

कारविशेषात्मकमेकं प्रातीतिकं रूपं॥ तथानुगतसदात्मकमपरं कारणरूपं॥ तत्र प्रातीतिकेन रूपेण सत्य एव कार्यवर्गः कारण-
रूपेणासत्यः॥ ३४॥ न चैवं कार्यस्यैवं विधि कारणरूपमेकं कारणं चान्यदित्यद्वैतकारणत्वव्याकोप इत्यत आह॥ कारणाभिन्नेति॥ का-
र्यस्यैवं विधि सत्कारणाभिन्नरूपं तत्कारणमेव न नानयोर्भेदो विद्यत इत्यर्थः॥ एवमुक्तेऽर्थे मृत्तिकेत्येव सत्यमित्यादिकां कारणमात्रसत्त्वप्र-
तिपादिकां श्रुतिं योजयति॥ सद्रूपेणेति॥ श्रुतिगतैवकारकफलमाह॥ भेदेनेति॥ ॥

तिपादितमर्थं निगमयति॥ अत इति॥ यतो लोके महदादिकारणेषु ज्ञातेषु तदनन्यतया तत्कार्यघटशरावादिकमपि कारणज्ञानमेव भवति॥ अतः स
र्जगत्कारणत्वेन सद्ब्रह्मणस्तज्ज्ञानात्तत्कार्यं सर्वमपि कारणात्मनाज्ञातमेव भवतीत्येतदुपपादितमित्यर्थः॥२६॥ ननु कार्यस्य कारणज्ञानाज्ज्ञानेऽपि
कारणाज्ञानीयस्य तेन ज्ञातुमशक्यत्वात्कथमेकविज्ञानात्सर्वविज्ञानमित्यत आह॥ नचेति॥ नच जगत्कारणमेकमद्वितीयमेव न तु भिन्नं ना
पि भिन्नाभिन्नात्मकं येन तस्य कश्चिदपि भिन्नात्मकतया तेन कारणेन ज्ञातुमशक्यत्वादित्यर्थः न तु यदात्मना भिन्नं तिरोहितं तन्नानुरू

॥ अतः कारणविज्ञानात्सर्वविज्ञानमास्तिकाः॥ श्रुतरायुपपन्नं हि न संदेहोऽस्ति कश्चन॥२६॥ नचकारणमेकं हि न भिन्नं नोभयात्मकं॥ भेदः
सर्वत्र मिथ्यैव धर्मादेरनिरूपणात्॥२७॥ भेदे ज्ञाते हि धर्मादि विज्ञानं स्याच्च भेदं॥ विभेदे—बधर्म्यादौ विज्ञाते॥ न द्वयेदृशौ॥२८॥
भेदानिरूपणादेव भेदाभेदो न संगतः॥ अतश्च कारणं नित्यमेकमद्वयमुत्तमाः॥२९॥

यत एवेत्यत आह॥ भेदः सर्वत्रेति॥ धर्मिप्रतियोगिज्ञानाधीननिरूपणो हि भेदाव भासः॥ भेदे न ज्ञातयोरेव धर्मिप्रतियोगिनोर्मिथ्या
त्योन्याधाननिरूपणे तेन कश्चिदपि भेदस्यात्मलाभासंभवात्तन्मिथ्यात्वेन तत एव पृथगीयमानो भेदस्तस्यार्थः॥२७॥२८॥ अतश्चेति॥ यतो वे
यस्य भेदस्य भावात्तद्विषयावभासोऽपि न पारमार्थिकाः॥ अतः कारणादिदारणादिदारणत्मकभेदासंभवाच्छाकारणं नित्यं स्वगतसज
तीयविजातीयभेदाभावाच्चैकमेवाद्वितीयमिति सिद्धमित्यर्थः॥२९॥

न तु लोके घटादिकार्ये उपादानं निमित्तं चोभयं पृथग्दृश्यते॥ तथाद्वितीयस्य सद्ब्रह्मणो निमित्तत्वे निरूपादानं कार्यं नोपपद्यते न तूपादानत्वे च नि
र्निमित्तत्वप्रसंगः स्यादाशंक्य तस्योभयरूपतामाह कुलालादेरित्यादिना॥ महादेश्चेतनत्वे नहि स्वातिरिक्तचेतनकुलालापेक्षा॥ जगदुपादा
नं तु स्वयमेव चेतनत्वान्नान्यचेतनमपेक्षते तथाचेतनत्वेऽपि कुलालवत्स्वातिरिक्ताचिद्रूपोपादानापेक्षापि नास्ति॥ अभिन्ननिमित्तोपा
दानस्यैकत्वात्॥ अन्यैव श्रूयते हि॥ तदैक्षत बहु स्यां प्रजायेयेति॥ तत्रेक्षणानिमित्तत्वं बहुभवनेनोपादानत्वं चाद्वितीयस्य सद्ब्र

कुलालादेर्महादेश्च भेदरदृष्टेऽपि तत्त्वे॥ अचेतनत्वान्महादेः कुलालादिरपेक्षते॥३०॥ अत्र कारणमद्वैतं शुद्धं चैतन्यमेव
हि॥ तेन नापेक्ष्यते ह्यन्यत्कारणं चेतनात्मकं॥३१॥ स्वयं चेतनमध्यस्येत्तत्कारणं तत्कुलालवत्॥ अपेक्षते महदाद्युपमवि
रूपं तु कारणं॥३२॥ प्रतीत्या केवलं शक्तिरचिद्रूपा तमोमयी॥ सर्वप्रकारैर्विद्वद्भिरनिरूप्यास्ति शांकरी॥३३॥ नयदुर्घ
टकारित्वान्तदात्म्येनैव संगता॥ कारणं सकलं स्वस्य समं हर्तुं चास्तिकाः॥३४॥

नोऽवगम्यते॥ अतो जगतो निमित्तमुपादानं च स्वयमेवेत्यर्थः॥३०॥३१॥ ननु विक्रियस्यासंगस्य सद्रूपस्य ब्रह्मणः॥ कथमीदृग्वि
धं कारणत्वं संभवति मायये निचेन्न हि तया देतापत्तेरित्यत आह॥ प्रतीत्येति मतान्मायाप्रतीतिमात्रेणैव सिद्धा प्रतीत्यैकशरी
रेतिया वत्॥ स्वप्नकान्ता ब्रह्मरूपाच्छादकत्वात्तमः प्रधानानिरूपणसमर्थैरपि विद्वद्भिः सदसदादि सर्वप्रकारैर्निर्वक्तुमश
क्या ईदृग्विधा मायातादात्म्यस्य सद्रूपब्रह्मणः पृथक्सत्त्वात्त्रीयसत्त्वरजस्तमोगुणोपाधिभेदेनाविक्रियस्यापि ब्रह्मणः स्वदृष्टा दि

सुपपद्यते॥ नापि द्वैतापत्तिः॥ मायाया अनिर्वचनीयत्वेन सदंतराभावात्॥ २३॥ २४॥ एवमद्वितीयं ब्रह्म साध्य सद्रूपत्वमपि साधयति॥ सदसच्चेति ॥ विज्ञानमानंदं ब्रह्मेत्यादिश्रुतेश्चिद्रूपं हि जगत्कारणं ब्रह्म॥ तथा च विमतं सत् चिद्रूपत्वात्॥ यत्तु सद्भिन्नं तन्नासौ चिद्रूपः यथा रज्जुसर्पादिरिति भावः॥ व्याप्तिमुपपादयति॥ चिद्रूपस्येति॥ जडस्य प्रपंचप्रतीतिबाधसाक्षितया सर्वदावस्थानाच्चिद्रूपस्यानर्थित्वेन स्वप्रमाणे युक्तमेव सार्वकालिकं सत्त्वमित्यर्थः॥ २५॥ चिद्रूपस्याप्यसत्त्वं कुतो न भवतीत्यत आह॥ अचिदिति॥ अहिरज्ज्वादेः रज्जुसर्पादेरित्यर्थः॥ न

पालकं च महासत्त्वं चिद्रूपत्वात्सुरोत्तमाः॥ चिद्रूपस्य तु सत्त्वं वै युक्तमेवास्तिकाः सदा॥ २५॥
अचिद्रूपाहिरज्ज्वादेर्मिथ्यात्वं समतं खलु॥ अतस्तत्कारणं देवाः सदैवैकं च राज्यवत्
॥ २६॥ इदं सर्वं जगत्त्वं च सदैवासीत्सुरर्षभाः॥

इह हि मिथ्यात्वमचिद्रूपत्वेन व्याप्तं दृश्यते॥ नच चिद्रूपाज्जगत्कारणाद्व्यावर्तमानं स्वव्याप्यं मिथ्यात्वमपि व्यावर्तयतीत्यभिप्रायः॥ २५॥ अस्मिन्नतिपादितेर्थे सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति योजयति॥ अत इति॥ यत उक्तरीत्या जगत्कारणमद्वितीयं सदेवं अतः कारणादिदं परिदृश्यमानं नामरूपात्मकं कार्यं सर्वं जगत्सृष्टेः पूर्वं सदेवासीत्॥ सद्रूपकारणात्मनैवावर्तनेन तु नामरूपात्मनेत्यर्थः॥ २६॥ रा॰म॰ ५५

एवं सत्कारणवादं प्रसक्तं नैयायिकस्त्वधिक्षिप्त्या अन्यकार्यनिमित्तमसत्कारणपक्षमुपन्यस्य तस्य निरासः क्रियते॥ तदेकत्वादिना कथमथ सतः सत्कार्यत्वं तेन॥ तस्याः श्रुतेरभिप्रायमाविष्करोति॥ असदेवेदमग्र आसीदित्यादिना॥ विनष्टाद्धि बीजादेरंकुरादिकार्योत्पत्तिदर्शनात्कारणं नानुपमृद्य प्रादुर्भवितोस्तीत्यभावस्यैव तत्र कारणत्वं॥ एवं जगन्मूलकारणमपि नाशात्मसद्रूपमेवेत्येवं वदंतोऽसद्वादिनो भ्रांताः॥ मृतदेवदत्तस्य पुत्रोत्पादनशक्तिवन्नष्टस्य कारणस्य कार्यजननशक्त्ययोगात्॥ अंकुरादिकार्यसमये च बीजादिकारणगतसंस्थानादिविशेषनाशेऽपि अवयवानामनुवृत्तेश्च नासतः कारणत्वं युक्तमिति ॥ तथा ह्याचिंत्यं॥ ३७॥ तदेवोपपादयति॥ असत्कारणमित्यादिना॥ ननु यावदसतः कारणत्वं पुनरुक्तं तस्य सर्वप्रकारेणापि निरूपाख्यस्य का

असदासीदिति प्रोक्तं तावदं नि सुरपुंगवाः॥ ३७॥ असत्कारणं युक्तं वस्तुतत्त्वनिरूपणे॥ वंध्यापुत्रोऽपि सर्वेषां कारणं स्यात्ततः खलु॥
॥ ३८॥ स्वराज्यासत्त्वसर्वेषां कारणं भवतीति चेत्॥ शक्तिरप्यसतो नैव नास्ति सत्त्वे बीजस्य दर्शनात्॥ ३९॥ अंकुरोत्पादिका शक्तिः स
द्रूपस्यैव दृश्यते॥ खलु बीजस्य सर्वत्र नाशतस्तद्दर्शनात्॥ ४०॥

णत्वजत्वाणनावरूपधर्माश्रयत्वायोगात् तदाश्रयत्वे च वंध्यासुतस्यासत्त्वाविशेषात्सर्वकारणत्वप्रसंगेनेत्यर्थः॥ ३८॥ ननु च सतोऽपि जगन्मूलकारणस्य वस्तुशक्तिवत्त्वात्कारणत्वं सत्स्यतीति त्वं कादूषयितुमनुभाषते॥ स्वराज्येति॥ तदेतद्दूषयति॥ शक्तिरिति॥ ३९॥ अंकुरादिकार्यजननशक्तिरपि सद्रूपस्यैव बीजादेरन्वयव्यतिरेकाभ्यामवसीयते नासतः॥ अतो दृष्टविरोधादसतः शक्तिकल्पनमयुक्तमित्यर्थः॥ ४०॥

विकल्प्यासत्त्वेनापि दूषयति ॥ सापीति ॥ अयं कल्पमनूद्य निराचष्टे ॥ सतीचेदिति ॥ भावरूपा शक्तिर्निरूपाख्यस्यासतः कथं धर्मः स्यात् ॥ न ह्यन्यं
सतो वंध्यासुतादेस्तादृशी शक्तियोगो दृश्यते युज्यते वा ॥ तथाविधशक्त्याश्रयत्वं च सत एव हि बीजादेर्दृष्टं न त्वसतो नरविषाणादेः ॥ अन्यस्त्वेहा
यत्वे बीजादिवद्देवनाव रूपत्वप्रसंगाद्दानासतः सद्रूपा शक्तिरस्तीति न युक्तं कल्पयितुमित्यर्थः ॥४१॥ द्वितीयं कल्पमनूद्य निराचष्टे ॥ सासती
चेदिति ॥ असतः कारणत्वोपपादनाय हि या शक्तिः परिकल्प्यते सापि यद्यसती स्यात्तर्हि तस्या अपि वंध्यासुतवत्कार्यनिर्वहणसामर्थ्यानुप

सापि शक्तिः सती किं वासती सदसती नु वा ॥ सती चेत्सा सती शक्तिः कथं वंध्यासुताश्रया ॥४१॥ अथ यत्त्वं मतो दृष्टं खलु लोके न चासतः
॥ साऽसती चेत्कथं शक्तिः कार्यनिर्वाहिका सती ॥४२॥ वंध्यापुत्रः स्वपनेव कार्यनिर्वाहकः खलु ॥ निर्वाहकत्वं धर्मश्च सत एव हि दृ
श्यते ॥४३॥ शक्तिः सदसती सा चेद्दोषद्वयसमागमः ॥ अनःस्वशक्त्या चासत्सु सर्वेषां नैव कारणं ॥४४॥ तस्माच्छ्रायममसाहोजल्प
मात्रं न युक्तिमान् ॥

पपत्तिः ॥४२॥ न च सतोपि तथाविधसामर्थ्यदर्शनबलाद्दृक्पगनामित्यत आह ॥ निर्वाहकत्वेति ॥ एवं चास
द्रूपा शक्तिः परिकल्पितापि नासतः कारणत्वमुपपादयितुं शक्नोतीत्यर्थः ॥४३॥ तृतीयं निरस्यति ॥ शक्तिः सदसतीति ॥ दोषद्वय
समागम इति ॥ सत्त्वासत्त्वपक्षोक्तयोर्द्वयोरपि दोषयोः प्रसंग इत्यर्थः ॥४४॥ प्रतिपादितमसतो कारणत्वं निगमयति ॥ ॥

एवमसत्कारणवादस्यायुक्तत्वादुक्तौ तु शङ्के नन्वन्निशकृत्वयत्नकृतमसत्कारणवादनिगमनं सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमि
ति तद्दर्शयति ॥ अत इति ॥ नासदिति श्रुतिगतमनुशासनाभिप्रायकथनं ॥४५॥ एवमेकविज्ञानात्सर्वविज्ञानं प्रतिज्ञाय तदुपपादनाय मृदा
दिदृष्टान्तैः कार्यस्य कारणानन्यत्वं प्रसाध्य किं तदेकं वस्तु यद्विज्ञानात्सर्वं विज्ञायते त्याकांक्षायां सदेव सोम्येदमग्र आसीदिति सद्वितीयं ब्र
ह्मोपदिष्टं ॥ न कार्यत्वे हि तस्य कारणविज्ञानेन विज्ञातत्वमित्यभिप्रेत्य तत्कार्यत्वप्रतिपादनाय तत्सकाशात्सृष्टिराम्नायते ॥ तदैक्षत
बहु स्यां प्रजायेयेत्यादिना तां सृष्टिमुक्त्वाभिप्रेतार्थाभिधानापुरःसरं गच्छति ॥ तद्वेत्यादिना ॥ आद्यंतविनिर्मुक्तमिति ॥ आदिरुत्पत्ति

अतः सदेव सर्वेषां कारणं नासदास्तिकाः ॥४५॥ सृष्टेः प्रागिदं सर्वं सदेवासीत्तु कारणं ॥ तच्च कारणमाद्यंतविनिर्मुक्तं सदद्वयं
॥४६॥ दुर्विकल्प्यप्रपंचाख्यसंस्कारेणानुरंजितं ॥ कालकर्म्मविपाकेन सत्ववृत्तिसमाश्रितं ॥४७॥

रंतो विनाशस्तदुभयविनिर्मुक्तं ॥४६॥ न च द्वितीयासद्रूपादेकविधात्कथमनेकविधकार्यप्रपंचोत्पत्तिरित्यत आह ॥ दुर्विकल्पेति
॥ अतीतकल्पप्रजीनप्रपंचजनिता ॥ यावासना तदनुनवजनितोयश्च संस्कारस्तदुभयसंवलितमित्यर्थः ॥ कालकर्मविपा
केति ॥ कालकृतः प्राणिकर्म्मणां पुण्यपापरूपाणां यः पाकः फलप्रदानोन्मुखत्वं तेनेत्यर्थः ॥ सत्ववृत्तिसमाश्रितमिति ॥ अंतःक
रणोपादानभूतसत्वपरिणामरूपास्तु स्थूलकार्यप्रपंचविषयावृत्तिस्तयावच्छिन्नमित्यर्थः ॥४७॥

बहुस्यामि॥ उपादानांतरनैरपेक्ष्येण स्वात्मरूपेणैव बहुविधं जगद्भवेयमित्यर्थः॥ ननु निर्विकारस्य निरवयवस्य चिद्रूपस्यात्मनो बहुभवनासंभवात् योऽयं सांख्याद्यभिमतप्रधानमेव तदैक्षत बहु स्यामिति श्रुतिवाक्येन प्रतिपाद्यत इति चेन्न॥ मैवं॥ तस्याचेतनत्वेनेक्षणासंभवात्॥ अत एव भगवान्बादरायणः सूत्रयामास ईक्षतेर्नाशब्दमिति॥ कथं तर्हि त्रिविधस्य ब्रह्मणो बहुभवनसंभव इति॥ तत्राह॥ शक्तिमदिति॥ शक्तिः सत्त्वरजस्तमोगुणात्मि

सद्यर्थमैक्षत प्राज्ञो बहुस्यामिति शक्तिमत्॥ पुनस्तत्पूर्वसंस्काराद्धाकाशं वायुमादितः॥४८॥

कामाया॥ तस्याः सांख्याद्यभिमतप्रकृतिवत्स्वातंत्र्यशंकामपाकर्तुमाह शक्तिमदिति शक्तिपदेनाभिधानं शक्तिमत्त्वं च परशिवस्यैवेत्यावेदयितुं तैरेव प्रतिपादितं॥ परास्य शक्तिर्विविधैव श्रूयत इति॥ यद्यपि छांदोग्यशाखायां तत्तेजोऽसृजतेत्येव सृष्टिराम्नाता नान्यवियदादेः॥ तथापि तैत्तिरीयके नयोरपि सृष्टिराम्नातेति॥ गुणोपसंहारन्यायेन तां मध्ये उपसंहृत्य दर्शयितुं पुनस्तदिति॥ बादरायणेनापि वियदाद्योरुत्पत्तिं न वियदश्रुतेः॥ एतेन मातरिश्वा व्याख्यात इत्यधिक रणाभ्यां निर्णीतवान्॥४८॥ रामः ५७

श्रुतौ तत्तेजोऽसृजतेत्यादिना या तेजोवत्सृष्टिराम्नाता॥ तामाह स इति॥ ततस्तस्माद्वायुरूपापन्नात्स्वात्मनस्तेजः सृष्ट्वा पुनस्तेजोरूपापन्नात् तस्माद्देवापः ससर्जेत्यर्थः॥ एवं चात्र तत इति जनिकर्तुः प्रकृतिरिति विहितापादाने पंचमी॥ ननु दिग्योगलक्षणेनं तर्यस्य पंचमी॥ अनंतर मित्यध्याहारसापेक्षाया उपपदविभक्तेस्तन्निरपेक्षत्वेन कारकविभक्तेर्बलीयस्त्वात्॥ नचैवं तैजसः सद्रूपब्रह्मजत्वाकोपः॥ वायोस्तत्त्वतो ब्रह्मात्मत्वात्॥ बादरायणेनाप्यतदुपपत्तेः सूत्रयामास॥ तेजोऽतस्तथा ह्याहेत्यादिना॥ अन्नशब्दादिनामिति॥ अन्नमसृजतेति श्रुतौ या पृथिवीत्व

सृष्ट्वा तेजस्ततः सृष्ट्वा पुनः सृष्ट्वा च पत्तनः॥ अन्नशब्दोदितां देवा सर्जपृथिवीं परं॥४९॥ तत्पुनः कारणं
ब्रह्मतानि नूतानि पंच च॥ एकैकं द्विविधं कृत्वा तेषां मध्ये सुरोत्तमाः॥५०॥

तत्र शब्दानभिहितानामित्यर्थः॥ श्रुतिगतान्नशब्दस्य पृथिव्यभिधायकत्वं च व्यासेन प्रतिपादितं पृथिव्यधिकाररूपशब्दांतरेभ्य इति॥ पदार्थमिति॥ अपंचीकृततेन सूक्ष्मामित्यर्थः॥४९॥ श्रुतौ तेजोवन्नसृष्टेरनंतरं पंचत्रिरत्करणमाम्नातं तासां त्रिवृतं त्रिवृतमेकैकमेक रोदिति तन्नूतसृष्टो वियदादिसृष्टेरप्युपसंहारात्पंचीकरणस्योपलक्षणार्थमिति तद्दर्शयितुं॥ तत्पुनरित्यादिना॥ एतच्च पंचीकरणं शिवमाहा॥ त्म्यखंडस्य दशमेऽध्याये विस्तरेण प्रागस्माभिः प्रतिपादितं॥५०॥

नेयं शानाराये ति॥ तेषु विंशतिसंख्याकेषु चतुर्धा कृतेनांशेषु वियदादिसंबंधिनश्चतुरोंशाननादाय वाय्वादीनां चतुर्णां भूतानां संबंधिनः स्वांशश्चतुरोंशांस्त्रीं
श्चादाय कारणं ब्रह्म एकैकेनार्धेन एकैकमंशं संयोजयति॥ एवं वाय्वादिभूतार्धसंबंधिनोपि चतुरोंशाननादाय तत्तद्भूतव्यतिरिक्तभूतार्धे चतुरोतिरेक
कं संयोजयतीत्येवमर्थः॥५१॥५२॥ अंडजं जरायुजमुद्भिज्जमिति प्रकृतेनाभिप्रेतमर्थं दर्शयति॥ अंडजमिति॥ स्वेदजस्य पृथगुक्तिः रंडजानन्तावम

अंशानेवं समादाय तेषामेकैकमात्मकम्॥ कृत्वा चतुर्धा तिर्यक्छानादाय चतुरः सुराः॥५२॥ यथाक्रमेण भूतानां चतुरस्त्वांश्च कारणं॥ यथाक्र
मेण भूतार्धे नैकैकं करोतिनत्॥५३॥ एवमंशान्तराणेतानादाय चतुरः स्वयं॥ एकं भूतांतरार्धे निकरोति क्रमशः सुराः॥५४॥ एवं भूतानि
सर्वाणि पंचीकृत्य सुरर्षभाः॥ अंडजानि तु वनान्यात्मकरोति ब्रह्मकारणं॥५५॥ अंडजं जरायुजं चैव स्वेदजं चोद्भिज्जं पृथक्॥ करोति काजपाकेन प्रा
णिकर्मविशेषतः॥५६॥ ब्रह्म लिंगिरूपसर्वत्रैणैवानुप्राप्यात्मिकः॥ इत्थं भूमानि रूपाणि कुरुते सर्वकल्पवत्॥५७॥

त्रिप्रेत्य कृतो नैविधामाम्नातं॥ अन एवा कृत्यमीप्य कारणः॥ स्वेदजं संशोकजयोरंडजोद्भिज्जयोरपि यथासंभवमंतर्भावइति॥५८॥ सेयं देवतेमास्ति
स्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोदिति श्रुतिवाक्यसार्थमाह॥ ब्रह्मेति॥ जगत्कारणं ब्रह्म जलतरंगबुद्बुदादिषु सूर्यबिं
बस्य प्रतिबिंबवत् ब्रह्मादिसर्वशरीरेषु चिद्रूपेणैवानुप्राप्य पूर्वकल्पनानुसारेण सोनामायनमिदं रूपमिति नामरूपे व्याकरोदित्यर्थः॥५९॥

महदादिदृष्टान्तैः प्रागुपपादितं कार्यस्य कारणानन्यत्वं पुनर्दृष्टान्तत्रिवृत्कृतस्थूलभूतकार्यप्रपंचस्यापि त्रिवृत्कृतकारणभूततेजोबन्नमात्रत्व
मग्न्यादिनिदर्शनेन निरूपयितुं श्रुतिरुदाहरणैः श्रुतो दर्शयति॥ यदग्ने रोहितं रूपमित्यादिवाक्यं इदं पंचीकृतभूतकार्यं सर्वं जगत्परमार्थविज्ञानमपि कारणस्वरूप
भूतव्यतिरेकेणनैवास्ति॥५७॥ कथमेवाग्नीत्यवगम्यते॥ तत्र यदुक्तं तदुपपद्यत इत्याशंकासोपपादयति॥ यदग्नेरिति॥ त्रिवृत्कृतकार्यत्रयमग्न्या
दिषु लोहितशुक्लकृष्णात्मकास्त्रयो वर्णा अवगम्यंते॥ तत्र यल्लोहितं तत्त्रिवृत्कृतस्य रूपस्य तेजसो रूपं॥ यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य॥५८

इदं सर्वं जगत्स्वप्नमिव जातमपि स्वतः॥ कारणव्यतिरेकेण नास्त्येवात्र न संशयः॥५९॥ यदग्ने रोहितं रूपं तद्रूपं तेजसः सदा॥ यच्छु
क्लं तदपां रूपं यत्कृष्णं तन्ममैव तत्॥६०॥ नास्ति रूपातिरेकेण सदा सोग्निः सुरर्षभाः॥ वाचारंभणमात्रो हि विकारो वह्निसंज्ञि
तः॥६१॥ त्रीणि रूपाणि देहेवा एवसत्यं न चानलः॥ यस्मात् यो रोहितं रूपं तद्रूपं तेजसः सदा॥६२॥ यच्छुक्लं तदपां रूपं य
त्कृष्णं तन्ममैव तत्॥ नास्ति रूपातिरेकेण सदादित्यो न संशयः॥६३॥

न चैषां रूपाणामन्यद्वीयत्वेप्यग्निर्नाम धर्मी कि
नोनस्यादित्यत आह॥ नास्तीति॥ एतद्रूपत्रयमेव हि मिलितमस्यादिपदेनाभिधीयते न तु ततोतिरिक्तं किंचिन्नानारमस्तीत्यर्थः॥ नन्वदा
हपाकादिसमर्थत्वेनानुभूयमानोऽग्न्यादिपदार्थः कथमपलपितुं शक्यत इत्यत आह॥ वाचारंभणमात्रमिति॥ कारणं भूतरूपत्र
यव्यतिरेकेणायमग्न्यादिपदाभिधेयो विकारः संस्थानविशेषः स वाचैव जमारभ्यते न तु वस्तुतोस्तीत्यर्थः॥५९॥६०॥ त्री
ण्येति॥ कार्यस्य कारणात् पृथक्केनव्यवहारोऽन्यमकृत इत्यर्थः॥ यत्तु इदमसौ रोहितं रूपमित्यादेनाश्रुतो विस्तरेण

रेणैक्यमर्थमतिदेशेन कथयति॥ एवमिति॥६२॥ घटकुड्यादय इति॥ यथा चेमे घटादयः कारणभूतेजोबन्नव्यतिरेकेण न संति॥ एवं भूतभौ
तिकात्मकं सर्वं जगत्कारणभूतब्रह्मव्यतिरेकेण नैवास्ति सद्रूपं तज्जीवमर्वदाविद्यत इत्यर्थः॥६३॥ ब्रह्मणः परमार्थत्वे तत्त्वमसीति तदात्मकत
याभिधानेन स्वपदेहस्य मायात्वे जीवोपि परमार्थ इति तद्देकविषयोहंप्रत्ययः कथमस्त्वित्यन्नतकार्येषु समेषु देहादिषु च अहं मनुष्य इति जा
यत इत्यत आह॥ एवंघटैर्वैति गतजन्मम जनिनवासनाप्रदर्शनीदेहादावहमिति भ्रमः॥६३॥ घटं गतजन्मन्यपीत्यादिवाक्यानवचेष्ट

न्यांप्या केवलमादित्यइत्यकुरविवेकिनः॥ एवंवदश्वविज्ञेयोविग्रहश्वसुरपुंगवाः॥६३॥ घटकुड्यादयोत्ता वान्तानिस्तुवनानिच
॥ मब्रह्मातिरेनाणकेस्तिब्रह्मैवसत्सदा॥६३॥ एवंदृंदृंवच्चमोत्पन्नवासनायाबलेनतु॥ देहेंद्रियादिसंघातेऽहंमतिर्जायते
दृढा॥६४॥ देहेंद्रियादयोनावानाहमर्थानिरूपणे॥ नौतिकत्वाच्च भूतांशोःस्वदेवाप्यायितत्वातः॥६५॥ मदंन्नरएयथान्नि
त्रिनिर्मितावेमदं मसा॥ आप्यायतेतथान्नुक्तैर्भूतैर्देहादयोपिव॥६५॥

र्थः॥६५॥ अंत्रमाशितमित्यारभ्य दध्नः सौम्यमनः
प्राक्तनयाश्रुत्यामनोवाक्प्राणमांसजोहितमकाद्यात्मकस्य शरीरस्य जडत्वतत्त्वकार्यत्वेन जडत्वाच्च तन्मैकगोचरमहंप्रत्ययं
प्रतिपरमर्थतो न विषयत्वमिति प्रपंचयति॥ नत्त्संग्रहेणव्याकरोति॥ देहेंद्रियादय इति॥ भ्रांत्यैवाहमर्था देहादयः नतु निरूपणे॥ वि
दमान्नुतत्त्वतकार्यत्वात्स्वयंतुत्यमानतेजोवन्नलक्षणभूतत्रयांशोःस्थदिषमध्यमस्थमेरूपचयाच्चेत्यर्थः॥६५॥ उपचयस्तावद्देहा
रन्नादिभिरुपलभ्यते च्छनएवन्यस्पनिर्माणमपि तैरेवेत्यत्र निदर्शनमाह॥ मदंन्नसेति॥६६॥

व्याख्यातायाःश्रुतेःफलितं तात्पर्यमाह॥ अत इति॥ यतो देहेंद्रियमनसां वाचारंभणमात्रं तेजोबन्नभूतकार्यत्वेनानात्मत्वं॥ अतस्तत्राह
मित्यात्ममतिं परित्यज्य कूटस्थनित्यस्थिरात्मन्येव तां कुर्यादित्यर्थः॥६७॥ तेजोबन्नविलक्षणानां भूतेंद्रियमनसां कथं तत्कार्यत्वमिति चेत्॥ द
धिविलक्षणस्यसर्पिषोयथा दधिकार्यत्वमिति दृष्टांतं श्रुत्या दध्नः सौम्येति निर्दिशति॥ दध्नः सर्पिरिति॥ दध्नोयथामथनेविलक्षणः सर्पि
:परिणामः॥ एवं तेजोबन्नमौदर्याग्निकृतपाकविशेषेण देहेंद्रियमनोरूपपरिणामविशेष इत्यर्थः॥६८॥ दधिसर्पिर्दृष्टांतेन देहादेर्भौति
कत्वसमर्थनेन प्रागुक्तायाव्यतिरिक्तात्मनिष्ठायानिरपवादत्वं सिद्धमित्याह॥ भौतिकं देहसंघातमिति॥६९॥ वाक्प्राणयोः कार्य

अतो देहादिसंघातेऽहंमेन्यादिकां मतिं॥ विमत्सरमात्मिचैतन्ये विद्वान्कुर्यादहंमतिं॥६७॥ दध्नः सर्पिर्यथाजातं मथनेन सुर
र्षभाः॥ तथा बुध्यादयो नावान्नूतेस्पश्चोद्भवंति हि॥६८॥ भौतिकं देहसंघातं विसृज्य मतिमान्नरः॥ सर्वसाक्षिणि चिद्रू
पे कुर्यान्नित्यमहंमतिं॥६९॥ अन्नेनाप्यायितेनुक्के नाधातं तस्य नासते॥ ततोपि बुद्धिरन्नस्य कार्यमेव न संशयः॥७०॥
अतोपि बुद्धिमन्नस्य कार्यं त्यक्त्वा विविक्तधीः॥ सर्वसाक्षिणि चिद्रूपे कुर्यान्नित्यमहंमतिः॥७१॥

योः कार्ययोरस्तु भौतिकत्वं कथं मनस्तु नित्यमिति वैशेषिकास्तत्कथं तस्य भौतिकत्वमित्याशंक्य पवनापुत्रेण दृष्टं॥ स्य एवमाचगवान्विद
नयत्विति॥ न त्र पितु रुद्रं शं षोडशकलः इत्यादि षोडशाहिन पर्यंतमनशनेनोपक्षयादधीतवेदस्याम नवभासः पुनरशनेनतदुपचयादव मा
न इति प्रवृत्तएवोक्तं॥७०॥ मनसोन्नमयत्व अन्नेनोपचयदर्शनादन्नमयं मन इति पितुराज्ञायस्तं संग्रहाति॥ अन्नेनाप्यायितेनुक्केनेति॥ बुद्धिरि
तिमनएवोक्तः॥७०॥ मनसोन्नमयस्यात्मिप्रसंगस्य युक्त्यंसमर्थनं तस्यापि प्रागुक्तव्यतिरिक्तात्मनिष्ठासिद्धिरेवफलमित्याह॥ अतोपि बुद्धि
मन्नस्येति॥७१॥

एकमेवाद्वितीयमित्यद्वितीयं ब्रह्म प्रतिज्ञाप्य तेजोबन्नलक्षणस्य भूतत्रयस्य तदुत्पन्नस्य भौतिकस्य चोपजातस्य ॥ योगापन्नानां शरीराणां नोगोप
कारणानामिंद्रियाणां च तत्कार्यतये वचारंभणत्वान्न तस्य नियोगिकत्वेनाद्वैतप्रतिज्ञाभंग इत्यध्यायस्य प्रथमभागार्थव्याख्यानम् ॥ तथापि
नोभूणमात्मनोनिमित्तेन तत्प्रतियोगिकत्वेनाद्वैतप्रतिज्ञाभंगा इत्याशंकां निरसितुमुत्तरो भागः ॥ उद्दालको हारुणिरित्यादि तत्र यद्यपि नो
ग्यवभोक्ता न कल्पितः किंतु परमार्थ एव तथापि न तत्प्रतियोगिकत्वेनाद्वैतप्रतिज्ञाहानिस्तस्य ब्रह्मरूपत्वेन नेदानावारिकं तत्कं ॥ स
एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति ॥ यद्येतद्वाङ्मनसगोचरचारिनिस्तत्त्वं ब्रह्मन्यस्मिन्नारोपित

देहेन्द्रियादिसंघातेऽहंममेत्यादिकां मतिं ॥ त्यक्त्वा स्वात्मनि चिद्रूपे यदापीनो नवत्ययं ॥७२॥ तदा स्वपिति दुःखादिदर्शनं च न विद्यते ॥
स्वात्मरूपसुखप्राप्तिरेवं दृष्टा स्वदेहिनः ॥७३॥ अतोपि मतिमान्नित्यं त्यक्त्वा देहादिगां धियं ॥ सर्वसाक्षिणि चिद्रूपे साक्षात्कुर्यादहं
मतिं ॥७४॥ यदिदं साक्षिणा वेद्यं तत्सर्वं ब्रह्म केवलं ॥ तत्सत्यं दृष्टं चैतन्यं तत्त्वमर्थो निसंशयः ॥७५॥

ननु दृश्यं सर्वमेतेनैवात्मवद्रजतमिव शुक्तिशकलेन ॥ तदेव च ब्रह्म सकलकल्पनाधिष्ठानत्वात्सत्यं सर्वस्य कल्पितस्य सत्तास्फूर्तिप्रद
त्वात्तदात्मा च ॥ यदेतदुद्दालकेन त्वमेव ब्रह्म तदेव त्वमसि तत्त्वमसि श्वेतकेतो इति ॥ श्वेतकेतवोपदिष्टमिति ॥ तामिमां श्रुतिं व्याक
रोति ॥ यदिदमित्यादि ॥ ब्रह्म केवलमिति ॥ ब्रह्मण्यारोपितत्वाद्व्यतिरेकेणाभावात् ॥ योयं सर्पः स रज्जुः यदिदं रजतं तच्छुक्तिशकलमितिवद्बाध
यां सामानाधिकरण्यं तत्त्वमर्थ इति त्वंशब्दार्थो जीवः पुनः परमार्थतस्तदेव दृष्टं चैतन्यं ब्रह्म न पुनर्देहादिवत्कल्पितं इत्यसंशयेन तत्त्वमि
त्यर्थः ॥७५॥

ननु त्वंशब्दः परागर्थवाचकः अहंशब्दस्तु प्रत्यगर्थ इति परस्परप्रतिद्वंद्वतया रूढत्वाद्गीश्शब्दत्वात्तौ विरुद्धार्थौ अहं ब्रह्मास्मीति प्रतीचो ब्रह्मत्व
मुक्तं कथं न रेतदिह तत्त्वमसीति कथं पराचो ब्रह्मत्वमुच्यते इत्यानंत्याह ॥ त्वंशब्दार्थ इति ॥ एक एव देवदत्तो यथा पुत्रेण तात इत्युच्यते पित्रा च पु
त्र इति न तत्र तातपुत्रपदाभ्यामभिधीयमानं देवदत्तस्वरूपं भिद्यते ॥ वक्तृभेदनिबंधनस्तु पितृपुत्रव्यवहारभेदो न वक्तव्यक्तिबंधनः ॥ तथा जी
वस्यैव ब्रह्मतादात्म्यं स्वयमनुभूयमानावस्थमहं ब्रह्मास्मीति व्यपदिश्यते ॥ तदेव जीवपरैक्यं परस्मै बोध्यमानं तत्त्वमसीति व्यपदिश्यते अ

त्वंशब्दार्थो यथा भाति सोहं ब्रह्मार्थ एव हि ॥ योहंशब्दार्थ आभाति स त्वंशब्दार्थ एव हि ॥७६॥

नो वा सद्दयस्य संमानार्थत्वाद्विरोध इत्यर्थः ॥७६॥ न चैवं तत्त्वमस्यहं ब्रह्मास्मीत्यनयोः परस्परविरोधो मा भूत् तत्र त्वमहंशब्दार्थयोः पुनर
ज्ञः संसारी जीवोभिधीयते ॥ ब्रह्मपदेन च तत्पदेन च पुनरसंसारी सर्वज्ञ ईश्वरस्तस्य कथं तेन सह तादात्म्यमित्यत आह ॥ त्वमहंशब्देति
॥७७॥ अयमर्थः ॥ सत्यज्ञानानंदात्मकमिति प्रतिपादितमखंडमद्वितीयमेकरसमनाद्यनंतं परमार्थसत्तं वस्तु सत्त्वरजस्तमोलक्षण
गुणत्रयात्मिकाया प्रकृतिरनादिरंतवती न वज्ञानेकनिवर्त्यतया मिथ्यैव परिकल्पितत्वाद्वस्तुतस्तासा च द्विविधा ॥ रजस्तमसी अ

रू॰ ब्रसगी॰
६२

नित्यविशुद्धसत्त्वा एकाऽसा मायेत्युच्यते॥ रजस्तमोभ्यामभिभवेन मलिनसत्त्वा यदा साऽविद्येत्युच्यते॥ तत्र मायासत्त्वांशे प्रतिबिंबितः स परमात्मा
तां मायां वशीकृत्य सर्वज्ञः सर्वेश्वर इत्युच्यते॥ अविद्यासत्त्वांशे प्रतिबिंबितः स परस्तया वशीकृतोऽस्वतंत्रः कर्त्ता भोक्ता संसारी जीव इति
स एव तु परमात्मा तमःप्रधानप्रकृत्युपाधिकः सन् भूतभौतिकप्रपंचलक्षणेनात्मना विवर्त्तते॥ तत्रैक एव परमात्मा तमःप्रधानप्र-
कृत्युपाधिकतया जगदुपादानं॥ विशुद्धसत्त्वप्रधानप्रकृत्युपाधिकतया जगतो निमित्तमित्यभिन्ननिमित्तोपादानं तत्सदेव सोम्येदमि-

त्वमहंशब्दलक्ष्यार्थः साक्ष्यात्मकचितिः परा॥ तच्छब्दस्य च लक्ष्यार्थः सैव नात्र विचारणा॥७५॥

त्यत्र सच्छब्देनोक्तं॥ तत्र हि सदैक्षतेति चेतनत्वेन निमित्तत्वं बहु स्यामिति कार्याकारेण विवर्त्तमानतया उपादानत्वमित्यभिन्ननिमित्तोपा-
दानत्वं विशदतरं हि प्रकृतत्वात्तत्त्वमसीति वाक्ये प्रकृतपरमात्मा तच्छब्देनोच्यते॥ अविद्योपाधिकस्तु जीवः सकलोऽपि [?] वर्त्तितैव न
के तु निमित्तमात्रं कृत्वा उद्दालकेन पित्रा त्वंशब्देनोच्यते॥ तयोश्च तत्त्वंशब्दवाच्यार्थयोर्मायाविद्योपाधिकचैतन्ययोः परस्परं तद्विलक्षणेनाभा-
नात्मविरोधात्त्वंशब्दांशो मायाविद्योपाधिपरित्यागेनोभयानुगतमेकं चैतन्यमात्रं लक्ष्यतः॥ एवं ब्रह्मास्मीत्यत्रापि॥७६॥ रामः ६२

ननु चिदंशे तादात्म्याविरोधेऽपि त्वमहंशब्दवाच्यार्थस्य तत्पदवाच्यार्थेन तादात्म्यं विरुद्धमेवेति चेत्सत्यं विरुद्धं न त्विह तादिह न विवक्षितमित्या-
ह॥ त्वमहंशब्दवाच्यार्थस्येति॥ संसारित्वस्य असर्वस्य सर्वज्ञत्वात्मकताने ह श्रुत्यापि विवक्षितेत्यर्थः॥७७॥ शब्देनाभिधीयमानस्य संसारित्वादेरवि-
वक्षाकारणमाह॥ तदर्थे केति॥ समस्तिव्याकृतपदं न रसामानाधिकरण्यविरोध एव विवक्षाकारणमित्यर्थः॥ त्वमहंशब्दार्थे कथितमर्थं तच्छ-
ब्दार्थेऽपि योजयति॥ तत्पदवाच्येन जगत्कारणत्वसर्वज्ञत्वादिना विरुद्धं संसारित्वादिकं त्वंपदवाच्यगतं यथा न विवक्षितं॥ तथा त्वंपदवाच्यगत-
संसारित्वादिना विरुद्धं जगत्कारणत्वसर्वज्ञत्वादिकं तत्पदवाच्यगतं न विवक्षितमित्यर्थः॥ त्वमर्थैक्यविरुद्धं विशेषणं तत्त्वं जगत्कारणत्वस-

॥त्वमहंशब्दवाच्यार्थस्यैव देहादिवस्तुनः॥ ननु तच्छब्दार्थतां वक्ति श्रुतिस्तत्त्वमसीति सा॥७८॥ तदर्थे का विरुद्धांशं सत्यकार्यं वाच्यगतं श्रुतिः॥ अवि-
रुद्धं चिदाकारं लक्षयित्वा ब्रवीहि॥७९॥ तदर्थे च त्वमर्थैक्यविरुद्धांशं विनैव तु॥ कारणत्वादिवाच्यस्थं लक्षयित्वा तु केवलं॥८०॥ चिदाकारं पुनस्त-
स्य त्वमर्थैक्यं ब्रवीति च॥ तत्त्वंशब्दार्थजीवस्य चिन्मात्रस्य परात्मनः॥८१॥ एकत्वं यस्ततः सिद्धं स हि वाक्यार्थ आस्तिकाः॥

र्वज्ञत्वं विना केवलं चिदंशोऽप्युक्तं चिदाकारं लक्षयित्वा तस्य त्वमर्थैक्यं ब्रवीतीत्यन्तरेण संबंधः॥८२॥ एवं तत्त्वंपदार्थयोर्विरुद्धांशपरिहारे स-
ति यो वाक्यार्थः संपद्यते तं दर्शयति॥ तत्त्वंशब्दार्थजीवस्येति॥ उक्तरीत्या तत्त्वंशब्दार्थयोर्लक्ष्यः चिन्मात्रो निरस्तसमस्तोपाधिकं स एव हि
परमात्मा विज्ञानमानंदं ब्रह्मेति निश्रुतेः॥ तस्य च त्रिविधपरिच्छेदराहित्येन यतः स्वाभाविकमेकत्वमभेदः॥ सा तत्त्वमसि वाक्येन प्र-
तिपाद्यते॥ ननु जीवब्रह्मणोरन्यतरोहेत्वोनान्यतरस्य प्रागसिद्धमेकत्वं बोध्यत इत्यर्थः॥८३॥

सू॰ ब्रह्मगी॰ ६२

ननु परमार्थतो भिन्नस्यैव संसारिणो जीवस्य परसंपर्कवशेन तादात्म्यस्य सुवर्णपित्तवशादीश्वरानुग्रहवशात्तत्त्वज्ञानात्संभवान्नादिकारणात्म्यपरत्वं किमि
ति वाक्यस्य न स्यादित्यत आह॥ इतोन्यथेति॥ इतो स्मात्स्वाभाविके कल्पजत्वेनोक्तप्रकारान्तरेण जीवब्रह्मणोः संसर्गविशिष्टैकत्वरूपो वाक्यार्थः स वाक्या
र्थ एवं न भवति वस्तुतो भिन्नयोः संसर्गयोग्यानावस्थानाय नं नवेन तादात्म्यानुपपत्तेरित्यर्थः॥८२॥ ननु तस्य प्रकाशस्य ब्रह्मणः स्वरूपभूतमेकत्वम
पि न यथाविधमिति न स्य वाक्यबोध्यत्वे स्वप्रकाशत्वभंग इत्यत आह॥ एकत्वप्रमितिं॥ यदि वाक्यमेकत्वविषयां प्रमितिं न जनयेत्तर्हि तस्य वैयर्थ्यं

इतोन्यथा यो वाक्यार्थः सो वाक्यार्थ इति संस्थापः॥८२॥ एकत्वप्रमितिं वाक्यं न करोति श्रुतेर्वचनाः॥ व्यावहारिकमज्ञानं बाधनेविषये वचनु
॥८३॥ सद्यः प्रमितमेकत्वं स्वत एव न वाचनं॥ अतो न प्रमितिं वाक्यं कुरुते ज्ञानबाधक॥८४॥

ज्ञानमित्यत आह॥ व्यावहारिकमिति वाक्यं स्वजन्यया विषयैवोदीरितब्रह्मात्मैक्यविषयया मनोवृत्त्यान्तरज्ञानं बाधते अतो न निःप्रयोजन
त्वम्यः॥८४॥ ननु केकत्वप्रमितौ वाक्यव्यापारो नास्ति चेत्प्रमाणविषयत्वाभावान्नरविषाणवदसत्तामित्यत आह॥ सद्य प्रमितमिति॥ परप्रका रामः ६२
शरूपं हि प्रमाणविषयत्वं विमितमसद्वदुदीरितमेकत्वं तु स्वप्रकाशचितो नान्यवादादाप्रकाशमानमेवेति नोक्तदोषप्रसक्तिरतो वाक्यस्याविवर
णाज्ञाननिवृत्तावेवोपयोगान स्वरूपप्रकाशे नेत्यर्थः॥८४॥

नन्वज्ञानस्यासत्वे निवृत्त्युपपत्ते ब्रह्मज्ञाने द्वैतस्यापि निवृत्तिप्रसंगादतो न किंचिदज्ञानारब्धं वस्त्वंगीकर्तव्यं तथा च द्वैतापत्तिरित्यत आह॥ वस्तु
न इति॥ वस्तुतः परमार्थतोऽज्ञानं नास्त्येव ब्रह्मस्वरूपभूतचिन्मात्रकाशाविरोधित्वेन तस्याज्ञानस्याज्ञाने जोकविरोधिनस्तमसः रवतत्वस्वरूपत्वो
नासंभवाद तत्स्वरूपे द्वदृष्टिविभ्रमसंस्कारवशाद्ध्यस्तमेवाज्ञानं विद्यानिवर्त्यत इति विचार्यमाणे वस्तुपाधो वाक्यमज्ञानस्यापि बाधकं न भ
वति॥ व्यवहारदृष्ट्यैव तस्याज्ञानबाधकत्वव्यपदेशः॥८५॥ ननु वाक्येनाद्वितीयब्रह्मात्मविषयान्तःकरणवृत्तिः स्वविषयावरणाज्ञाननि

वस्तुतो नास्ति चाज्ञानं चिन्मात्रातिरोधतः॥ अतो वाक्येन चाज्ञानबाधकं च निरूपणे॥८५॥ एकत्वं यत्तु राप्रोक्तं त
स्वयं सद्धुमर्हति॥ न प्रमाणेन मानानि तस्मिन्कुर्वीन्तर्वति हि॥८६॥

वृत्तिकायाजन्यते घटादिविषयरस्यंतरवत्तस्या अपि
विषयप्रकाशनसामर्थ्यं कुतो नेत्यत आह॥ एकत्वं यदिति॥ यद्ब्रह्मात्मनः स्वाभाविकमेकत्वमागुक्तं तत्स्वरूपभूतचित्प्रकाशानन्यत्वा
त्स्वयमेव स्वात्मनैव सेद्धुं प्रकाशितुं अर्हति न प्रमाणवशात्॥ अत्र हेतुमाह॥ मानानीति॥ हि यस्मात्कारणात्स्वरूपप्रकाशनाय प्रवृत्ता
नि प्रमाणानि तेनैव साक्षिरूपेण व्यवस्थितेन प्रकाशमानानि सविदृप्रकाशो न दीपवत्तस्मिन्स्वप्रकाशे चिच्छे चिदात्मनि रूढशक्तीनि न व
ति॥ अत एवाम्नायते न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मन इति॥८६॥

सू॰ ब्रह्मगी॰ ६३

व्यावहारिकमज्ञानमपीति॥ यदाकाशं जगत्याविद्या यानि वर्गसमज्ञानं तदपि वस्तुतो निरूपणे ब्रह्मैव शुक्ला ह्यवध्यस्तरजताद्येव तत्स्वरूपात्
व्यावहारिकमज्ञानमपीति॥ यदाकाशं जगत्याविद्यानिवृत्तिमज्ञानं तदपि वस्तुतो निरूपणे ब्रह्मैव शुक्तावध्यस्तरजतादिवत्तस्य च ब्रह्मणः
अन्यत्वेन तद्व्यतिरेकादित्यर्थः॥ अतस्तद्वस्तुनिरूपणेऽज्ञानमिति व्यवहारोऽपि न युक्त इत्याह। अज्ञानमितीति॥ ७॥ ननु व्यवहारबलादेवाज्ञा
नस्य सद्भावः किं न स्वीक्रियत इत्याह सत एवेति॥ सद्रूपस्यैव हि वस्तुनः सद्भावो न तदितरस्येत्यर्थः॥ ननु सन्घटः सन्पटः सत्कुड्यमिति सद्भावो
नस्य सद्भावः किं न स्वीक्रियत इत्याह सत एवेति॥ सद्रूपस्यैव हि वस्तुनः सद्भावो न तदितरस्येत्यर्थः॥ ननु प्रतीतिबाधान्यथानुपपत्त्या स
त्त्वमुपगत एवेति तत्राह॥ तत्त्वदर्शिन इति॥ अधिष्ठानसत्त्वमेवारोप्यगतत्वेन प्रतिभासत इत्यर्थः॥ ननु प्रतीतिबाधान्यथानुपपत्त्यास

व्यावहारिकमज्ञानमपि ब्रह्मैव केवलम्॥ अज्ञानमिति वात्रापि त्वर्थसद्भाव एव हि॥ ७॥ सत एव हि सद्भावो नाम तत्त्वदर्शिनि॥ सदसत्कोटि
निर्मुक्तमिथ्या कस्यार्थनाशने॥ ८॥ ब्रह्मणा भासते ज्ञानं ब्रह्मैव स्वैककेवलम्॥ ज्ञानसंबंधतो ज्ञानमिति वात्रापि संगता॥ ९॥

इदसद्विलक्षणं न दृश्यते न भासतीति॥ तत्राह॥ सदसत्कोटीति॥ सदसद्वैलक्षण्यप्रतिपादनमपि तदन्याकारनिरूपणे सहत्वप्रतिपादनपरं न
तादृगर्थसद्भावपरं॥ अतएवमिदं द्विधाऽर्थनाशने हि सदसद्विलक्षणं तदित्यपि व्यवहारो नावभासत इति॥ ननु रूपं ब्रह्मैव स्वेच्छाज्ञानविनिर्मुक्तं के
वलं नाभासत इति॥ अन्यस्य भासनेन न संभवतीत्यर्थः॥ ८॥ ननु माभूदज्ञानस्य स्वतो ज्ञानं ज्ञानरूपब्रह्मसंबंधवशात्तु तेन ज्ञानमित्यत्र
काहाज्ञानसंबंध इति॥ ९॥

संबंधिरूपेणेति॥ संबंधस्य संबंधिद्वयसापेक्षत्वाद्ब्रह्मवदिदं ज्ञानस्यापि स्वरूपसद्भावो वक्तव्यः॥ स च सद्भावोऽधिष्ठानब्रह्मगत एवेति न द्वैवसत्के
वलं न ततो रिक्तमज्ञानमिति संबंधिद्वयाभावात् संबंधोऽनिरूप इत्यर्थः॥ ८॥ ननु मा भूद्ब्रह्मण इवाज्ञानस्य पारमार्थिकसद्भावः॥ आरोपि
तसद्भावो विद्यत इति तेनैव संबंधः किं न स्यादिति शंकते॥ अनिरूपितेति॥ विचारासहत्वाकारेणेत्यर्थपरिहरति॥ अनिरूपितेति॥ अविचारित
रमणीयरूपस्याध्यस्तस्याधिष्ठानव्यतिरेकेणासत्त्वं ब्रह्मैवं केवलं स्वरूपं नान्यत्तद्व्यतिरिक्तस्य सर्वस्याज्ञानतत्कार्यस्य तस्मिन्नध्यस्तत्वेन स्वतो निस्वरू

संबंधिरूपसद्भावे सति संबंधसंभवः॥ सद्भावे सति संबंधिरूपं ब्रह्मैव केवलम्॥ १०॥ अनिरूपितरूपेण सद्भाव इति चेन्मतम्॥ अनिरू
५ देवानां तत्तु तथाविधसत्वयोगाभावात हरिब्रह्मादिरूपेणैव स्वात्मानं मनुते॥ न परतत्वरूपेण रुद्रं तु उक्तोपाधिवशात् ब्रह्मादयोपि परतत्वरूपमेव
मन्यन्ते॥ नतु स्वमहत्त्वामित्यर्थः॥ रुद्रः कथंचिदित्यादि॥ यथाहरिब्रह्मादीनां हरिब्रह्मरूपत्वाभिमानः स्वाभाविकः न तथा रुद्रस्य रुद्रत्वाभिमानः किं

परतत्वतया रुद्रः स्वात्मानं मनुते नत्वन्यां॥ परतत्वप्रकाशेन न तथा देवतां न रं॥२६॥ हरिब्रह्मादिरूपेण स्वात्मानं मनुते न त्वं॥ हरिब्रह्मादयो देवा न
तथा रुद्र आस्तिकाः॥२७॥ रुद्रः कथंचित्कार्यार्थं मनुते रुद्ररूपतां॥ न तथा देवाः सर्वब्रह्मस्फूर्त्यतावला तं॥ ब्रह्मविष्ण्वादयो देवाः स्वात्मा
नं मन्यते ञ्जसा॥ न कश्चिद्वत्रतरूपेण न तथा रुद्र आस्तिकः॥२८॥ ब्रह्मविष्ण्वादयो देवाः स्वात्मानमेव तेञ्जसा॥ कथंचित्र तरूपेण न तथा रु
द्र आस्तिकाः॥३०॥ न तत्बुद्धिः स्वतः सिद्धा रुद्रस्यास्य तपोधनाः॥ हरिब्रह्मादिबुद्धिस्तु नेषां स्वाभाविकी मता॥३१॥

नुसंहारादिकार्यार्थं चित्र यत्नवशेन रुद्ररूपेण स्वात्मानं मन्यन्त इत्यर्थः॥ ब्रह्मविष्ण्वादय इत्यादि॥ अयमत्र विविक्षितोर्थः॥ ब्रह्मविष्ण्वा रामः
दीनां सत्वाद्गुणसंबंधविहारे ब्रह्मविष्ण्वादिबुद्धिरेव स्वाभाविकी परतत्वबुद्धिस्तु यत्नसंपाद्या॥ रुद्रस्य तु सत्वोत्कर्षवशात्स्वात्मनः परतत्वबु ५
द्धिः स्वाभाविकी परतत्वबुद्धिस्तु यत्नसंपाद्येति॥ शिवाय नमः॥

एवं परतत्वाविनाविवक्षेण ब्रह्मादिदेवतान्यो रुद्रस्योत्कर्षः प्रतिपादितः॥ अथ तत्साक्षात्मुक्तेः साधनं तत्परत्वादिकमन्यदीयं परं परयेत्याह॥ हरिब्रह्मा
दीनिरुद्राकारतयेति ब्रह्मविष्ण्वादयो हि परतत्वरूपेण श्रेष्ठाः॥ ननु ब्रह्मतत्वविष्णुत्वादिविशेषरुद्रस्य रुद्रात्माकारेणापि देवानां तदुत्कृष्टेन वर्तते

हरिब्रह्मादिदेवान्ये रुद्रत्वं नियथावर्जे॥ अचिराच्च परप्राप्तिस्तेषामस्ति क्रमेण हि॥३२॥ रुद्रं यवेदविष्णुष्टाः रुद्रत्वं नियथावर्जे॥ तेषामस्ति
परप्राप्तिरचिरात्क्रमेण तु॥३३॥ रुद्राकारतया रुद्रो वरिष्ठो देवतान्तरात्॥ इतिनिश्चयबुद्धिस्तु नराणां मुक्तिदायिनी॥३४॥ गुणेभिमा
नितो रुद्राद्धरिब्रह्मादिदेवताः॥ रुद्राकारस्तावरिष्ठा इति बुद्धिस्तु सम्यक् संसारकारणं॥३५॥ परतत्वादयि श्रेष्ठो रुद्रो विष्णुः पितामहः॥
इतिनिश्चयबुद्धिस्तु सम्यक् संसारकारणं॥३६॥ रुद्रो विष्णुः प्रजानाथः संभ्रात्संभ्रात्पुरंदरः॥ परतत्वमिति ज्ञानं नराणां मुक्तिका
रणं मुक्तिकारणं॥३७॥ अमात्येराजबुद्धिस्तु न दोषाय फलाय हि॥ तस्माद्ब्रह्मादिमुख्या सर्वत्र न हि संशयः॥३८॥ तथापि
रुद्रे विशेषः परतत्वमतिर्न्नत्वावरिष्ठा न तथान्येषु परस्फूर्त्यत्यताबलात्॥३९॥

रुद्रतस्य विशिष्टसत्वोपाधिप्रयुक्तत्वादित्यर्थः॥ परतत्वादपीति॥ रुद्राद्ब्रह्मादिदेवतानरादिषु मज्ज्ञानवद्बुद्धसहितानां सर्वेषां देवता
नां परतत्वादाधिकज्ञानमपि संसारकारणमित्यर्थः॥ तस्माद्ब्रह्मादिमतिरिति॥ राजपुरुषे राजबुद्धिवद्धरिब्रह्मादिषु सर्वत्र ब्रह्म
बुद्धिः कर्त्तव्येति सूचितं ब्रह्मदृष्टिरुत्कर्षादिति॥ श्रीनाथजिसत्यहं॥

वहिस्तमः इति॥ रुद्रस्यांतःसत्वं शरीरस्य तेन समस्तसंहाराय वहिरेव स्थितो॥ विष्णोस्तु तमःशरीरं सत्वं तु पालनाय वहिरेवावतिष्टते॥ ब्रह्मणस्तु शरीर
मपि रजोगुणात्मकं वहिरपि सृष्ट्येत देव रजः अतएव सत्वगुणयोद्रु इविष्णुलोके हजनीयो हरेपने॥ ब्रह्मा तु नहरिहात्मा हरांशैघं न प्राप्नोति॥ इत
पि शिवज्ञानं मुक्तिसाधनमित्याहौ निर्विकल्पमिति॥ समस्तमितमकल्पविकल्पज्ञाने एनास्मि ब्रह्मणि एषां निष्टा ते एतेषां मुक्तिरयत्नतः

अस्ति रुद्रस्य विप्रेन्द्राः अंतः सत्वं बहिस्तमः॥ विष्णोरंतस्तमः सत्वं बहिरस्ति रजोगुणः॥४०॥ अंतर्बहिश्च विप्रेन्द्राः ब्रह्मणस्तु प्रजापतेः॥ अ
नोपेत्रयगुणं सत्वं मनुष्या विवदंति च॥४१॥ हरिश्रेष्ठो हरः श्रेष्ठः स्यहो मोहवैभवा॥ सत्वी नाना सुजानाथ वरिष्ठं नेव मन्वते॥४२॥ अनेकजन्म
सिद्धानां श्रौतस्मार्तानुवर्तिनां॥ हरः श्रेष्ठो हरेः साक्षादिति बुद्धिः प्रजायते॥४३॥ महापापवतां नृणां हरिश्रेष्ठो हरादिति॥ बुद्धिर्विजाय
ते तेषां मदासंसारएव हि॥४४॥ निर्विकल्पे परे सत्वे अन्याये पांविजायते॥ अयत्नसिद्धा परमा मुक्तिस्तेषां न संशयः॥४५॥ निर्विकल्पे
परं तत्वं नाममात्राद्धि वः परः॥ सोयमावस्थितेन रवचंद्राद्ह्रतश्वरः॥४६॥ सात्मनत्वसुरवस्फूर्तिप्रमोदानंदवप्रियः॥ रुद्रविष्णुप्रजा
नाथैरुपास्यो गुणमूर्तिभिः॥४७॥ ईदृशी परमा मुक्तिर्यस्मात् साधारणी मता॥ तद्विमाहात्म्यं रतत्वं नान्यत्समं मयोदितम्॥४८॥

सिद्धान्तं च निर्विकल्पे परब्रह्म माहात्म्यं शिव एव स्वलीलया स्वस्यापि शिवत्रात्मात्मक ना मा विधृत्य मुमहेश्वरनारीश्वरविग्रहो जातस्तस्मादीदृशि
ग्रहवान् शिव एव माहात्म्यरतत्वं हरिब्रह्मादयस्तु नाद्ययाविग्रहा शिराहित्यान्न नाहमपरशोभाजइत्यर्थः॥

मतिपादितमर्थं निगमयति॥ तस्मादिति॥ तत्किं रुद्रवैतन्त्रयी हरिब्रह्मादयो जीवा नेत्याह॥ ब्रह्मेति परमात्मविभागस्थाइति प्रतिज्ञातार्थमुपपा
दयति॥ अविद्योपाधिकइति॥ आवया माययेतु मणुगुणरूपो त्वविन्नत्यात्मना चेति॥ ब्रह्मविष्णुरुद्रस्य परतत्वासाधारणरूपतयाभेष्टत्वा॥ तस्मा

द्विष्णुब्रह्माणमन्यं वा स्वमोहप्यन्वते परं॥ न तेषां मुक्तिरेषास्ति नस्तेनपरं पदं॥४९॥ तस्मादेषा परामुक्तिर्विस्याधारणत्वेन॥ स शिवः सविद्वि
नेदृः मात्राच तेन चापरः॥५०॥ ब्रह्मा विष्णुश्च रुद्रश्च विनष्टाअपि यदितः॥ परमात्मविभागस्या न जीवदेहसंस्थिताः॥५१॥ अविद्योपाधि
को जीवो न मायोपाधिकः खलु मायोपाधिकः खलु मायोपाधिकश्चैतन्नपरमात्मा हि नापरं॥५२॥ मायाकार्यगुणच्छन्ना ब्रह्मविष्णुमहे
श्वराः॥ मायोपाधिपरब्रह्मानजीवदेहसंस्थिताः॥५३॥ परमात्मविभागत्वं ब्रह्मादीनां द्विजर्षभाः॥ समानमपि रुद्रस्तु वरिष्टोनात्र सं
शयः॥५४॥ ब्रह्मा विष्णुश्च रुद्रस्य स्वामाधारणं रूपतः॥ स्वविद्वन्नात्मनात्वपि कुर्वन्ति एव संवनं॥५५॥ रुद्रः स्वेनैव रूपेण विष्णो ब्रह्म
ब्रह्मणस्तथा॥ सेवनं नैव कुरुते विन्नत्वाद्वयोरपि॥५६॥

नास्त्ववित्नत्वाच्च तस्यैव सेवां कुर्वति॥ रुद्रस्तु स्वरूपेण विष्णादिसेवां न करोति परतत्वविभागेन स्वानंन्याद्दिति भावः॥ ॥ ॥

सू.गी.
५

ननु तत्र तत्र पुराणादिषु रुद्रोपि विष्ण्वादिदेवतासु अन्तर्गततया निर्दिश्यते तत्कथमित्यत आह। केवलमिति॥ न तथा ब्रह्मणेति॥ यथा लोकानुग्रहा
र्थाधिकेनापि सता रुद्रेण विष्ण्वादिदेवतानुस्यूतेन न तथा ब्रह्मविष्णुभ्यां स्यूतेन ते॥ न च ब्रह्मविष्णुनाऽनयोरपि तत्तद्रूपत्वात्तदन्तर्गततया वपितोपरम

केवलं कृपया रुद्रो लोकानां हितकाम्यया॥ स्वविभूत्यात्मना विष्णौ ब्रह्मण्यपि परस्थितः॥५७॥ करोति सर्वं हे विप्राः कदाचित्सत्यमीरितं॥ न तथा ब्रह्म
णा विष्णुर्न ब्रह्मा न पुरंदरः॥५८॥ तावन्मात्रमालंब्य रुद्रं विष्णुं प्रजापतिं॥ समन्ते हि समं मन्यमाना यथा परिमोहिताः॥५९॥ केचिदेषां महापापाः सा
म्यं वांछंति मोहिताः॥ हे रे जनाः सत्यमुक्तं हरात्साम्यं छुतिकेन न॥६०॥ रुद्रेन साम्यमन्येषां वांछंति च विमोहिताः॥ ते महापातकैर्युक्ता यास्यंति
निरकानेव॥६१॥ रुद्रादुत्कर्षमन्येषां ये वांछंति विमोहिताः पच्यंते नरके नीत्रे महान्तेन हि संशयः॥६२॥ केचिद्रुद्रेन माश्रितैर्वेडाल
व्रतिका नराः॥ साम्यं रुद्रेण सर्वेषां प्रवदंति विमोहिताः॥६३॥

रं प्रजाविनस्यर्थः॥ उक्तमेव रुद्राधिकं देवतांतरसाम्याधिक्यनिंदया प्रति॥ एतावन्मात्रमित्यादिना वैडालव्रतिका इति॥ विडा
लव्रतिका इति॥ विडालो मार्जारस्तस्य मूषकादिजिघृक्षया यनित्यवस्थानं तद्विडालव्रतं तेन तद्युक्ताः॥ केचिस्मरमार्थमिदं
मेक माश्रित्य रुद्रस्यपि सोपाधिकत्वाविशेषाद्धरिब्रह्मादिसाम्यं वदंतीत्येष्व द्रमतिन इत्यर्थः॥६३॥ रामः
७

सोपाधिकत्वेसमानेपि रुद्रस्यैव रुद्रस्योत्कर्ष इति विशेषः दृष्टं तैरुपपाद्यते॥ देहाकारेणेति॥ ननूक्तं नित्यत्वादिवाक्यानि हरिब्रह्मोत्कर्षप्र
तिपादकान्यपि दृश्यंते तत्राह॥ तानीति॥ परतत्त्वाप्तमतानेषामुत्कर्षप्रतिपादनं ननु हरिब्रह्मणाद्यात्मना॥ वाक्यानीति॥ श्रोतानि॥ विद्याधिको रुद्रो

देहाकारेण चैकत्वे समत्वेपि द्विजपुंगवाः॥ शिरसा पादयोः साम्यं सर्वथा नास्ति हि द्विजाः॥६४॥ यथा स्यात्पादयोः साम्यं छिद्रत्वेपि न विद्यते॥ तथै
कत्वेपि सर्वेषां रुद्रस्साम्यं न विद्यते॥६५॥ विष्णुप्रजापतीन्द्राणामुत्कर्षं शंकरादपि॥ प्रवदंतीव वाक्यानि श्रौतानि प्रतिजातिच॥६६॥ पो
राणिकानि वाक्यानि स्मार्तानि प्रतिजातिनीतिव॥ तानि न त्वात्मनानेषामुत्कर्षं प्रवदंति हि॥६७॥ विष्णुप्रजापतीन्द्राणां रुद्रस्योत्क
र्षमास्तिकाः॥ वदंति वाक्यानि तानि सर्वाणि हे द्विजाः॥६८॥ प्रवदंति स्वरूपेण तथा न त्वात्मना पि च॥ नैव विद्याद्रिदेवानामिति तत्त्व
व्यवस्थितिः॥६९॥ बहुनोक्तेन किं जीवास्त्रिमूर्तीनां विभूतयः॥ वरिष्ठा हि विभूतिस्तत्र वरिष्ठा न संशयः॥७०॥

प्रवृत्तिरित्येवमादीनि॥ रुद्राधिक्यप्रतिपादकानि॥ श्रुतिवाक्यानि॥ पौराणिकादीन्यपि तथैवं द्रष्टव्यानि॥ रुद्राधिक्यप्रतिपादकानि
स्वरूपेण रुद्राकारेणोत्कर्षप्रतिपादयंतीति विशेषः॥७०॥

सू.गी.
८

तेषु रुद्रा इति ॥ तेषु ब्रह्मादिषु मायी पर इति ॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति ॥ सिद्धस्त्रिमूर्तीनां कारणभूतः शिवो मायी न स्माद्दवि
सिद्धावस्थापन्नः शिवस्तस्मान्मनाद्विधा प्रतिज्ञासमापन्नः ॥ सत्यादिलक्षणः परशिवः श्रेष्ठः शिवशक्तिगतं परिमसत्त्वमामसामरस्यः स्वरूपः शिष्टः परे
शिवस्ततोपि श्रेष्ठ इत्यर्थः ॥ अत्र परशिवमारभ्योत्तरोत्तरमुपाधितरतमभावेन निष्कर्षः ॥ प्रत्येतव्यः ॥ वेदान्त इति इदं सर्वं यदयमात्मेत्यादिवेदान्तस

तेषु रुद्रो वरिष्ठश्च ततो मायी परः शिवः ॥ मायाविनिर्मुक्तात्सर्ववित्सर्वज्ञात्सांबः सत्यादिलक्षणः ॥७३॥ वरिष्ठो मुनयः साक्षात्तद्विनात्र विचारणा ॥ शि
वाद्वरिष्ठो नैवास्ति मायासंस्पृष्टरीरितं ॥७४॥ शिवस्वरूपमालोक्य प्रवदामि समासतः ॥ शिवादन्यतया ज्ञानं शिव एव न संशयः ॥७५॥ शि
वादन्यतया नायं ज्ञातं शिवयो वेदवेद्यतः ॥ स वेदपारमं तत्त्वं नास्ति संशयकारणं ॥७६॥ यः शिवं सकलं साक्षाद्वेद वेदांतवाक्यतः ॥ स मुक्तो
नात्र संदेहः सत्यमेव मयोदितं ॥७७॥ भासमानमिदं सर्वं भानमेवेति वेदयः ॥ सन्नानरूपं हि वेद्यायातिनात्र विचारणा ॥७८॥ प्रतीतम
खिलं शुद्धं तर्कितं स्वप्रमाणतः ॥ स्वानुभूत्या च यो वेद स एव परमार्थवित् ॥

रित्यर्थः ॥ भासमानमिदमिति ॥ चिदनुविद्धमिदं सर्वं जगच्चिद्रूपे ब्रह्मणि परिकल्पितत्वात्स्वयंप्रकाशज्ञानरूपं ब्रह्मैवेति योज रामः
नीयादित्यर्थः ॥ अत एवाम्नायते चिद्धीदं सर्वं काशते वेति ॥७९॥ ८

जगद्रूपतयेति ॥ शुक्तौ रूप्यवज्जगद्विषयज्ञानस्य मिथ्याज्ञानत्वात्तद्रूपतया प्रपन्नं न प्रपञ्चः सेवपञ्चपञ्चापि नैव प्रपञ्चपतीति ॥ ब्रह्मरूपतया तु भासमानं प्र
संघयितेः प्रपञ्चपति ॥ सरावह्लानी स्यर्थः ॥ प्रतीतमिति ॥ प्रतीत्याविषयीकृतं तदनुभवमपि प्रत्येकं नावात्मकं न वेत्ति तस्य सर्वस्य द्रष्टृत्वधर्मकं तत्त्वा

जगद्रूपतया प्रपञ्चोपि नैव प्रपञ्चपति ॥ प्रतीतमखिलं ब्रह्म संप्रपन्नं हि संशयः ॥७८॥ अप्रतीत
प्रतीतं च सदसच्च परः शिवः ॥ इति वेदान्तवाक्यानि निष्ठमुद्वर्णना ॥७९॥ इति सर्केऽकं कृपया मया
दितं वः ॥ अतिव च माकथितं यथान्तथैव ॥ यदिह हृदये निहितं समस्तमेतन्नरभगोति नियतां मिहेव
सिद्धा ॥८०॥ इति श्रीसूतसंहितायां यज्ञवैभवखंडे उपरिभागे सूतगीतायां द्वितीयोध्यायः ॥

दुःस्पान्यः शिवादन्यन्नास्तीति वेदान्तवाक्यानां तात्पर्यमित्यर्थः ॥ इति श्रीमत्त्र्यंबकपादाब्जसेवापरायणेन माधवाचार्येण विरचि
तायां सूतसंहितातात्पर्यदीपिकायां सूतगीताव्याख्यायां द्वितीयोध्यायः ॥ ॥श्रीरामजि॥

यद्वैतज्ञानमेवेदं न यावत्तांनिश्चाकांक्षेत्युक्तं तत्प्रपाद्यितुमारभते ॥ शिवादिति ॥ सत्यपरानंदेति ॥ शिवस्य सत्यं ज्ञानमनंतमानंदं ब्रह्मेतिश्रुति सिद्धरूपावलोकनआविर्भूतमिति ॥ एतेनशाक्तमतदेवाज्ञानकारणमुत्पद्यते इत्यसत्कार्यवादिनो निराकृताः ॥ अद्वितीय इत्यादि विशेषणैर्लौकिककारणवैलक्षण्यप्रतिपादनं गृहीतकारिपरार्थानिरपुक्तो हि कुलालादिर्घटादिकार्यं सृजति ॥ शिवस्तु द्वितीयः कथमन्यमन्यत्र ह्युक्रकुपाल्यः ॥ विक्रिया

सूत उवाच ॥ शिवात्मन्यपरानंदरूपकाशैकस्वरूपिणः ॥ आविर्भूतमिदं सर्वं चेतनात्मकं ॥१॥ अद्वितीयोऽविकारी चानंतः स शिवः परः ॥ तथापि सृजति माज्ञाः सर्वमेतच्चराचरं ॥२॥ मणिमंत्रौषधादीनां स्वभावोऽपि न शक्यते ॥ किं पुनर्ब्रह्म मायिनं यद्विशिष्टं तो रस्य परात्मनः ॥३॥

द्वितीय इत्यादि कं रूपादि भावेन परिणमंते ॥ शिवस्तु विकारी विक्रियारहितः ॥ अप्रोक्षेन स्वाश्रितया मायया सर्वं जगदिति तत्राह ॥ निर्मल इति ॥ न हि निर्विकारे ब्रह्मणि परमार्थतो मलं संभवति ॥ मायया त्वविचारितस्वभावेन एतत्सर्वमपवास्तवं तत्वादिसमर्थः ॥ एवं लौकिकस्य दृष्टैव जगत्प्रतिपाद्य तथाविधस्यापि स्वरूपमाह ॥ तथापि तिमणिमंत्रादिदृष्टांतेन करणेन तस्य वजनोपपुक्तं प्रभाव विशेषं केसुतिकन्यायेन दर्शयति ॥ मणिमंत्रेति ॥

नतु विदुमिर्मुच्यते ॥ निर्मलो निर्विकारस्य स्वभावोऽपि स्वइति ॥ तत्राह ॥ श्रुतिरिति ॥ तस्या प्रामाण्यशंकावारयति मतातनतीति साहित्यपरामर्शवस्य नैमेना दिकं प्रतिपादयति ॥ तथा तस्मात्परशिवात्कारणात्तु चेतनोऽचेतनात्मकस्य सर्वस्य जगतः सर्गस्थितिसंहृतिस्थितिसंहृतिरिति प्रतिपादयति ॥ श्रुतय आत्मा ॥ यतो वा इमानि भूतानि जायंते ॥ येन जातानि जीवंति ॥ यत्प्रयंत्यभिसंविशंतीति ॥ वैष्यातिकं सूचमपि ॥ जन्माद्यस्य यत इति ॥ ननु दृष्टविरोधे निर्विकारस्य स्रष्टृत्व प्रतिपादका श्रुतिरप्रमाणमित्याशंक्याह ॥ अतींद्रियेति ॥ देशकालस्वरूपविप्रकृष्टा अर्थाः अतींद्रियार्थैः तादृगर्थप्रति

श्रुतिः सनातनी साध्वी सर्वमानोत्तमोत्तमा ॥ माह चाद्वैतनैर्मल्यं निर्विकारत्वमात्मनः ॥४॥ सर्गस्थित्यंतमप्याह चेतनाचेतनस्य च ॥ अतींद्रियार्थविज्ञाने मानं नः श्रुतिरेव हि ॥ श्रुत्यैकगम्ये सूक्ष्मार्थे मनकः किं करिष्यति ॥ मानानुग्राहकस्तर्को निस्त्वनंचकदाचन ॥६॥

तिपत्तौ श्रुतिरेव हि प्रमाणं ॥ तस्मिन् श्रुत्यैकसमधिगम्ये सूक्ष्मार्थे प्रमाणसहीनस्तर्कः किं करिष्यति ॥ श्रुतिगतार्थस्य प्रत्यक्षादि प्रमाणान्तरा ॥ ननु तत्र तर्केण न किंचित् यत्तायोगात् ॥ ननु तर्कोऽपि प्रमाणान्तरवत्स्वयमपि स्वातंत्र्येणार्थं अवस्थापकत्वमित्याह मानेति ॥ तर्कस्य निःक्रमो ॥ प्रत्यक्षादेः प्रमाणस्य तर्कोऽनुग्राहकोऽनुमेव ॥ परंतु विपक्षे जिज्ञासाविच्छेदलक्षणमनुग्रहः इति ॥

अप्रामाण्यं हि अर्थान्यथात्वकरणदोषज्ञानाभ्यां भवति न च तदुभयमप्रामाण्यकारणं अत्रैवाविद्यत इति प्रतिपादयितुं वेदापौरुषेयत्ववादिमीमांसकमतं सर्वज्ञप्रणीतत्ववादिनैयायिकमतं च क्रमेणोपन्यस्यति ॥ श्रुतिः सनातनीति विभिन्ना श्रुतिश्शंभोः परमेश्वरस्य काकाचागादृशीत्यन्ये ननु तेनापि बुधा विरचितेत्यर्थः ॥ यत एव श्रुतिस्मृतीतरतः ॥ वाचाविरूपया नित्ययाज्ञानादिनिधना नित्या वागुत्सृष्टा स्वयंभुवेति च ॥ नैयायिकास्तु श्रुतिर्वा समागमइतिनश्वरतः श्रुत्याणां वेदानां सर्वज्ञेश्वरप्रणीतत्वेन प्रामाण्यं मन्यन्ते ॥ तत्र तावद्वेदापौरुषेयत्ववादिनां मीमांसकानां मतेन श्रुतिप्रमाणस्य दोषासंभ

श्री श्रुतिः सनातनी शंभोरपि व्यक्तानमंशयः ॥ शंकरेण प्रणीतेति प्रवदंत्यपरे जनाः ॥ ७ ॥ यदा सा नादिनित्यैव न दामा
नमती वसा ॥ स्वतश्चापरतो दोषो नास्ति यस्माद्विजर्षभाः ॥ ८ ॥ स्वतो दोषो न वेदस्य विद्यते सूत्रमदर्शनि ॥ अस्ति
चेद्व्यवहारस्य लोप एव प्रसज्जते ॥ ९ ॥

वमाह ॥ यदेति ॥ श्रुतेः स्वात्मस्वरूपतो दोषो नास्ति विशिष्टार्थप्रत्यायकत्वात् ॥ नापि परतः अपौरुषेयत्वेन पुरुषदोषाणां तत्रानुप्रवेशाभावात्स्वतो निर्दोषित्वात् उपपादयति स्वत इति ॥ ननु उदितानुदितहोमादिविरुद्धार्थप्रतिपादकत्वात् स्वाभाविको दोषो विद्यत इति चेन्न तत्रापि सूत्रमदर्शनीति ॥ आपातत एव स विरोधाभिरूपणेऽधिकारिभेदेन व्यवस्थितत्वात्तत्र विरोध इत्यर्थः ॥ अस्ति चेदिति ॥ शास्त्रप्रमाणस्य परिदोषसद्भावः स्वाभाविकः स्यात्तदा तदधीनसकलव्यवहारलोपप्रसंगः ॥ ९ ॥

परस्येति परतोऽपि दोषो नास्ति परस्य विरचयितुः पुरुषस्यानंगीकारादित्यर्थः ॥ परतःप्रामाण्यवादमभ्युपेत्य निरस्यति ॥ स्वतो दुष्टोऽपीति ॥ स्वतोदुष्टस्यापि श्रुत्यस्यन्याप्रामाण्येन दासप्रणीतत्वहेतुनमिति यत्परतः प्रामाण्यवादिवात्मन इष्यते तन्मात्रमेव ॥ नदेवेउपपादयति ॥ स्वतो दुष्ट इति ॥ यदि श्रावः स्वतोदुष्टः स्यात् कथं तर्हि तस्यास्संगमात्प्रामाण्यं भवेत् स्वाधीनं वतत्प्रामाण्यं वाद्येप्रतिनासमान स्फटिके जपाकुसुमलौहित्यवदारोपितं स्यात् ॥ तथा च श्रु

परतश्चेन्न दोषोऽस्ति परस्याभावतो द्विजाः ॥ स्वतोदुष्टोऽपि शब्दस्तु मानमेवान्यसंगमात् ॥ १० ॥ इति वक्तापि वा नैव मुनीशाः सूत्रदर्शिनि ॥ स्वतोदुष्टः कथं मानं भवेदन्यस्य संगमात् ॥ ११ ॥ यत्संबंधमयोपाधिर्यस्य प्राज्ञाः प्रसिध्यति ॥ न तस्य जातिरेव स्यात्तन्मावः कथं चन ॥ १२ ॥ जपाकुसुमलोहितं विभाति स्फुटिके द्विजाः ॥ तथापि तस्य लौहित्यं जातिरेव न वास्तवं ॥ १३ ॥ वह्निपाकजलोहित्यमिष्टिकायां तु वास्तवं ॥ लोहित्यं तेजसांशास्तत्र नेष्टिकायां निरूप्यते ॥ १४ ॥

तिरकत्वं भाविनास्यर्थः ॥ ननु तत्र जपाकुसुमस्योपाधेः संनिधानादारुण्यप्रतीतिः स्फटिके त्वौपाधिकी स्यात् क्वचिद्दर्शनांतरेण परतः प्रामाण्यवादिनां तादृशी प्रामाण्यस्य भ्रान्तित्वमुपपादयति ॥ वह्निपाकजेति ॥ यदग्रे रोहितं रूपं तेजसस्तद्रूपमिति श्रुतेः ॥ लौहित्यस्य तेजोधर्मत्वात्ताकनिमिष्टिकामुत्पन्नमीति ॥ भ्रान्तिरिति न तु स्वाभाविकी ॥ १५ ॥

मृ.गी०
११

र्द्वैविध्यमुक्तानस्य विज्ञमरूपतां वक्तुं लक्षणमाह ॥ अन्यत्रेनिवसंतं नरेशं स्वादौ पित्रादि वसंतं तरगात पीतिमाद्विधर्मसंसर्गप्रतिज्ञासो विज्ञमो मिमतः ॥ त्र
तस्मिन्नस्तु द्विविपर्ययरनितलक्षणयोगात् ॥ किंच परतः प्रामाण्यं क्वचिद्दपि नाख्यानेन लक्षनं इत्याह ॥ आप्तापेक्षीति ॥ आप्तप्रणीतत्वेन शब्दप्रामाण्यं गीकारेऽपि
न विज्ञानेन नन्दापि ज्ञानिष्या ॥ नच स्वप्रामाण्याय संवादकमन्यज्ज्ञानमपेक्ष्यते ॥ तदेव अपि मिमतवस्थास्यादतः सर्वप्रकारेणापि आप्तप्रणीतत्वापेक्षया शब्देनप्र
माणं भवितुमर्हति ॥ ननु शब्दस्वरूपमात्रानुबंधि चेत्प्रामाण्यं तर्हि विप्रलंभवाक्यानामपि तत्स्यादित्यत आह ॥ अनाप्तेति ॥ अनाप्तबुद्धिप्रभवतया कारणदो

अनवाप्तानस्य धर्मस्य प्रतीतो विभ्रमो मतः ॥ आप्तापेक्षी तु शब्दस्तु प्रामाण्याय न सर्वथा ॥१५॥ अनाप्तयोगाच्छब्दस्य प्रामाण्यं मुनिपुंगव स्वतः
सिद्धं तिरोभूतं सनाच्छायहिके वलं ॥१६॥ यद्वासाशंकरेणोक्तानदापिश्रुतिरास्तिका ॥ प्रमाणं तु तदा मासं तम एव महेश्वरः ॥१७॥ सर्वदोषवि
हीनस्य महाकारुणिकस्य च सर्वज्ञस्येश्वरस्यैव कथं दोषः प्रकल्प्यते ॥१८॥

ष सद्भावात्स्वतः सिद्धं प्रमाण्यं तत्रापोद्यत इत्यर्थः ॥ एवं निस्त्वप्रशस्तस्वतः प्रामाण्यं प्रतिपाद्य सर्वज्ञेश्वरप्रणीतत्वपक्षेऽपि प्रामाण्यं समर्थयितेन ॥ यद्वेत्या
दिना तस्याप मैं नमत्तमुपपाद्य दुष्यितुं निर्दोषतामाह ॥ सर्वदोषेति रागद्वेषादयो दोषाः तैः सर्वैर्विहीनस्यात एव महाकारुणिकस्य लोकानुग्रहेकशी
लस्य शुद्धस्यावरणमलापेतस्यात एवानावृतज्ञानतया सर्वज्ञस्य शिवस्य कथं दोषः कल्पयितुं शक्यते ॥ तो वेदस्य तत्प्रणीतत्वेऽपि तदीयदोषभा
वेन तत्प्रयुक्तमप्रामाण्यं मन्तव्यमित्यर्थः ॥ रामः
११

सर्वदोषविरहाद्दीनामात्यंतमनमहेतुत्वविशारदयितुं नैत्यस्वभावस्यानादित्वे हेतुमाह ॥ सर्वदोषेति ॥ उक्तहेतुनिर्मलिनो जीवोयं स्वरूपता स्मरणे न निर्मलो भवति ॥ तस्मै
निष्पापाद कस्यकथं मालिन्यं संभवतीत्यर्थः ॥ नन्वाहात्मेसप्रामाण्यं परपिनत्प्रणीतानां वेदानां प्रामाण्यं स्वधवसानमपि ॥ एवं वादिविप्रतिपत्तिमुद्दाहृत्य उत्तरं यथाविप्र
माण्यं प्रतिपाद्य तत्र स्वाभिमतं पक्षमाह ॥ वेदो नादिरिति ॥ परमार्थनिरुक्तवेदो नादिः आदिरहितो निःश्वासः शिवस्य तत्स्यात्मिव्यंजकः ॥ ननु तु बुद्ध्या विरच्यते ॥

सर्वदोषविनिर्मुक्तस्य निर्घृणस्य दुरात्मनः ॥ आत्मज्ञस्य च जीवस्य दृष्टान्तस्ति हिंसितं भ्रमः ॥१९॥ यस्य स्मरणमात्रेण समलो निर्मलो भवेत् ॥
भूतसत्तनपो निष्कलं कथं समलिनो भवेत् ॥२०॥ अथ परुद्धये नापि वेदो मानं न संशयः ॥ वेदो नादिः शिवस्तस्य व्यंजकः परमार्थतः ॥२१॥ त्र
ज्ञिवज्ञिमप स्यैव प्रणते तु च ते शिवः ॥ तस्माद्देदो पदिश्तार्थोयि यार्थो नात्र संशयः ॥२२॥

यथावस्थितार्थाभिव्यंजकत्वमपौरुषेयत्वं वेदस्य प्रणीतेष्वपि व्यवहारः ॥ अत एवोक्तं ॥ कत्र्यपि ब्रह्मवेदस्य नरश्चक्रिमनोन्मन ॥ क्रमणं करोति वा सूत्रपातो
मं न एणमिति ॥ एवं चक्रो तेः स्वतः सिद्धस्य प्रामाण्यस्यापवादाशंका वा यथावस्थितार्थप्रतिपादकत्वं सिद्धमिति निगमयति तस्मादिति ॥२३॥

सू॰गी॰
२२

श्रुतिप्रसिद्धेन प्रपञ्चकर्तृत्वमुपपादयितुमनुवदति॥ इहेत्यादिना॥ प्राहेत्याद्वैतेनेति मत्स्वमित्यादिना परशिवः स्वाद्वितीयमविकारत्वादिकं चेतनेनात्म
कस्य कृत्स्नस्य जगतः॥ तत्प्रकाशात्स्पष्टं श्रुतेनैतावन्मतिज्ञानं॥ नेत्सएवेति॥ तच्चराचरात्मकं सर्वं जगन्मायादिभिर्भिन्नं शिव एव रूपं परशिव एवेत्यर्थं संवि
द्रूपैः अस्तंतमसहितज्योगपतात्त्वेन तन्मध्यस्तं वाधिष्ठानाद्व्यतिरिक्तमिति रज्जुसर्पादौ दृष्टमिति मायाकल्प्यस्यास्तीरिएवमविरोधेमति नामरूपात्मना विकृतं ज
गद्विकृतपरशिवस्वरूपं कथं भवेदित्येवमादिचोद्यस्यानवसरः॥ निर्विकाररूपं जगद्रूपं तु योरुभयोरपि श्रुतिसिद्धत्वादित्यर्थः॥ श्रुतिसिद्धमित्यत्राथै

इहातावन्मया प्रोक्तमद्वितीयः परः शिवः॥ तथापि तेन सकलं निर्मितं तन्म एव हि॥२४॥ चित्स्वरूपः शिवश्चैतं जगत्सर्वं चराचरं॥ सत्यास
निर्विकृतं जगद्गन्तुः कथं भवेत्॥२५॥ इत्येवमादिचोद्यस्य द्विजं ज्ञानास्ति संभवः॥ यत्र वेदविरोधः स्यात्तत्रैवोद्यस्य संभवः॥२॥ चो
दनालक्षणो धर्मे न यथा चोद्यसंभवः॥ तथा न चोदनागम्ये शिवे चोद्यस्य संभवः॥२६॥

चोद्यासंभवं सदृष्टान्तमाह॥ चोदनालक्षणमिति॥ अथातो धर्मजिज्ञासेति जिज्ञास्यां प्रतिज्ञातधर्मस्वरूपमेव लक्षितं॥ चोदनालक्षणो ध
र्म इति लक्ष्यतेऽनेनेति लक्षणं प्रमाणं चोदनेति क्रियायाः प्रवर्तकं वचनं॥ यथा चोदनाप्रमाणकेधर्मेऽस्ति यागादि साधनत्वेन प्रतिपादितेया
दृविप्रतिपत्तिर्नास्ति एवमुपनिषद्विधिरूपवेदान्तवाक्यप्रतिपाद्ये परमशिवस्वरूपेऽपि परिचोदनानयुक्तेत्यर्थः॥२६॥ रामः
२२

बाध्यबाधकेति॥ यथा व्याघ्रिनेपजयोः बाध्यबाधकता कः शास्त्रेण बोध्यते॥ न ह्येवेश्वरस्वरूपं प्रपञ्चजनकत्वं च बाध्याबाधकतया वेदेन प्रतिपाद्यते॥
नान्यस्मानां न तत्सिद्धिरित्यर्थः॥ अतः श्रुतिगम्य एतादृग्विधोर्थ इति निगमयति॥ ईश्वरस्येति॥ अन्येष्विति॥ सर्वादिवेदैर्वा नाद्रिय इत्यर्थः॥ एवं मायाप्रु
पञ्जीयैवश्रुतिप्रामाण्यबलान्परिशिवस्य निर्विकाररूपत्वं जगद्रूपत्वं चोभयं प्रतिपादितमिहानीतु किं विचारेण मायैव सविरोधः परिहृियत इत्याह॥
अथचेत्यादिना॥ सर्वदुर्घटकारिणीति विरुद्धार्थघटनमेव तस्याः शीलमित्यर्थः॥ निर्विकारस्य परमेश्वरस्येदृग्विधशक्तिसद्भावं श्रुतावश्वनरावामनंति॥

बाध्यबाधकतावस्तु व्याघ्रिनेपजयोर्यथा॥ शास्त्रेणगम्यनेतदृश्यमर्थो पिनान्यतः॥२७॥ ईश्वरस्यस्वरूपे च जगत्सर्गादि बुद्धिजाः
॥ कृतीद्वियाप्येयन्येषु मानं तः श्रुतिरेव हि॥२८॥ अथवा देवदेवस्य सर्वदुर्घटकारिणी॥ शक्तिरा॥२९॥ तेन यासर्वं घटते मायया तयाः॥
प्रतीति सिद्धामामाया न ततोत्र न संशयः॥ नयादुर्घटकारिण्या सर्वं तस्योपपद्यते॥

न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते॥ परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति॥ सिद्धा माया
ति॥ न त्वनस्तत्त्वम् नान्यरमेश्वरान्सा च माया सिद्धान्तेस्मिन्नाश्वतानत्परंतेत्रेतियावत्॥ यद्वाशावाप्रसिद्धशिवशास्त्रादित्वमर्थं तन्मायामरि
गणितवासासायेत्यर्थः॥ तथा चोक्तं॥ मायाचवस्तुस्वरूपामूलं विश्वस्य नित्यासेति॥३०॥

वेदमानेनेति ईदृग्विधमायासन्नावक्ष्कतिप्रमाणेवत्नादिति विज्ञव्यानया चैतेन प्रमाणेन किं दृष्टमविरुद्धं वाद्यस्मिन्नित्याद्युनेन तत्सर्वं नवैव रूपेनवं॥ विप
रीतं बाधकमाह॥ चोद्यानहीति॥ नन्वपि अयेव्यतिरिक्तप्रमाणपरित्यागे न वेदस्यैकस्यैव समाश्रयणे कारणमाह॥ रूपावलोकनमिति॥ रूपोपलब्धौ य
था चक्षुरिन्द्रियोकेनस्यैव चक्षुर्धारणकारणं एवं धर्माधर्मादिविज्ञाने वेदस्यैवासाधारणं प्रामाण्यमित्यर्थः॥ न दृष्टाधारणं समदृष्टं न भिन्नतरनिषेधेनोप
पादयति॥ स्वरूपावलोकनस्येति॥ एवंभावाय सिद्धार्थस्य पर्यनुयोगासंभवं प्रतिपाद्य प्रतिज्ञातमेवार्थं निगमयति तस्मादिति॥ नथापीति य

सानिष्टतुमहामायासर्वदुर्घटकारिणी॥ वेदमानेन संसिद्धं सर्वं संग्राह्यमेव हि॥२१॥ चोद्यानर्हं तु वेदार्थे चोद्यं कुर्वन्पतत्यधः॥ अतः सर्वं परि
त्यज्य वेदमेकं समाश्रयेत्॥२२॥ रूपावलोकने नेत्रं तु यथा साधारणं भवेत्॥ तथा धर्मादिविज्ञाने वेदो नाधारणः परः॥२३॥ रूपावलोकन
स्येदं यथा ग्रहणं न कारणं॥ तथा धर्मादिबुद्धेस्तु भिन्नात्मकेनि कारणं॥२४॥ तस्माद्वेदादिते नैव प्रकारेण महेश्वरः॥ अद्वितीयः स्वयं शु
द्धः जगत्रतः आविर्भूतं तिरोभूतं तस एव सकलं जगत्॥२५॥
यद्यपि एकमेवाद्वितीयं नेह नानास्ति किंचनेत्यादिश्रुत्या परमार्थतः॥ परशिवस्व
रूपं निर्विकाराद्वितीयतादिलक्षणं नित्यशुद्धबुद्धमुक्तस्वभावं तथापि मायाशक्तिवशात्तस्मिन्नेव प्रलतिरिदं कारस्यहे सकलं जग
दाविर्भवति पुनः सर्वनामास्ते॥ एवं च निर्विकारत्वं जगद्रूपत्वं चउभयमपि वेदसिद्धमिति न तत्र विप्रतिपन्नव्यमित्यर्थः॥२५॥

रामः
२३

ननु निर्विकारस्य सतः परशिवस्य जगद्रूपत्वेन नानात्वं सर्वथा विरुद्धमिति चेत्॥ तत्राह॥ वैभवमिति॥ तस्य परशिवस्यैष महिमा यदयं यन्निर्विका
र एवाविर्भवति तिरोभावधर्मकजगदात्मना वभासत इति॥ अनेनतत्क्षणं निरस्या कर्तुं शक्त इत्यर्थः॥ स एवेति॥ युक्तस्वात्मतत्त्वार्विधप
रशिवस्वरूपतां ज्ञानं सर्वजगद्रूपतां पश्यतिम एव तस्य रूपं ज्ञातुं यस्तदुपरान्तौ निमित्तेनेतरोऽज्ञः॥ तत्केवलं पुरुषा एव वेदोऽपि परशिवस
रूपानुविद्ध एवं च शास्त्रतीन्द्रियार्थस्यज्ञासक इति सदृष्टांतं प्रतिपादयति॥ यथायमिति॥ अग्निनातत्समयोऽयथा नदीयान्याहत्रका

वैभवं चैतस्य विज्ञातुं न शक्यं भाषितुं मया॥ स एव साहसी साक्षात्सर्वरूपतया स्थितः परिज्ञा
तुं चैव शक्नोति समर्थो नापरः पुमान्॥२६॥ यथायः पावकेनेद्धं भाति वह्निरतीव च॥ तथा वे
दशिवेनेद्धः सर्वं शक्नोति नान्यतः॥२७॥ अयोवयवसंक्रान्तो यथा रहति पावकः॥ तथा वेदे तु सं
क्रान्तः शिवः सर्वार्थसाधकः॥२८॥
ज्ञासंप्रयुज्यनेनेद्धं देहोऽपि सर्वविन्मसकेन सर्वज्ञेन शिवेनेद्धः सन् सर्वमतीन्द्रियमप्यर्थ
जातं वक्तीव प्रतिपादयतीवा॥ नासन्तउवाचा॥ स्वव्रायोपरमार्थे सर्ववस्तु प्रतिपादनसामर्थ्यं नानं चानयमपि स्वप्रकाशस्य शास्त्रएव तदेव
तदेवतत्कार्यं वेदगतं सतद्दीयत्वेनासनदस्मर्थः स्वयं विरतणोतिन्नयोवयवेत्यादिना॥२८॥

तथापि वेदरहितं इति॥ यद्यपि स्वयं शिवः सर्वविभासकस्तथापि वेदोपाधिनवच्छिन्नो साधारणप्रकाशकत्वं च धर्मादिवस्तुन्यसाधारणं प्रमाणं वेदो
पि सर्वविभासकेन परशिवेन विना स्वयमपि जडत्वान्न प्रमाणमित्यर्थः॥ उक्तमर्थं निगमयति तदिति॥ सर्वविभासकेन परशिवस्वरूपेणोद्भासप्रका

तथापि वेदरहितः स्वयं धर्मादिवस्तुनि न प्रमाणं विना तेन वेदोपि द्विजपुंगवाः॥४४॥ तस्माद्देशो महेशोद्भासप्रमाणं सर्ववस्तुनि॥ अन्यथा नश्वरः शब्दोऽती
न्द्रियार्थस्य साधकः॥४५॥ महापाशैर्वतपत्स्वाद्दृष्टांशं तुं न गच्छति॥ अयमर्थोपि याज्ञातस्तत्तस्य प्रसादतः॥४६॥ तस्माद्दत्तैव विप्रेन्द्राः संहि
तेयं मयोदिता॥ अहं हरस्तथा विष्णुरस्माकं महतामपि कः॥४७॥ अत्र नवं साक्षिवस्याज्ञा लंघनीया न केनचित्॥ शिवस्याज्ञाबलाद्विष्णुर्जयिते
म्रियतेपि च॥४८॥ ब्रह्मा सर्वजगत्कर्ता विराट् सम्राट् स्वराडपि॥ स्वरोष्टुतरवः सुधा ब्रह्मविस्मादयो नवन्॥४९॥ तस्माद्गुरुतमेव विप्रा गुरुतमेन
हि संशयः॥ शिष्यत्वं चापि युष्माकं मत्ततः खलु शंकरः॥५०॥ महादेवस्य सक्रोध्य मरुत्कानपि देहिनः॥ स्वतंत्रा वेद्गेशाः किंपुनः समहे
श्वरः॥५१॥॥

ज्ञानसाध्यं॥ सत्य मत्रिलोकशिवविषये वेद एव प्रमाणं न वन्यत्यर्थः॥ उक्तार्थस्यातिरहस्यत्वं ज्ञापयितुं स्वस्य तत्प्राप्तिप्रकारमा
ह॥ मेरुपार्श्वे इति॥ देवतांतरेभ्यः शिवस्य स्वातंत्र्यं प्रतिपादयति॥ शिवस्याज्ञेत्यादिना॥

विषं भुक्तमिति॥ समुद्रमथनसमये जातं कालकूटाख्यं विषमित्यर्थः॥ तस्मात्स्वतंत्रपरशिवप्रसादादेव मया परमाद्वैतमुपदिष्टं तस्मात्स्वं सर्वं
मवात्मज्ञानं परित्यज्य यथोहेयोपादेयविवेकज्ञानी पुरुषः परमाद्वैतमेव जानीयादित्यर्थः॥ तज्ज्ञानस्य परमपुरुषार्थस्वरूपत्वमाह॥ विज्ञानेनेत्या
दिना॥ तस्मात्परमाद्वैते प्रमाणमुपन्यस्यति॥ श्रुतिस्मृतीति॥ नान्यतर्कैरिति॥ आगमविरुद्धैस्तर्कैरागमैकसमधिगम्यं तदद्वैतस्वरूपं

स्वातंत्र्याद्धि शिवेनैव विषं भुक्तं विना मृतं॥ ब्रह्मणश्च शिरश्छिन्नं विष्णोरपि तथैव च॥५२॥ स्वातंत्र्यादिहृतं तेन मुनींद्रा ब्रह्मवादिना॥ तत्प्र
सादान्मयापि सर्वं विदितं करबिल्ववत्॥५३॥ प्रसादबलतः साक्षात्कृत्वात्मा यथा कथितो मया॥ प्रसादेन विना वक्तुं को वा शक्तो मुनीश्वराः
॥५४॥ तस्मात्सर्वं परित्यज्य श्रद्धया परया सह॥ मदुक्तं परमाद्वैतं विद्याद्देहादिकं बुधः॥५५॥ विज्ञानेन विनान्येन नास्ति मुक्तिर्न सं
शयः॥ अतो द्वयमपि प्राज्ञाः न वनाद्वैतवादिनः॥५६॥ परमाद्वैतविज्ञानं सिद्धं स्यादनुभवेन च॥ श्रुतिस्मृतिपुराणाद्यैस्त
केर्वेदानुसारिभिः॥५७॥ परमाद्वैतविज्ञानमेव यावत्तथा स्थितं॥ नान्यत्र कैश्चिदुक्तं तमिदं मान्त्रिय वाक्यजं॥५८॥ विनैव परमाद्वै
तं हं केचन मोहिताः॥ कल्पयंति निरूपांगं सद्वितीयो न विष्यति॥५९॥

नावाधनीयं॥ अन्नएवात्मा परमेश्वरैकेण मतिरपनेयं॥ प्रोक्तान्येनैव सूक्तानापमष्टेति॥ पत्रकैक्तं परमानन्देन नाचेतनाचेत
नात्मकस्य जगतः॥ ततो भेदं मतं नेष्यं यथाविधव्यवहारो मोहकृत इति प्रतिपादयति विनैवेति॥ सद्वितीयो न विष्यतीति एकमे
वाद्वितीयमिति श्रुतिसिद्धमद्वैतं व्याहतेत्यर्थः॥५९॥

नेदृशी नाम्नी मोहकारणमाह॥ वेदसिद्धमिति॥ वेदैकसमधिगम्यं परमाद्वैतं तद्दृनः को नाम ज्ञातुं शक्नुयात्॥ ईश्वरानुग्रहसमासादितनिःश्रुतिप्रमा
णेकनिष्ठः पुरुषो हि तद्ज्ञातुमर्हतीत्यर्थः॥ नेदृशं नेदृशं यत्तोपि न युक्तं स्यादित्याह॥ नित्रा नित्रेदृशेति परिप्रमाणसिद्धं स्यात्तद्धि नेदृशं नेदृशं यत्तो कल्पतेन
नत्विन्द्रियादिस्तीत्याह॥ नेदृशं नेदृशमिति॥ नेदृशं निरूपणमिति॥ तस्मिन्मिथ्यात्वे हेतुर्नेदृशस्य प्रमाणेन निरूपयितुमशक्यत्वादित्यर्थः॥ अनिरूप
णे कारणमाह॥ धर्मादिरिति॥ इदमाद्यादिकमिति नेदृशत्वं धर्मिप्रतियोगिज्ञानाधीनं सच धर्मिप्रतियोगिज्ञानं नेदृशं तेन नो

अस्मा याथार्थ्यमहाद्वैतं नैव ज्ञानं नियेजनाः॥ वेदसिद्धं महाद्वैतं को वा विज्ञातुमर्हति॥ ५३॥ नेदृशं नित्रमनत्वादेवं परमाद्वैतलक्षणं॥ कल्पयंति म
हामोहात्केचित्तत्त्वसंगतं॥ ५४॥ नेदृशं नेदृशमिति नेदृशं मिथ्या न वतिसत्त्वमाः॥ नेदृशं निरूपणादेव धर्मादिरनिरूपणात्॥ ५५॥ तत्
स्मान्नास्तीत्यत्र राद्धान्तः किंचिदप्यस्ति कोत्र माः॥ द्वितीयाद्वैतयं नेतो न वितित्याहुर्हि श्रुतिः॥ ५६॥ को मोहः को न शोकः ए
कत्वमनुपश्यतः॥ इतिचाह हि सा साध्वी श्रुतिरद्वैतमास्तिकाः॥ ६०॥ एकत्वमेव वाक्यार्थो नापरं परमास्तिकाः॥ स्तनिनि
देविहध्येतमेद्रोयद्विविविर्तितः॥ ६२॥

त्मा न्यो न्याश्रय चक्रकानवस्थादिदूषणानां प्रसक्तेस्तद्धेतुकं नेदृशत्वं निरूपणत्वं दुर्वचा
मस्य दृशामेधायेस्वरूपत्वेन वाध्यमो द्विप्राधर्मत्विनेवराभिः॥ अपि वक्त्रा नेना पिवक्तनेन निरूप्यत इत्यादिना प्रपंचितं॥ प्रतिपादितमिदं
नेउपसंहरति॥ तस्मादिति॥ ५७॥ तत्र श्रुतिप्रमाणयति॥ द्वितीयाद्वैतमिति॥ वाजसनप्याम्नायते॥ ५८॥

द्वितीयाद्वैतं वै भवति॥ तत्र को मोहः कः शोक इत्यद्वैतज्ञानस्य शोकनिवर्तकत्वमिति द्वितीयाद्वैतमयं भवतीति द्वैतज्ञानस्यानिष्टत्वं तेऽपि नेदृशवि
वक्षायां विरुध्येतेऽत्यर्थः॥ तत्रैतादृशो वेदवाक्यमधायानामपि संसारिणो दृष्टास्तत्राह॥ अनीवेति॥ परमेश्वरार्पणबुद्ध्यानुष्ठित

अनीवशुद्धिचित्तानां केवलं करुणाबलात्॥ परमाद्वैतमाश्रयाश्रमिनाति श्रद्धयासह॥ ६३॥ शिवनदारकस्ये
वप्रसादेपुधलेसति॥ परमाद्वैतमात्मा नियथावन्नान्यहेतुना॥ ६४॥ न जातिपरमाद्वैतं प्रसादरहितस्यतु॥ दुर्ल
नःस्वलदेवस्यप्रसादः परमास्तिकाः॥ ६५॥ अतश्चवेदादिन॥

नित्यनैमित्तिकपरितोषितपरशिवप्रसादवतामेव वेदादीदगार्थप्रतिपत्तिर्जायते नान्येयात्यर्थः॥ ६३॥ ॥३६५॥ ॥

॥ ॥इति श्रीमत्त्र्यंबकपादाब्जसेवापरायणेन माधवाचार्येण विरचितायां सूतसंहितातात्पर्यदीपिकायां

यमैत्यनैव विहाय वादान्तरजन्मबुद्धिं॥ विमुक्तिकामः परमाद्वितीयं स
ता श्रयेदेव शिवस्वरूपं॥२५॥ ॥इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञ
वैभवखंडस्योपरिभागे सूतगीतायां तृतीयोऽध्यायः॥३॥

यज्ञवैभवखंडस्योपरिभागे सूतगीताव्याख्यायां तृतीयोऽध्याय॥ ॥३॥ ॥ ॥ ॥

स्तु मद्वितीयाद्ब्रह्मणः परमेश्वरसंभवमाशंक्य निष्प्रमाणप्रबलानन्तमायाशक्तिवशात्तस्माज्जगत्सृष्टिरुपपन्नेति प्रतिपादितं तां स्थितिं विस्तरेण
प्रतिपादयितुमारभते॥ ईश्वरो जगतः कर्त्तेति॥ तत्र तावत्स्वरूपविधानोपोद्घाततत्त्वेन प्रलीनावस्थाप्रतियाधतो योयज्जगत्कर्त्ता ईश्वरः सृष्टि
कालोपसंबंधिन्या ययासत्त्वरजस्तमोगुणात्मिकया एकीभावेन तिष्ठति तस्मात्स्वीययेति विशेषणेन तु मायाख्या निमित्तेन प्रकृतिवत्मायया स्वा

॥सूत उवाच॥ ॥ईश्वरो जगतः कर्त्ता मायया स्वीयया पुरा॥ अनेनैव स्थितः सर्वकस्त्वथ सनयाचितः॥१॥

तं अभ्युद्धरामः॥ यद्यपि स्वजीनावस्थायां स्विप्रतिष्ठे ब्रह्मणि स्थितायाः स्वगोचरत्वात्तावान्तर्विशेषेण प्रतीयते॥ तथापि मायाब्रह्मस्वरूपविस्म
कार्शेनैव नास्य तदितिना॥ सत्वमत्त एव मायायाः स्वगणस्तत्कालीनमवस्थानान्तर्वीसृक्ष्मे मायाकार्याणां विपर्यहारित्वतत्तत्कालीनप्रसे
नानां मायागतवासनापरिरक्षाचितः एवं तथनीमा ईश्वरो जवतीत्यर्थः॥१॥

सू॰सं॰टी॰
५१७

साच माया प्रलीना यस्यामपि लीना महे नोरन्नावादविदुःखे सती अनन्यायतनवतिष्ठते पुनरसौ मायी ईश्वरः॥सिसृक्षति तदा केन क्रमेण सृजतीति सः प्रतिपाद्यते॥कालकर्मेति॥प्राणिनां परिपक्वपुण्यपापात्मककर्मफलभूतसुखदुःखोपभोगार्थं हि पारमेश्वरी जगत्सृष्टिः॥तानि च प्राणिकर्माणि यदा कालवशात्परिपक्वानि भवन्ति तदा तानीतत्कर्मानुगुण्येन स्वरूपादभिन्नया स्वसंबन्धिन्या मायया स्वयमेकोऽपीश्वरस्तया मायया स्वस्य भेदं परिकल्पयति॥स्वयमेकः शक्तिमता मायया चान्येति॥एतच्च भेदपरिकल्पनं तयैव माय

कालकर्मानुगुण्येन स्वाश्रितस्वीयमायया॥अभिन्नोऽपि तथा स्वस्य भेदं कल्पयति प्रभुः॥३॥कल्पितोऽयं द्विजा भेदो नाभेदं बाधते सदा॥कल्पितानामवस्तुत्वाद्विरोधश्च न सिध्यति॥४॥पुनः सर्वेश्वरत्वेन स्वात्मवासनया जनान्॥ईक्षिता सर्वविद्भूत्वा स्वशक्त्या परया युतः॥५॥

यासोपाधिकस्येति द्वयं॥असंगोदासीनकूटस्थचिन्मात्ररूपस्य परशिवस्य निरुपाधिकस्येदंविधव्यवहारानुपपत्तेरित्यर्थः॥नाचीश्वरेण भेदोऽपि निर्मितः स्वेच्छया इत्याशंक्याह॥कल्पितोऽयमिति॥ईश्वरेण मिथ्याभूतत्वेनैव कल्पितत्वात् नवास्तवाभेदबाधो न संभवतीत्यर्थः॥२॥कुत इत्यत आह॥कल्पित स्वरूपादेरवस्तुत्वदर्शनादेकस्मादधिकल्पितत्वाविरोधात्तथात्वमुपपन्नम्॥अतएव वस्तूपाधिभेदः मायोपाधि रामः
भेद इति भिन्नविषयत्वात्तयोरविरोधश्च सिध्यति॥३॥पुनः सर्वेत्यादि॥एवं मायाः स्वस्य च भेदं परिकल्प्य पुनः सर्व १७
स्मिकाल्ये मायासंबन्धिनो यो गुणः॥४॥

सत्वरजस्तमोरूपास्तत्क्रमेण तत्तद्वासनाबलेन तदुपाधिकः परशिवः सर्वकस्य वेदितानन्तास्रष्टा जगत्सर्जनोन्मीलनं करोति तथाचाम्ना
तं॥तदैक्षत बहु स्यां प्रजायेयेति॥एवमस्मिन्नवस्थायां स्वकीयया मायाख्यया सहितः सन्पुनः प्राणिकर्मवशात्तस्या मायायाः प्रविभक्तान्गुणान्॥
सत्वरजस्तमोलक्षणैः तदुपाधिवशेन रुद्रादीन्सृष्ट्वा तेषामन्तर्यामितया परिस्थितिस्थित्यादिव्यापारेषु तीर्थं तु स्वयमपीश्वरः प्रविष्टवानित्यर्थः॥

मायाया गुणभेदेन रुद्रं विष्णुं पितामहं॥सृष्ट्वानुप्रविशत्येषामन्तर्यामितया हरः॥६॥तेषां रुद्रः परानन्दात्मरतनवदेववु॥करोति सर्गस्थि
तिं तत्तद्रूपेण सत्तमाः॥७॥संहरत्यविशेषेण जगत्सर्वं चराचरं॥विष्णुरप्यात्मिकाः साक्षात्परानन्देन केवलं॥८॥करोति सर्गस्थिती तं
विष्णुरूपेण हे द्विजाः॥पालयत्यविशेषेण जगत्सर्वं चराचरं॥९॥ब्रह्मापि मुनिशार्दूलाः परानन्देन केवलं॥करोति सर्गस्थित्यन्ते ब्रह्मरू
पेण सत्तमाः॥१०॥करोति विविधं सर्वं जगत्स्वस्वविधानतः॥शारीरं तमसः स्कन्द परस्यैव शिवस्य तु॥१०॥सर्वे तिः करणं तावत्स
महेशः सृष्टिरात्मिकाः॥त्रिमूर्तीनां हरस्यैव प्रधान्येन न संशयः॥११॥

तेषां रुद्र इत्यादि॥एतेन च मायागुणोपाधिकत्वान्मायया जीवो
पाध्यविद्यावस्थाश्रययायामोहकत्वाभावात् स्वात्मनः परतत्त्वरूपानुसंधानेनानन्देनावस्थितास्तथाचैषां परतत्त्वरूपत्वसाधारणस्वरू
पत्वं तु प्रतिनियतं॥तच्च परतत्त्वरूपेणैव तत्र यो यः सृष्टिस्थितिसंहृतीनां कर्तारः प्रतिनियतरुद्रादिरूपेणानुसंहन्तारो रेकेकत्रा
रेत्यर्थः॥७॥१०॥शारीरादीत्यादि॥११॥

सू.सं.टी. ४२८

सू.टी.

यद्यपि ब्रह्मविष्ण्वादयो मायागुणेनैव संनास्तथापि शब्दतन्मात्रादिजनकेन सूक्ष्मविषयहारित्वात्सृष्टिकर्माधिनः परशिवस्यैव तनुरजोगुणाधिक
सम्बन्धिनः तत्त्वस्य सत्त्वगुणासक्तस्य तन्मात्राणां पंचमहाभूतात्मना परिणामरूपाणि नाम अंतःकरणानि तेषां समष्टिः सकलसत्त्वांशारब्धे हिरण्यगर्भ
मंतःकरणं न समष्टिस्तु चिन्मात्रा॥ त्रीनाम अरुद्रस्यैव सरवल्लू निरविज्ञाय सतो पाधिकतया सावंशि न हरिब्रह्मणे हि ज्यो विशिष्यते इत्युक्तं॥ न

प्राणो नाम विभेर्वेषां समष्टेः सृष्टिरात्मिका॥ अपि रुद्रस्य तस्यैव प्राधान्येन न संशयः॥१२॥ सर्वज्ञानेंद्रियाणां तु समष्टीनां द्वि
जनिर्द्विजाः॥ त्रिमूर्तीनां हरस्यैव रस्यैव प्राधान्येन न संशयः॥१३॥ सर्वकर्मेंद्रियाणां तु समष्टीनां जनिर्द्विजाः॥ त्रिमूर्तीनां हरस्यै
व प्राधान्येन न संशयः॥१४॥ तथापि परमात्मा नेपि विष्णो रस्यं न त्रिमूर्तीनां तु कारणं॥ बलवित्तु महेशानो सृष्टा वुपकरोति
च॥१५॥ उपचारेण तथा नेपि स्वष्टा रश्मिगृह्यते॥ न चापि तत्त्वतः स्रष्ट्रत्वे वाद्यमस्तिका॥१६॥

तथा यानि॥ समष्ट्यंतःकरणस्रष्टो रुद्रस्य स्रष्टृत्वं तथापि त्रिमूर्तीनां कारणत्वं परशिवस्वरूपं तद्बलविष्ण्वादिरनुगतेन तत्कर्तृस्रष्टा व रामः
पुपकरोति॥ अतः सर्वस्य परशिवस्यैव परमार्थतः स्रष्टृत्वं न तद्ज्ञानबलान्विष्णुब्रह्मादयोपि उपचारेण स्रष्टार उच्यन्ते इत्यर्थः॥१५॥१६॥ ४२८

व्यष्टयस्तु समष्टिरुच्यते॥ यथा च विषयहारित्वात् जगत्सावित्सत्त्वांशोपरब्धं समष्ट्यंतःकरणं तथा तद्गतसर्वरजोंशैकारब्धसमष्टिप्राणः॥ एकैकतन्
तन्मात्रसर्वसत्त्वांशारब्धानि हैरण्यगर्भाणि समष्टिरूपाणि ज्ञानेंद्रियाणि॥ तथा एकैकतन्मात्रसर्वरजोंशारब्धानि हैरण्यगर्भाणि समष्टिकर्मेंद्रिया
णि॥ एवमीश्वरेणांतःकरणादीनां समष्टिषु उत्पादितासु तेषां व्यष्टयस्तु समष्टिसकाशाद्देवजायंते॥ समष्ट्यंतःकरणादिषूपाधिकएवेश्वरो व्यष्ट्यं
तःकरणादीनि सृष्टेत्यर्थः॥ समष्टिषु विजायंत इति॥ तासु अंतःकरणादिसमष्टिषु वर्तमाना देवताः स्वस्वकर्मानुसारेणोत्पद्यंते॥ समष्टिस्त

व्यष्टयस्तु समष्टिभ्यो जायंते ब्राह्मणोत्तमाः॥ समष्टिषु विजायंते देवताः स्वस्वकर्मवत्॥१७॥ समष्टिस्तरूपा
णां सृष्टानां पालको हरिः॥ रुद्रस्तेषां तु संहर्ता द्विजा रूपांतरेण च॥१८॥ पादेवतानां अंतःकरणसमष्टेस्त्वीक
स्यवत्॥ विज्ञानाम मुनिश्रेष्ठाः रुद्रवागजनिर्द्विजाः॥१९॥ जाताः प्राणसमष्टेर्या सूत्रात्मा समाकेरु
यः॥ दिग्वाय्वर्कजलाद्याश्च पृथिव्यात्मक देवताः॥२०॥ जायंते क्रमशश्चैव प्रमुखेषु समष्टिषु॥
पारपाण्यादिषु प्राज्ञाः कर्मेंद्रियसमष्टिषु॥२१॥

ष्टिरूपाणां सृष्टानां पालकः॥ परिरक्षितस्य सत्त्वशेन हरिस्तेषां सर्वेषां पालकः॥ रुद्रस्तु सर्वात्मनः सृष्टानामपि समष्टीनां रूपांतरेण परतत्त्वरूपं रूपांतरं
रुद्रत्वाकारएव तेन संहर्ता अपि त्वनीत्यर्थः॥ अथ समष्टिषु विज्ञानाः देवताः क्रमेण दर्शयिति॥ पादेवेत्यादिना॥ अंतःकरणसमष्टेर्याः दे
वताः जायंते सा हिरण्यगर्भो निधेयेत्यर्थः॥ एतच्च शिवमाहात्म्यखंडे हिरण्यगर्भस्वामी वैष्णवीमात्रादिना विस्तरेण प्रतिपादितं॥१९॥ जाता
प्राणसमष्टेर्विति॥२०॥ प्रायः शुद्धा इति प्राणसमष्टेर्जायमानाया॥

देवतास एव सूत्रात्मेति उच्यते॥ तदपि प्रागुक्तं॥ समष्टिरूपतः प्राणोऽनन्तश्चेत्याणः शिवाज्ञया॥ तत्रस्थो भगवान्विष्णुः सूत्रात्मेति प्रकीर्तित इति॥ समष्टि-
रूपेषु श्रोत्रादीन्द्रियेषु वागादिकर्मेन्द्रियेषु जायमानान्देवान्दर्शयति॥ दिग्वाधित्यादिना॥ जलाधिपो वरुणः॥ त्रिविक्रमेन्द्रप्रमुखा इति॥ प्रमुखग्रहणे-
न वागग्निमानित्वेन स्वमाणस्य आरूपः संगृहीताः समष्टिषु विज्ञाता इति॥ समष्ट्यन्तःकरणादिषु या देवताजाताः व्यष्टौ ते नियन्तारो भवन्ति॥ त

त्रिविक्रमेन्द्रप्रमुखा जायन्ते देवताः क्रमात्॥ समष्टिषु॥ वीजाजाता या देवतास्ता यथाक्रमं॥२२॥ व्यष्टिरू-
पेन्द्रियाणां तु नियन्त्र्यो देवता द्विजाः॥ मारुतस्त्वगधिष्ठाता दिग्देवी कर्णदेवता॥२३॥ नेत्राभिमानी सूर्य-
स्याज्जिह्वाया वरुणस्तथा॥ घ्राणाभिमानिनी देवी पृथिवीति प्रकीर्तिता॥२४॥ अग्निर्वागभिमानी स्यादुप-
स्थस्य प्रजापतिः॥ वायोर्मित्रोऽभिमानी स्यात्पादस्यापि त्रिविक्रमः॥२५॥ इन्द्रो हस्तनियन्ता स्याच्छिवः
सर्वनियामकः॥ मनो बुद्धिरहंकारश्चित्तं चेति चतुर्विधं॥२६॥

व्यष्टिज्ञानेन्द्रियाणां दर्शयति॥ मारुत इति॥ कर्मेन्द्रियाणामपि तद्दर्शयति॥ अग्निर्वागित्यादिना॥ शिवः सर्वनियामक इति॥ एतेषु वाय्वादिषु
अधिष्ठातृदेवेषु तद्रूपेणावस्थितः शिव एव सर्वस्य नियामकः॥ वाय्वादीनामपि नियन्तृत्वेन परमार्थतो नियन्तृत्वाधिष्ठातृदेवेषु तद्रू-
पेणावस्थितः शिव इत्यासंजवादित्यर्थः॥२२॥२३॥२४॥२५॥२६॥ रामः ५१७

अन्तःकरणचतुष्टयस्य क्रमेण देवता दर्शयति॥ एवं सूक्ष्मभूतानां तत्कार्याणां च समष्टिव्यष्टिभावेनावस्थितानां साधिष्ठातृकाणां सृष्टिं प्रतिपाद्य
स्थूलभूतानां तत्कार्यस्थूलप्रपंचस्य सृष्टिं प्रतिपादयति॥ आकाशादीनीत्यादिना॥ स्वप्नवदिति॥ यथा वै स्वप्ने भोक्तृभोग्यभोगायतनरूपेण त्रिधावस्थि-
तः प्रपंचो नु दृश्यते॥ एवमेव परमेश्वरमायया निर्मितं जाग्रदादिलक्षणं जगत्स्वप्नवत् भासत इत्यर्थः॥ ननु मायायाः अपि कैश्चिद्वस्तु-
त्वमंगीकृतमतस्तन्निर्मितस्य जगतोऽपि प्रागवस्तुत्वं किं न स्यादित्यत आह॥ माययेति॥ यस्मान्मायाकार्यं तत्सर्वं निरूपणे

स्यादन्तःकरणे प्राज्ञाः क्रमादेतेषु हि देवताः॥ चन्द्रो वाचस्पतिर्विप्राः साक्षात्कालाग्निरुद्रकः॥२७॥ शिवो वेति मया प्रोक्ताः
साक्षाद्देहान्तपारगाः॥ आकाशादीनि भूतानि स्थूलानि पुनरास्तिकाः॥२८॥ जायन्ते सूक्ष्मभूतेभ्यः स्वर्वकस्येय यथात-
था॥ अण्डं देहास्तथा लोकाः देहेषु च चेतनाः॥२९॥ अन्नेन तानि चान्यानि भौतिकानि च सर्वशः॥ विजायन्ते च भो-
गार्थं चेतनानां शरीरिणां॥३०॥ भोक्तारः पशवः सर्वे शिवो भोजयिता परः॥ सुखदुःखादिसंसारो भोगः सर्वमिदं सु-
राः॥३१॥ स्वप्नवद्देवदेवस्य माययैव विनिर्मितं॥ मायया निर्मितं सर्वं माययैव हि निरूपणे॥३२॥

रणेऽद्भुतमायैवेत्यंगीकार्यं कारणव्यतिरेकेण कार्यं नास्तीति छांदोग्यश्रुतिव्याख्यानावसरे पश्यभवणमात्रेणेत्यादिना प्रतिपादि-
तत्वात्॥ एवं हि तच्छ्रुतिः॥ वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यनेन वा वधारणेन कार्यस्य घटशरावादेः
सर्वस्य मायावैविनिरूपणानिर्धारिता॥ अतः कार्यस्यापि तदव्यतिरेकोऽवगंतव्यः॥३२॥

नहिमाययैवदेहाद्यनिरिक्तमत आह ॥ माययापीति ॥ यद्दिमायापुपादानवस्तुत्वेनतास्यात्मनादेहादेनसात्मनादेहादेनसंमायाकोयः ॥ साक्षिचिन्मात्ररूपेयरशि
वस्वरूपेब्रह्मणिविक्रियमाणाजगदुपादानत्वेनकल्पिता ॥ अतःसाधिविक्रियमाणाशुक्तिरूप्यादिवदधिष्ठानाद्ब्रह्मणोनव्यतिरिच्यतइत्य
र्थः ॥ व्यवहारदृशेति ॥ व्यवहारदृश्यैवमायापरिकल्पितंनतुवस्तुतः ॥ प्रातीतिकरूपेणैवव्यवहारस्योत्पन्नत्वादितिभावः ॥ यद्वस्तुपार
मार्थिकंनदर्शयति ॥ वस्तुतइति ॥ मायारूपतयेतितत्पारमार्थिकंब्रह्मैवाविद्यमानयानत्कार्यंजगत्क्ष्वादिनेदन्त्वमस्याधिष्ठानंस

कारणव्यतिरेकेणकार्यंनैवहिदृश्यते ॥ मायापिकारणत्वेनकल्पितामुनिपुंगवाः ॥ ३३ ॥ अधिष्ठानातिरेकेणनास्तिनत्वनि
रूपणे ॥ व्यवहारदृशामायाकल्पनानैववस्तुतः ॥ ३४ ॥ वस्तुतःपरमाद्वैतंब्रह्मैवास्तिनचेतरत् ॥ मायारूपतयासाक्षाद्ब्रह्मै
वसतिभासते ॥ ३५ ॥ जगज्जीवादिरूपेणव्यवहारेवसर्वदा ॥ स्वस्वरूपापरिरेकेणब्रह्मणोनास्तिकिंचन ॥ ३६ ॥ तथापि
स्वातिरेकेणभातिहादेववैभवं ॥ जगदात्मतयायत्नप्रपञ्चंनेनविमुच्यते ॥ ३७ ॥

सत्त्वदात्मनाभासमेवेनतुततोऽतिरिक्तंकिंचिदस्तीत्याह
॥ स्वस्वरूपेति ॥ स्वस्वरूपातिरेकेणप्रतिभानेकारणमाह ॥ तथापीति ॥ जगदात्मतयेति ॥ यत्रजगद्रूपेणज्ञानंसंसारकारणं ॥ सर्वसविका
रप्रपंचमस्यइदंसर्वंयदयमात्मेत्यादिश्रुतिप्रमाणबलेनब्रह्मात्मनाज्ञानंमोक्षसाधनमित्यर्थः ॥ ३६ ॥ ३७ ॥

नत्वापरोक्षज्ञानस्यविशेषमाह ॥ सर्वमेतदिति ॥ यदेतत्सर्वंजगद्ब्रह्मेतिश्रुत्यावोधितंमननंनिदिध्यासनाभ्यांसमुपजातेनस्वानुभ
वेनसाक्षात्कुर्वंस्तत्क्षणकालमेवसंसारान्मुच्यतइत्यर्थः ॥ एतद्वेवपरेति ॥ सर्वमेतदिति ॥ प्रमाणतःकर्तुर्वेगुरूपदेशात्तत्त्व
साक्षाच्चज्ञाचिनावस्थानिश्चयाल्लभ्यते ॥ तथाविधंतज्ज्ञानंस्वस्वरूपज्ञानंनिवर्तयितृकतरज्जोग्यायेनस्थानेनेवचि
न्मात्ररूपेणावशिष्यतइत्यर्थः ॥ स्वात्मनाकेवलेनेति ॥ केवलेननिरस्तसमस्तोपाधिनास्वप्रकाशचिन्मात्ररूपेणैवतिष्ठन्से

सर्वमेतत्परंब्रह्मपश्यन्स्वानुभवेनतु ॥ मुच्यतेघोरसंसारात्सद्यएवनसंशयः ॥ ३८ ॥ सर्वमेतत्परंब्रह्मविदित्वासुदृढंबु
धाः ॥ मानतश्चानुभूत्यैवगुरुभक्त्याप्रसादतः ॥ ३९ ॥ ज्ञानप्राकट्याकुल्यात्तज्ज्ञानंचस्वात्मनैवतु ॥ स्वात्मनाकेवलेनैव
तिष्ठन्मुच्येतबंधनात् ॥ ४० ॥ एवंवेदवेदार्थमुच्यतेसनुबंधनात् ॥ सोपानक्रमतश्चैवंपश्यन्नात्मानमद्वयं ॥ ४१ ॥
सर्वंजगदिदंविप्राःपश्यन्नपिनपश्यति ॥ आत्मानमिदंसर्वंभिन्नरूपंपरंपदं ॥ ४२ ॥

संसारबंधविनिर्मुक्तोभवति ॥ ४० ॥ सोपानक्रमतइति ॥ प्रथमंश्रवणज्ञानंतस्यचमननंतन्निदिध्यासनमात्मानुभवयथाक्रमेणपुन
निःशेषसंशयाच्छेदेनज्ञानप्राकट्यनाशस्तस्यापिज्ञानस्यस्वरूपचिन्मात्रेपर्यवसानमित्यनेनसोपानक्रमेणेत्यर्थः ॥ पश्यन्
नपीति ॥ प्रज्ञजनव्यवहारदृशायांचक्षुरादीन्द्रियैर्जगत्वस्तुजातंतद्विकारणब्रह्मात्मनैवाविदन्पश्यति ॥ ४२ ॥

एतदेवाविनाशयति॥ भासमानमिति॥ चित्प्रकाशबलेन भासमानं सर्वं जगच्चिन्मात्ररूपं विकारजातमेभ्यः परं पदं परतीयं निरतिशयानंदरूपत
याप्रासव्यं ब्रह्मवेदांतवाक्यरूपेण प्रमाणेन ज्ञानमस्य पाएव विमुच्यते॥ ४२॥ पश्यतइति॥ उक्तविधमनद्वितीयं स्वात्मतत्वं दर्शक्रियानावालक्षक
र्त्तभावेनैवापश्यन्नेव स्वरूपप्रकाशेन यः पश्यति॥ तस्येत्यर्थः॥ ४३॥ जगदात्मतयाभानमिति॥ यथा स्वात्मविषयं ज्ञानं ततः स्वात्ममात्रेण

पश्यन्नेवेदं तन्मानेन सएव विमुच्यते॥ एवमात्मानमद्वैतमपश्यन्नेव पश्यन॥ ४३॥ जगदात्मतया भानं समपि स्वात्मैव केवलं
॥ विरिंचेवं महायोगी जगतानेति निश्चलं॥ ४४॥ यथात्मानमिदं सर्वमनुजानाति चात्मना॥ ४५॥ निषेधनिचतत्सिद्धिरस्तु
ज्ञानस्य केवलं॥ तत्सिद्धिनिषेधोस्यासिद्धसिद्धी चतस्य न॥ ४६॥

वृत्ति॥ तथा जगदात्मतयाभानमपि विषयज्ञानादिनिर्मुक्तस्वात्मके
वलं स्वात्मैव भवति॥ अद्वितीयात्मदर्शनेन जगतोप्यस्वात्मत्वादिति भावः॥ इत्थं सम्यग्ज्ञानवतो जीवन्मुक्तस्य स्थितिप्रकारमाह॥ विरिंचेति वपि
ति॥ एवं निर्विचिकित्सितं ज्ञात्वात्मानं विद्वानुत्तमः स्वात्मनावयपि स्वयं निश्चलो भवति॥ तेनैवास्य मेवकोस्मोरयति॥ यथेति॥ येन येन प्रकारेण
यदिदं भासमानं सर्वं साक्षिरूपेणानुक्रमेण जानाति॥ ४३॥ ४४॥

स्वविषयमानं च निषेधनिस्वात्मना नादर्शयति॥ साक्षिचैतन्यासनेवनावात्मकं द्विविधं जरवतिष्ठते प्रकाशायतीत्यर्थः॥ तस्माप्रतीयमानस्यासिद्धिस
त्ताव॥ स्वसिद्धिरसत्तावश्यैनेत्युत्पन्नमनुज्ञानस्य निषिद्धस्य च न भवति॥ ननु ज्ञातुर्निषेधुश्च चिन्मात्ररूपस्यात्मनस्तैः सिस्यध्यसिद्धी नवाता॥ अस्य
तु केवलं चित्प्रकाशात्मतयाच्या परोक्षेणावतिष्ठितिरेव न भवति॥ न च तस्यामवस्थायां तत्ज्ञानविलसीगज्ञानं न कार्यं जपद्याकिचिरपिविघ
नेन कार्यस्य ज्ञानेन निवर्त्तिनत्वात्तस्मात् कनककरजानायेन स्वयमेवजीनत्वारित्यर्थः॥ प्रकाशात्मनेयेति॥ एतदपि परकर्ह्यं पकरूपं

प्रकाशात्मतयासान्तावतिष्ठितिरेवास्य केवलं॥ विद्यते नैव विज्ञानं नाज्ञानं न जगत्सदा॥ ४७॥ प्रकाशात्मतया सान्तावतिष्ठितिरि
त्यपि नाप्यणं॥ अहं वदाम्यपि मोहेन तत्वतस्मिन्न विद्यते॥ ४८॥ तस्यनिष्ठा मया वक्तुं विज्ञातुं वन शक्यते॥ अस्त्रमात्रेण
यत्किंचिज्ज्ञात्यनेनांतरेतसा॥ ४९॥ इतिसुरमिदं कथितं मया निरितोभवति पदहृदयंगमं॥ हरपंकजजोचनपालि
तं विरिंचे वरविहेवसः॥ ५०॥ ॥ इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभवखंडे उपरिभागे सूतगीतायां च
तुर्थोध्यायः॥ ॥ ४॥

वासं तत्त्ववस्तु परम्मेषु स्वेव प्रायोक्तं स्वसतते॥ अद्वितीयेवस्तुनीदृग्विधवासप्रयोगोपि मरद्या
नविलसितदतित्रभुवनात्मतेन तस्य च वास्तु समगमस्यतप्रतिपाद्यते॥ ४९॥ ॥ इति श्रीस्कंदपुराणे सूतसंहितातात्पर्यदीपि
कायां यज्ञवैभवखंडे सूतगीतायां चतुर्थोध्यायः॥ ४॥ । इत्थं परागर्थप्रपंचमायरशिवस्वरूपात्माया पावकास्सृष्टिं प्रतिपाद्य
तदुपजसितमद्वितीययरशिवस्वरूपमेव मोक्षार्थिभिस्तस्यमितुपरिदं॥ ॥

अथाऽहमर्थविवेकेनापि तत्स्वरूपं प्रतिपादयितुमुपक्रमते॥ वक्ष्यामीति॥ अहमर्थस्य चिन्मात्ररूपतां वक्तुं प्रसिद्धं बुद्धेरात्मविषयत्वमहं बुद्धे
रात्मविषयत्वं लोकं सिद्धमिति निरस्यति॥ इदं बुद्धिरित्यादिना॥ एवं व्यवस्थित इति॥ इदमहं बुद्ध्योरनात्मविषयत्वे एवं लोकेन एव सिद्धे

॥सूत उवाच॥ ॥वक्ष्यामि परमं गुह्यं युष्माकं मुनिपुंगवाः॥ विज्ञानवेद्यसंभूतं सर्वज्ञानामनुत्तमम्॥१॥ इदं विष्णुप्रजानाथप्रमुखा
ः सर्वचेतनाः॥ स्वरसेनाहमित्यास्फुरितमित्यापि स्वतः॥२॥ इदं बुद्धिरहं वा च यथैवैते हि बुद्धिस्तथात्मनि॥ प्रसिद्धा सर्वजन्तूनां वि
वादो न न कस्यचित्॥३॥ इदमर्थे घटाद्यर्थेऽनात्मत्वं सर्वदेहिनाम्॥ अहमर्थे तथात्मत्वमपि सिद्धं स्वभावतः॥४॥ एवं समस्तज
न्तूनामनुभूतिर्व्यवस्थिता॥ ज्ञातान्यपि न कुर्वन्ति विवादं चात्र सत्तमाः॥५॥ एवं व्यवस्थिते ह्यर्थे सति विवादं चात्र सत्त
माः॥५॥ एवं अवस्थिते ह्यर्थे मतिबुद्धिमतां वराः॥ संसारविषवृक्षस्य मूलच्छेदनकांक्षिभिः॥६॥ यत्र यत्रेदमित्येषा बु
द्धिर्दृश्यत्वभावतः॥ तत्र तत्र त्वनात्मत्वं विज्ञातव्यं विचक्षणैः॥७॥ यत्र यत्राहमित्येषा बुद्धिर्दृश्यस्वभावतः॥ तत्र तत्र तथा
त्मत्वं विज्ञातव्यं मनीषिभिः॥८॥

सति मोक्षार्थिभिः सर्वत्र इदंकारास्पदेऽनात्मत्वं ज्ञातव्यमहंकारास्पदे त्वात्मत्वं ज्ञातव्यं॥२॥३॥४॥ ॥ ॥॥

न तु शुद्धचिदेहेंद्रियादौ ममेदं शरीरमहं मनुष्य इत्येवं प्रत्ययादर्शनेन तत्र कथमित्याशंक्याह॥ शरीर इति॥ इदमहंबुद्ध्योरुभयोर्नियतत्वात्सत्वगतौ
विषयत्वेनैकत्रासंभवात् बुद्ध्याभिन्नविषये कल्पद्वये॥ तत्र सांप्रतिचिदात्मनो विविक्तस्य तस्य देहेंद्रियादिकं नरालंबनेदं बुद्धिः स्यादनुभवतो नि
दंरूपत्वेऽपि चिदाभासस्वलक्षणयोगेन यौक्तिकविवेकाभावादध्यवादि व इदंकारास्पदत्वात्॥ अहंबुद्धिस्तु देहेंद्रियादेः सांप्रतिचिदात्मात
दालंबना॥ अहं मनुष्यः स्थूलोऽहं कृशोऽहमिति मनुष्यत्वादेर्धर्मयुक्तदेहेंद्रियादि सामानाधिकरण्यादहंप्रत्ययस्य तद्विषयत्वमनु

शरीरे दृश्यते सर्वैरिदं बुद्धिस्तथैव च॥ अहं बुद्धिश्च विप्रेंद्राः न न स्तोभिन्नगोचरे॥९॥ शरीरालंबना बुद्धिरिदमित्यास्ति
कात्र माः॥ चिदात्मालंबना साक्षादहं बुद्धिर्न संशयः॥१०॥ इदमर्थे शरीरे तु याहमित्युदिता मतिः॥ सा महाभ्रान्तिरे
व स्यादस्मिंस्तद्व्यवहत्वतः॥११॥ अविद्यमं हं बुद्धेऽपींदं नालंबनं नवेत्॥ मत्पिंडादिसदृष्टत्वात्तेनात्मैव विग्रहः॥
१२॥ अविनाद्रियाणां च प्राणस्य मनसस्तथा॥ आलंबनत्वं नास्त्येव बुद्धेश्चाहं मतिं प्रति॥१३॥

ननु सिद्धमिति चेत्तत्राह॥ इदमर्थ इति॥ चिदाभासत्वलक्षणयोगात् मिश्रितेदमर्थे शरीरादौ जायमानोऽहं॥ प्रत्ययः स्फटिके रक्तिमवु
द्धिकैवमर्थातिरेकस्यादतस्मिंस्तद्बुद्धिविषयः इति तं लक्षणयोगादित्यर्थः॥ स्वतकार्यत्वादपि देहे नहि बुद्धेर्विषये इत्याह॥ अवि
द्यमिति॥ अन्न परिणामरूपत्वाज्जडपिंडं स्थूलं शरीरं तावदहं प्रत्ययस्य नालंबनं तदालंबनत्वस्य मत्पिंडादौ जडे दृ
ष्टत्वात्तनोहंबुद्ध्यालंबनत्वात्स्थूलदेहो नात्मा॥ ११॥ १२॥

इन्द्रियादीनामपि तदनालंबनत्वं प्रतिपादयति ॥ अचित्त्वादिति ॥ स्थूलदेहवदिन्द्रियादीनामप्यचिद्रूपत्वसामान्यादहंप्रत्ययानालंबनत्वं ॥ नन्विन्द्रि-
यादीनां चिदाभास्यत्वादहंप्रत्ययविषयत्वं बुद्धिस्तु चिद्रूपैवेति तस्याः स्यादालंबनत्वं युक्तमित्यत आह ॥ बुद्धेरिति ॥ उत्पत्तिविनाशौ हि जडधर्मौ न
योग्यौ द्रष्टुरप्यवशाम चिद्रूपत्वमस्तु येन व्या ॥ अयं भावः ॥ विमता बुद्धिरचिद्रूपा उत्पत्तिविनाशधर्मवत्त्वाद्घटादिवदि– ति ॥ व्याप्तिं दर्शयति ॥ अचिद्रू

बुद्धेरचित्त्वं संग्राह्यं दृश्यत्वाज्जन्मनाशयोः ॥ अचिद्रूपस्य कुम्भादेः
खलु जन्मविनाशनं ॥१४॥ अहंकारस्य चाचित्त्वाच्चित्तस्य च तथैव च
॥ आलंबनत्वं नास्त्येव सदाहंप्रत्ययं प्रति ॥१५॥

प्रत्ययेति ॥ एवं मनोबुद्ध्योरचित्त्वेनानात्मत्वं प्रतिपाद्याहंकारचित्तयोरेतत्प्रतिपादयति ॥ अहंकारस्येति ॥ एतयोरपि सत्त्वपरिणामरूपा- राम:
न्तःकरणकार्यतया चिदाभास्यत्वेन जडत्वाद्घटादिवदहंप्रत्ययानालंबनत्वमित्यर्थः ॥१४॥१५॥ ५२३

नन्वहंप्रत्ययस्याहंकारानालंबनत्वं व्याहतमित्यत आह ॥ सर्वप्रत्ययेति ॥ अहंबुद्धिस्तावदात्मैकविषये तु कमहंकारस्तावदहात्मा न भवति
॥ अहं सुखी दुःखी त्येवं सर्वप्रत्ययरूपेण विचत्रमानत्वात्तस्यापि विकारित्वेनानात्मत्वमेव युक्तं किंच ॥ दृश्याकारपरिणामिनः स्त्रीनरेरनिमल-
मचेतनत्वं च लोकप्रसिद्धत्वाच्छरीरप्रयात्मत्वपरिणममानस्याहंकारस्य तथाविधमचेतनत्वं को निवारयेत् ॥ एवमहंबुद्ध्यालंबन-
त्वेन प्रसक्तानां देहेन्द्रियादीनां तदालंबनत्वप्रतिषेधे सति परिशेषाच्चिदात्मनालंबनत्वं तस्य सिद्धमिति निगमयति ॥ तस्मादिति ॥

॥ ॥ सर्वप्रत्ययरूपेण सदाहंकार एव हि ॥ वित्रते नोऽहंकारस्त्वनात्मैव शरीरवत् ॥१६॥ परिणामस्वभावस्य
स्त्रीशरीरादिजन्मना ॥ अचेतनत्वं लोकेस्मिन्प्रसिद्धं खलु संततं ॥१७॥ तस्माच्चिद्रूप एवात्माऽहंबुद्धेरर्थ आ
स्तिकाः ॥ अचिद्रूपमिदं बुद्धेरनात्मैवार्थ ईरित ॥१८॥

तस्मादिति ॥ अहमिति प्रत्ययगम्यविषयायां बुद्धेरुक्तरीत्या देहेन्द्रियादीनां चिदाभास्यत्वेन घटादिवत्पराग्गर्थत्वात्प्रत्यग्रूपतः साक्षी चिन्मा-
त्ररूप एवात्मा विषयो नाचिद्रूपं जडं देहेन्द्रियादिकं ॥ इदंबुद्धौ त्वनात्मैव विषय इति न तयोः क्वापि सांकर्यमित्यर्थः ॥ यदि चिन्मा-
त्ररूप आत्माहंबुद्धिविषयस्तर्हि तस्य स्वप्रकाशत्वसंभंग इत्येतत आह ॥ सत्यपीति ॥ सर्वांतरस्य प्रत्यगात्मनोऽहंप्रत्ययविषय-
त्वे सत्यप्यसौ स्वयंप्रकाश एव भवति ॥१६॥१७॥१८॥

ननु बुद्धिवृत्तिविषयस्य प्रकाशत्वं च परस्य विरुद्धमित्यत आह॥ इत्यधीनेति॥ सर्वप्रमातृसाक्षिण आत्मनः सत्यपि बुद्धिवृत्तिव्याप्यत्वे घटकुड्यादिवत्स्फुरणं न तदधी
नं किं तु स्वच्छं निर्मलं बुद्धिवृत्तिमनुप्रविश्य तस्याः तन्नामिकसाक्षि— चिद्रूपेणापमवस्थितः स्वयं प्रकाशते॥ घटकुड्यादिकं तु जडत्वात्स्वगोचर वृत्त्यनुप्र
विष्टचैतन्येनापि व्याप्य वर्तत इति॥ पराधीनप्रकाशमित्यर्थः॥ न चाहमर्थ आत्मा स्वयंप्रकाशश्चेदहमाकारवृत्तिस्तर्हि किमर्थेत्यत आह॥ इत्येवेति॥
आत्मस्वरूपावरणहेतवे यदज्ञानं तदात्मविषयवृत्त्यैव निवर्तनीयम् अतो ज्ञाननिवृत्तिरूपयोगस्तत्र चेत्यमानमज्ञानं स्वस्वरूपेऽध्यस्तत्वादात्मा

सत्यपि प्रत्ययार्थत्वे प्रमातृत्वात्मा स्वयंप्रभः। इत्यधीनतया नैव विज्ञाति घटकुड्यवत्॥१९॥ स्वच्छवृत्तिमनुप्राप्य वृत्तेः साक्षितया स्थित
या स्थितः॥ वृत्त्या निवर्त्यमज्ञानं ग्रसते स्वेन तेजसा॥२०॥ अनुप्रविष्टचैतन्यसंबंधाद्वृत्तिशक्तिका॥ अहमाकारजा धीस्तु नाशयत्यात्मरूपव
त्॥२१॥ अतोऽहंप्रत्ययार्थोऽपि नात्मा स्याद्घटादिवत्॥ स्वयंप्रकाशरूपेण साक्षादात्मैव केवलम्॥२२॥

नैव चित्प्रकाशेन ग्रसते न ह्यज्ञाननिवृत्तिरपि चिन्मात्ररूपेण वर्तिष्यत इत्यर्थः॥ बुद्धिवृत्तेर्घटादिविषयप्रकाशजननसामर्थ्यवदात्म
विषयप्रकाशजननसामर्थ्यमपि किं न स्यादित्यत आह॥ अनुप्रविष्टेति॥ साक्षिना सत्त्वपरिणामरूपत्वेन निर्मला बुद्धिवृत्तिः स्वात्मन्यनुप्र
विष्टचैतन्यसंबंधबलात् स्वच्छवृत्तिप्रतिबिंबयुक्ताद्दशावेदनं घटादिविषयजातमावरणेन नाशयति॥ आत्मा तु स्वप्रकाशचिद्रूपतया
स्वरूपप्रकाशेनैव केवलं भासते॥१९॥२०॥२१॥२२॥

णतद्रूपपादयति॥ यदिति॥ यस्य चित्प्रकाशात्मनः संबंधबलादहमर्थविषया वृत्तिः प्रतीतिकरणत्वेन भासते स चिदात्मा कथं प्रत्ययाधीनप्रका
शः स्यात्॥ प्रतीयतेऽनेनेति प्रत्ययो बुद्धिः स च साक्षिचैतन्येन प्रकाश्यमानः कथं स्वसाक्षिणं प्रकाशयितुं शक्नुयात्॥ अतो बुद्धिवृत्तेरा
त्मविषयप्रकाशजननसामर्थ्याभावात्साक्षिणस्तस्य चिदात्मा स्वयंप्रकाशमान एवेत्यर्थः॥ न चाहं जानामीत्यहंकारस्य ज्ञातृत्वमवधीयते॥ क
थं तस्यानात्मत्वमित्यत आह॥ अहंवृत्तिरिति॥ स्वतःसिद्धस्वप्रकाशं यत्साक्षिचैतन्यं तेनैकतया तादात्म्याध्यासेन प्रदीप्ताहंवृत्तिरव
भासनेन चैतन्यप्रकाशमयीव प्रत्ययाश्रयादिविषयज्ञानानि तद्युक्तो ज्ञानेन प्रकाशते॥ परमार्थतस्तु प्रत्ययी चिदात्मैवानात्मा

यत्संबंधादहंवृत्तिः प्रत्ययत्वेन भासते॥ स कथं प्रत्ययाधीनप्रकाशः स्यात्स्वयंप्रभः॥२३॥ अहंवृत्तिः स्वतःसिद्धचैतन्येनैव भासते
॥ न संबंधादहंकारः प्रत्ययीव प्रकाशते॥२४॥ आत्माहंप्रत्ययाकारः संबंधज्ञोऽभिमाननः॥ कर्ता भोक्ता सुखी दुःखी ज्ञातेति
प्रतिभासते॥२५॥ रक्तवत्स्फटिकात्मैव चिन्मात्रहृदयं वपुः॥ चिद्रूपमेव स्वाज्ञानादन्यथा प्रतिभासते॥२६॥

प्रत्ययी चेत्स्वज्ञातृक्रियाकर्तृत्वादिप्रसंगात्तस्याश्चिन्मात्ररूपता न सिध्येदित्यत आह॥ आत्मेति॥ कर्तृत्वभोक्तृत्वादिधर्मवदहं
कारतादात्म्यसंबंधवशाच्चिदात्मनि तद्धर्माध्यारोपेण कर्तृत्वादिप्रतीतिः॥ परमार्थतस्तु चिन्मात्रात्मस्वरूपं न त्वन्य
त्यर्थः॥ एतदुक्तं भवति॥ अहंकारचैतन्ययोः परस्परतादात्म्याध्याससंबंधाच्चिदात्मधर्मः प्रतीयते॥ सहंकारधर्मत्वेन भासते न भास
तेऽहंकारधर्मः कर्तृत्वभोक्तृत्वादयश्च चिदात्मधर्मत्वेन प्रतिभासते॥२५॥

तयोर्विवेकेनु चिन्मात्रमेवात्मस्वरूपं परिशिष्यत इति॥ अमुमर्थं प्रतिज्ञानेकारणमाह॥ चिद्रूपमेवेति॥ विशुद्धचैतन्यमेवात्मतत्त्वं स्वरूपाज्ञा
नादन्यथाप्रकाशान्तरेण कर्त्राभोक्ता सुखी दुःखी मानीत्यादि बहुप्रकारेण भासते॥ सर्वदेहेष्विति॥ सर्वप्राणिशरीरेषु हमिति प्रत्ययोनुवृत्तः प्रयतेन
स्य च केनचिदनुगतेन तादृशेनार्थेन भवितव्यं तादृशस्तु अर्थश्चिदात्मैव नापरः कश्चिद्धस्तिविदात्मातिरिक्तस्य सर्वस्य व्यावृत्तस्य नावतारत्वक
मर्थमिरष्टान्तसुपपादयति॥ गोरिति॥ यथा गोशावलेयादिष्वनुगतस्य गोरिति प्रत्ययस्य गोत्वमेवार्थः ननु यावता स्तत्र व्यक्त्यन्तरस्थाचमर्थे व

सर्वदेहगहरूपः प्रत्ययो यः प्रकाशते॥ तस्य चिद्रूपता त्वासां दर्थेनिश्चायरः॥२७॥ गोरिति प्रत्ययस्यार्थो य
था गोत्वं तु केवलं॥ तथाहं प्रत्ययस्यार्थश्चिद्रूपात्मैव केवलं॥२८॥ व्यक्तिसंबंधरूपेण गोत्वं भिन्नं प्रतीयते॥ चि
दहंकारसंबंधभेदेन प्रतिभाति च॥२९॥

प्राणिशरीरेष्वनुगतस्याहंप्रत्ययस्यानुगतचिदात्मैव न तु शरीरादिकमित्यर्थः॥ न चाहंप्रत्ययस्य भिन्नविषयत्वमित्यत आह॥ व्य
क्तीति॥ यथैकस्यापि गोत्वे तत्र खण्डीबलेयादिव्यक्तिभिन्नाकारेण भिन्नं प्रतीयते॥ एवमेकस्य चित्तत्त्वस्याहंकारवृत्तिभेदेन प्रतिभातीति॥
ननु चित्स्वरूपपर्यालोचने भेद उपजायते॥ एवं प्रत्ययोपाधावहमर्थस्य सम्प्रतिपाद्य शरीराद्यर्थोपाधावपि तत्प्रतिपादयत्यथोवेको
पी–पिण्डाश्च शरीरस्यानिधेयगोत्वजातिव्यञ्जकव्यक्तिभेदवशाद्भिन्नार्थो भवति॥२९॥ राम: २५

तथा एकोप्यहमर्थः प्रतिशरीरस्यान्निधेयचिद्व्यंजकाहंकारस्य व्यक्तिभेदेन भिन्नार्थो निरूप्यते॥३०॥ तत्र च यथा गोशब्दस्य व्यक्तिः प्रातीतिको
र्थो न तात्त्विकः अननुगतस्यैकस्य गोशब्दस्य व्याहतासु गोव्यक्तिषु संगतिग्रहणसंभवात्॥ परमार्थतस्तु सर्वासु गोव्यक्तिष्वनुगतं गो
त्वमेव तस्यार्थः॥ व्यक्तिष्वनुगतयोस्तयोर्वाच्यवाचकभावेन संगतिग्रहणसंभवात्॥ एवमेव सर्वप्राणिष्वनुगतस्याहंशब्दस्याग
ताहंकारार्थत्वं प्रातीतिकं॥ यस्तु प्रत्यक्चिदात्मा सर्वत्रानुगतः स एव तत्स्यानुगतस्याहंशब्दस्य मुख्योर्थः॥ तस्यानुगतपरिच्छिन्नत्वविशिनष्टि

यथैवैकोपि गोशब्दो भिन्नार्थो व्यक्तिभेदतः॥ तथैवैकोप्यहंशब्दो भिन्नार्थो व्यक्तिभेदतः॥३०॥ यथा प्रतीत्या गोव्यक्तिर्गोशब्दार्थो
न तत्त्वतः॥ तत्त्वतो गोत्वमेवार्थः साक्षाद्वेदविशारदाः॥३१॥ तथा प्रतीत्याहंकारोहंशब्दार्थो न तत्त्वतः॥ तत्त्वतः प्रत्यगात्मैव स
र्वाखिलसाधकः॥३२॥ एकत्वेपि पृथक्त्वेन व्यपदेशोपि युज्यते॥ अन्तःकरणभेदेन साक्षिणः प्रत्यगात्मनः॥३३॥ रुद्रावि
ष्णुप्रजानाथप्रमुखाः सर्वचेतनाः॥ भिन्नात्मानमहंशब्दं प्रयुञ्जते हि तत्त्वतः॥३४॥

॥ अखिलमिति॥ यद्वायं चिदात्मा अखिलव्यवहारसाधकः अतः सर्वप्राणिनत्र व्यवहारसाक्षितया आकाशवदनुगतो वर्तते
इत्यर्थः॥ एकत्वेपीति॥ एवमहमर्थस्य चिदात्मन एकत्वेपि अहं देवदत्तो हं यज्ञदत्त इत्यादिभेदव्यपदेशोपि न विरुध्यते॥ प्रतिशरीरम
न्तःकरणभेदेन तत्साक्षिणश्चिदात्मनोपि तथात्वप्रतीतेरित्यर्थः॥ इत्थं स्वप्रतिपादितेर्थे रुद्रादीनामपि व्यवहारं संवादयति॥ रु
द्रेति॥३४॥ ॥छ॥ ननु ते सर्वे अहंकारसहितेचैतन्ये हं॥

स्व.स.ना.
४२६

त्वाश्रेयप्रंजनेन निद्रात्मन ईश्वराहंकारस्थापितत्वाच्च तस्यान्वयव्यतिरेकानुविधायित्वादित्याशंक्यांके वलानात्मविदात्मैवाहंशब्दार्थ इति प्रतिपादयति
सुषुप्तोऽस्मीत्यादिना॥ एतावन्तं कालमहं सुषुप्तोऽस्मीत्यादावुत्थायपरामृश्यमानस्वापकालीनात्मविषये हंशब्दप्रयोगे न च तस्यापि स्वापा
महंकारोपितत्वापि स्वप्रकारेणालीनत्वेन तदानीं सकलविशेषप्रतिभासाभावात्प्रतिभाने च सुषुप्तिभंगप्रसंगादस्तु स्वामेव खलु।

सुषुप्तोऽस्मीति मे वायं सुषुप्त्युत्थितो जनः॥ सुषुप्तिकालीनस्वात्मन्यहंशब्दं हि जोऽत्र मा॥३५॥ प्रयुंक्ते तत्र देहादिविशेषाकारनास-
नं॥ नहि केवलचैतन्यं सुषुप्तेः साधनं स्वतः॥३६॥ प्रतिभाति तस्मिंश्चिन्मात्रे प्रत्यगात्मनि॥ अहंशब्दप्रवृत्तिः स्यान्नानुसोपा-
धिकात्मनि॥३७॥ यथा दोर्दहतीत्युक्तेर्वह्निर्दहति केवलं॥ नायस्तद्वदहंशब्दश्चैतन्यस्यैव वाचकः॥३८॥

यं सुषुप्ते प्रकाशमहंकारविनिर्मुक्तात्मनीत्यर्थः॥ एवं सुषुप्त्यवस्थायामात्मनि प्रयुज्यमानस्याहंशब्दस्य प्रत्यगर्थवाचित्वेनः सर्वप्रत्यय-
तचैतन्यमेवार्थः॥ न त्वहंकारस्तस्य तदभावात्स्वत्वेन परागर्थत्वाद् अहंकाराभिधायकत्वं न तस्य॥३५॥३६॥३७॥३८॥ रामः ४२६

प्रतीतिः कमिति सदृष्टान्तमाह॥ प्रतीत्येति॥ अग्निसंयोगवशात्स्वभावानुष्णस्यायसोऽपि यथा दाहकत्वं यथा प्रतीतिमात्रसि-
द्धं॥ एवं चित्संबंधवशादहंकारोऽपि प्रतीतितोऽहंशब्दार्थः॥ परमार्थतस्तु यथाग्निरेव दाहकत्वं एवं चैतन्यस्यैवाहंशब्दार्थत्वमर्थः॥ क-
थं तर्ह्यहं मनुष्य इति देहादावहंशब्दप्रयोग इति तत्राह॥ चैतन्येति॥ स्वप्रकाशचैतन्यतादात्म्यापन्नोऽयोऽहंकारस्तस्य स्वस्यशरीरादिपाद-
मस्तकव्यापनाद्देहादावहंशब्दप्रयोगमन्ययोश्चैतन्यतादीययोस्तयोरन्यत्र प्रयोगः स्यान्निरूढ इत्यर्थः॥ प्रतिभातितमपि निमि-

प्रतीत्या वह्निसंबंधाद्यथायो दाहकं तथा॥ चित्संबंधादहंकारोऽहंशब्दार्थः प्रकीर्तितः॥३९॥ चैतन्येनाहमस्य त्वादेहा-
दौ व्याप्ततचेतसां॥ अहंशब्दप्रयोगः स्यान्नथाहं प्रत्ययोपि च॥४०॥ इत्थं विवेकतः सारं देहादिभ्यः सर्वकं॥ अन्तःक-
रणमात्मानं विनष्य स्वात्मनः पृथक्॥४१॥ सर्वसाक्षिणमात्मानं स्वयंज्योतिः स्वलक्षणं॥ सन्यमानंदमद्वैतम-
हमर्थं विचिंतयेत्॥४२॥ रुद्रविष्णुब्रह्मनाथप्रमुखाः सर्वचेतनाः॥ अहमेव परं ब्रह्मेत्यात्मानमेव हि
॥४३॥ तेनु चिन्मात्रमद्वैतमहमर्थतया न रं॥ अंगीकृत्याहमद्वैतं ब्रह्मेत्यानुर्द्देहतः॥४४॥

गमय्यात्मस्वरूपमवधारयति॥ इत्थमिति॥ इत्थमनेनोक्तप्रकारेण सारं देहेन्द्रियादिकमहेकव्यात्मानं पौक्तिविविवेकेनस्वा-
त्मनः सकीनात्पृथक्कृत्य देहेन्द्रियादिसर्वसाक्षिणं स्वप्रकाशचिद्रूपमुक्तरीत्याहंशब्दप्रतिपा-
द्यमात्मानं सत्यादिलक्षणं ब्रह्म चिंतयेत्॥ अहमर्थस्यात्मनो ब्रह्मरूपत्वं संवादेन द्रढयति॥ अहमेव परं ब्रह्मेति॥४३॥
रुद्रविष्ण्वादिपरब्रह्मरूपचिन्मात्रस्यैवाहमर्थतामाह॥ तेनिति॥४४॥

निरुद्धविकल्पाद्यो निरस्तसमस्तोपाधिकं साक्षिचिन्मात्रमेवाहमर्थनियामकीरूपाहं ब्रह्मेति ब्रह्मत्वाद्यात्मेनव वदरं तिनन्तु देहादिविशिष्टं न
स्य संसारयत्मनो संग ब्रह्मतादात्म्यानुपपन्नेरित्यर्थः॥ ननु चिन्मात्रस्वरूपस्यापि साक्षित्वेन कथं ब्रह्मरूपतेति तत्राह॥ चिन्मात्रमिति॥
यद्धि चिन्मात्रं न देव साक्षिमसमादिलक्षणं परं ब्रह्म नन व्यतिरिक्तमिति परमार्थविदां निर्णयः॥ इत्यत्रस्यापीदृगर्थपरत्वमाह॥ शास्त्रमिति

चिन्मात्रं सर्वगं सत्यं संपूर्णसुखमद्वयं॥ साक्षाद्ब्रह्मैव नैवान्यदिति तत्त्वविदां स्थितिः॥५५॥ शास्त्रं सत्यचिदानंदमनंतं वस्तु केवलं॥ शुद्धं ब्रह्मेति सत्यं ह्याह वेदविदां वराः॥५६॥ प्रत्यगात्मा परं द्वंद्वः साक्षी सर्वस्य सर्वदा॥ सत्यज्ञानसुखानंतलक्षणः सर्वदानघाः॥५७॥ अतोयं प्रत्यगात्मैव स्वानुभूत्येकगोचरः॥ शास्त्रसिद्धं परं ब्रह्म नापरं परमार्थतः॥५८॥ एवं तर्कप्रमाणाभ्यामाचार्योक्त्या च मानवः॥ अविज्ञाय शिवात्मैक्यं संसारे पतति भ्रमात्॥५९॥

॥ सत्यं ज्ञानमनंतं ब्रह्मेत्यादि शास्त्रं ब्रह्मणः सत्यज्ञानानंदैकरसत्वं तात्पर्येण प्रतिपादयति॥ अयमपि प्रत्यगात्मा अद्वंद्वः सांसारिक रामः
सुखदुःखादिद्वंद्वरहितस्तस्य सर्वस्य सर्वदा साक्षी दृष्टा तत एव सत्यज्ञानादिलक्षणः॥ एवं तत्त्वंपदार्थैक्यं दर्शयित्वा॥ ४२५

प्रत्यगात्मनः परशिवस्वरूपज्ञाननिष्ठायां क्रममाह॥ शास्त्रेत्यादिना॥ प्रथमं गुरुशास्त्रोपदेशेनात्मस्वरूपं ज्ञात्वा पुनः शास्त्रानुसारिणि श्रायुक्तिर्देहेंद्रियादिसाक्षितयावस्थितं चिन्मात्रस्वरूपमात्मानं निश्चित्य स्वात्मनोन्यत्वेन प्रतिभातं सकलमिदं जगत्स्वाविद्याविलसितत्वेन स्वात्ममात्रतया बुध्वा तथाविधस्वात्मानमद्वितीयं परं ब्रह्मेति प्रत्यग्ब्रह्मणोरैक्यसाक्षात्कारं तत्र

शास्त्राचार्योपदेशेन तर्कैः शास्त्रानुसारिभिः॥ सर्वसाक्षितयात्मानं सम्यङ्निश्चित्य सुस्थिरः॥६०॥ स्वात्मनोन्यतया भातं समस्तमविशेषतः॥ स्वात्ममात्रतया बुध्वा पुनः स्वात्मानमद्वयं॥६१॥ शुद्धं ब्रह्मेति निश्चित्य स्वयं स्वानुभवेन च॥ निश्चयं च स्वचिन्मात्रे विलाप्याविक्रियेऽद्वये॥६२॥ विलापनं च चिद्रूपं बुध्वा केवलरूपतः॥ स्वयं तिष्ठेदयं साक्षाद्ब्रह्मविद्वरो मुनिः॥६३॥ ईदृशीयं परा निष्ठा श्रौती स्वानुभवात्मिका॥ देशिकालोकनेनैव केवलेन हि सिध्यति॥६४॥ देशिकालोकनं चापि प्रसादात्परमेश्वरात्॥ सिध्यत्यसंशयं नान्यैः सत्यमेव मयोदितं॥६५॥ सत्यं सत्यं पुनः सत्यं मुक्त्युपायमनुत्तमं॥ प्रासादाद्देवदेवस्य सर्वेषां सर्वसिद्धिर्महि॥ शिनु॥६६॥ प्रसादे शांकरे सिद्धे सर्वेशां नुतयास्वं तः॥ क्लिन्ना तिनान्यथा विप्राः सत्यमेव मयोदितं॥६७॥ यदा शांनुतया सर्वेदिनातिस्व तएव तु॥ तदाहि शांनवः साक्षात्प्रसादः सत्यमीरितं॥६८॥

ज्ञात्वा स्वस्वरूपमद्वंतं चिन्मात्रैकतकरशोन्मायेन विलापयविलापनक्रियां चाधिष्ठानचिद्व्यतिरेकेण बुध्वा केवलं चिदानंदैकरससं रूपेण स्वयं तिष्ठतीत्यर्थः॥ उक्तब्रह्मात्मनिष्ठायी साधनमाह॥ ईदृशीत्यादिना॥६०॥६८॥

सू॰ सं॰ ता॰ ४२८ नात्मदृष्ट्येति॥ व्यवहारदृष्ट्यैवाद्वितीयमात्मतिनाशः॥ तत्त्वदृष्ट्या तु परशिवस्वरूपेऽध्यस्तस्य सर्वस्य तदनन्यत्वाच्छिवात्मकमेव सर्वं जगत्सुरदृ

शिवादन्यनिया किंचिद्दृष्टा विजातीयदृष्टिमापः॥ तदा नः शांकरो बोधः संजात इति मे मतिः॥ ८९॥ शिवादन्यं तथा सर्वं प्रतीतमपि पंडिताः॥ तत्त्वदृष्ट्या शिवं सर्वं सुस्थिरं परिपश्यति॥ ९०॥ शिवाकारेण वा नित्यं प्रपंचाकारतोऽपि वा॥ ज्ञानाकारेण वात्मानं यः पश्यति विचिन्तयन्॥ ९१॥ शांकरे वासदानाति सर्वाकारेण नान्यपरः॥ इति विज्ञानसंपन्नः शंकरज्ञानिनां वरः॥ ९२॥

परिपश्यतीत्यर्थः॥ शिवाकारेणेति॥ नागपरमोऽपमोऽक्रात्मना यत्रिविधं जगज्ज्ञानि तत्सर्वं ज्ञानमात्ररूपं परं ब्रह्म विचिंतयेत्
॥ यतस्तज्ज्ञानरूपे ब्रह्मण्येवाध्यस्तमपेवमनातीत्यर्थः॥ ८९॥ ९०॥ राम॰ ४२८

एवं प्रतिपन्नस्य जीवन्मुक्तस्य स्थितिमाह॥ शंकरुरूपतयेत्यादिना॥ न तस्य वैदिकमिति॥ किंप्रकारव हेतूनाब्रात्तत्त्यादिनात्मत्वं तया

शंकरुरूपतया सर्वं पश्यन्नास्ति स्वतः॥ न तस्य वैदिकं किंचिन्न त्रिकं वास्ति लौकिकं॥ ९३॥ यथाजातस्वरूपेण शिवं सर्वं विचिंतयेत्॥ योगी चरति लोकानामुपकाराय नान्यथा॥ ९४॥ स्वस्वरूपातिरेकेण निषिद्धं विहितं तु वा॥ न पश्यति महायोगी नास्ति स्वात्मनया खिलं॥ ९५॥ चंडालगेहे विप्राणां गृहे वा परमार्थवित्॥ न पश्यति ... द्वेषम्यं न किंचिदपि पश्यति॥ ९६॥ यथेष्टं वर्त्तते योगी शिवं सर्वं विचिंतयन्॥ न दृश्यो हि महायोगी केनवा तस्य विग्रहः॥ ९७॥ वक्तृनो वक्ते न किंचित्साक्षाद्देशिकस्य निरीक्षणात्॥ प्रसादो देवरूपस्य यस्य शंकरस्तथैव च॥ ९८॥ मुक्तिर्न किंचिद्बलात्तु परिपाकवशादपि॥ शिवरूपतया सर्वं स्वात्मना वा देव पश्यति॥ ९९॥ शिवः सर्वमिति ज्ञानं शंकरं शोकमाहतुत्त्व॥ यथैव हि वेदार्थो नापरः सत्यमीरितं॥ १००॥ भक्तो न किंचिद्गुरौ भक्तिः शिवे न किंचिद्द्वेदेहिनां॥ साधनं सत्यविद्यायाः सत्यमेव मयोदितं॥ १०१॥ सोपानक्रमतो लब्धं विज्ञानं यस्य सुस्थिरं॥ तस्य मुक्तिः परा सिद्धा सत्यमेव मयोदितं॥ १०२॥

विवक्तताद्वितर्थः॥ ९३॥ ९६॥ ९९॥ १०१॥ सोपानक्रमत इति॥ १०२॥ ॥ ॥ ॥ ॥

शास्त्राचार्यमुखेनोत्पादितात्मज्ञानेनकमपेतोऽनर्थः॥ ननु ज्ञानमात्रात्कथं मुक्तिसिद्धिरिति तत्राह॥ नित्यमुक्तस्येति॥ आत्मा हि नित्यमुक्तस्व
भावः॥ अत एव गृह्यतुं हृदयमिति॥ रूढेः॥ तस्य संसारो भ्रान्तिसिद्ध एवेति वक्तव्यं॥ सम्यग्ज्ञानप्राप्तस्वरूपयाथात्म्यज्ञानेन तत्त्वमक्ततस्सं
सारनिवृत्तौ सत्यां स्वभावत्वान्मुक्तिः स्वत एव सिध्यतीति ज्ञानमेव तत्त्वसाधनं न कर्मेत्यर्थः॥७३॥७४॥ इति श्रीमत्र्यंबक

नित्यमुक्तस्य संसारो भ्रान्तिसिद्धः स हाखलु॥ तस्माज्ज्ञानेन नाशः स्यात्संसारस्य न कर्मणा॥७३॥ ज्ञानलाभपरो वेदो
क्तप्रकारेण समाहितः॥ हृणिकं साक्षाद्गुरुमेव समाश्रयेत्॥७४॥ इति श्रीस्कन्दपुराणे सूतसंहितायां य
ज्ञवैभवखण्डस्योपरिभागे सूतगीतायां पंचमोऽध्यायः॥ ॥५॥

पाराशर्यपरायणेनोपनिषन्मार्गप्रवर्तकेन माधवाचार्येण विरचितायां यज्ञवैभवखण्डस्योपरिभागे सूतगीताव्याख्यायां पं रामः
चमोऽध्यायः॥ २९

उक्तविधं परशिवस्वरूपात्मज्ञानं नरस्तु यह्व्यतिरेकेण न सिध्यतीति तत्सिद्ध्युपायस्तं मूर्तिध्यानं चक्षुरुपक्रमते॥ वक्ष्यामीति॥ साक्षात्पर
तरमिति॥ यच्छास्त्रिदानंदैकरशिवस्वरूपमेतदेव हि मुख्यं परमतिशयेन परं तरमतिशयेन परं तत्त्वं॥ मायामास्तिकार्यायिज्ञाये वा परत्वं
व्रतिलाभेऽत्र यात मोक्षेति परत्वं नास्ति॥ इदमित्थं ब्रह्मैव नोऽस्माकं सर्वेषां सर्वसाक्षात्परोक्षेण स्वभावतत्त्वात्मकत्वमपि निर्दिशो बते
न स्तु सत्त्वात्स्थूलदृष्टिभिर्दुर्दर्शमिदं दुःशकमनस्तत्साक्षात्कारो यत्नसाध्य इत्यर्थः॥ कदाचित्स्वात्मतयेत्यादिना त्रिमूर्तीनामप्येतद्दर्शन

सूत उवाच॥ वक्ष्यामि परमं गुह्यं सर्वशास्त्रार्थसंग्रहं॥ यं विदित्वा द्विजा मर्त्यो न जायते पुनर्भुवि॥१॥ साक्षात्परतरं तत्त्वं सच्चिदानंदलक्ष
णं॥ सर्वेषां नः सदा साक्षादात्मभूतमपि स्वतः॥२॥ दुर्दर्शमेव सूक्ष्मत्वाद्देवानां महतामपि॥ कदाचित्स्वात्मतयाऽनेन सदा परिपश्य
ति॥३॥ विष्णुः कदाचित्तत्त्वं कथंचित्परिपश्यति॥ तथा केऽथ कथंचिद्ब्रह्मापि कदाचित्परिपश्यति॥४॥ चिरकालानुष्ठानं भक्ते
कविषयं परं॥ तस्यापि साक्षितानैव गौरवं रां॥५॥ प्रसादादेव तस्यैव परतत्त्वस्य केवलं॥ देवा द्रष्टुं पिपश्यंति तच्चापि ब्रह्मसाधकं॥ तस्मा
नः प्रसादसिद्ध्यर्थं परया श्रद्धया सह॥ ध्येयमेव परं तत्त्वं हृदयांभोजमध्यमे॥७॥

रजस्तमोभ्यामसंस्पृष्टविशुद्धसत्त्वोपाधि
कात्मज्ञानोत्कर्षवशेन साक्षात्तत्तया प्रकाशमानं तत्त्वं सदा जानातीति॥ हरिब्रह्माणौ तु सत्त्वोपाधिकत्वेऽपि रजस्तमोभ्यां सतत्त्वात् चिर
न्तनादृढज्ञानोत्कर्षविरहेण न तत्साक्षात्कारः कदाचित्कोऽयत्नसाध्य इत्यर्थः॥४॥ तस्यापि साधकमिति॥६॥७॥

सू·सं·टी·
४२०

…एवं रुद्रविष्णुब्रह्मणां त्वात्मभूतपरशिवस्वरूपविषयं यज्ज्ञानं तद्विषयार्थमात्रेण तस्यापि तत्त्वं न विषयत्वं तेन किं तु साधकं प्रकाशकं ॥ ब्रह्माकारमनो
वृत्तिर मनो वृत्तेरपि घटवदादिविषयं प्रत्यन्तरवस्यापि कार्यत्वादित्यर्थः ॥ नन्वेतदानामपि तत्साक्षात्कारेण शिवमस्यादेव कारणमि
त्याह ॥ प्रसादादेवेति ॥ ब्रह्मसाधकमिति ॥ परशिवप्रसादहेतुकं यद्ब्रह्मगोचरं ज्ञानं जन्मनैव तत्रापि तद्ब्रह्मसाधकं प्रकाशकं नत्वन्ते

त्रिमूर्तीनां तु रुद्रोपि शिवं परमकारणं ॥ सदा मनस्यनिनानुसंधाय यतिद्विजपुंगवाः ॥८॥ त्रिमूर्तीनां तु विष्णुश्च
शिवं परमकारणं ॥ सदा मनस्यनिनानुसंधाय यतिद्विजपुंगवाः ॥९॥ त्रिमूर्तीनां विरंचोपि शिवं परमकारणं
॥ सदा मनस्यनिनानुसंधाय यतिद्विजपुंगवाः ॥१०॥ त्रिमूर्तीनां नानात्रिमूर्तीनां विचित्राः लोकाः ॥ विभूतिरूपा देवाश्च
ध्यायंति प्रीतिसंयुताः ॥११॥

न विषयतया प्रकाशयति इत्यर्थः ॥ अतः प्रसादतएव देवानामपि परतत्त्वसाक्षात्कारेप
रशिवप्रसादएवाधारणमिति भिन्नमतस्तासिद्धये तत्परतत्त्वं स्वतंत्रं बुजे ध्येयमित्यर्थः ॥ सोयं मनस्यनिनेवानुसंधेयमिति वि
धिस्तरुद्रविष्ण्वादीनां तथाविधं परतत्त्वध्यानं दर्शयति त्रिमूर्तीनामित्यादिना ॥८।९॥ रामः ४२०

ननु सोयं मूर्तिरहितत्वात् ध्यानेकथं परशिवस्वरूपप्राप्तिरिति तत्राह घृतकाठिन्यवदिति ॥ यथा घृतकाठिन्यं घृतातिरिक्तवस्त्वन्तरेण संसृष्ट
मेव मूर्तिमत्तं दृश्यते ॥ एवं परशिवमूर्तिरपि मायातत्कार्यासंस्पर्शात् केवलं सच्चिदानंदैकरसस्वभावा ॥ परशिवस्वरूपादेरेननैवास्ति
वत्थाविधमूर्तत्वमनानातीत्यर्थः ॥ परमात्मविभागस्थाइति ॥ अविद्योपाधिकाजीवाः मायोपाधिकस्तु जगत्कर्ता ईश्वरः मायास
त्वादिगुणोपाधिकत्वाद्रुद्रादयोपीश्वरप्रभेदाः नात्मनादिवज्जीवसंघमध्यपातिन इत्यर्थः ॥ तथा रुद्रादीनां त्रिमूर्तीनामयत्र

घृतकाठिन्यवन्मूर्तिः सच्चिदानंदलक्षणा ॥ शिवादेरेननैवास्ति शिवएव हि सा सदा ॥१२॥ ब्रह्मविष्णुमहेशाद्याः शिवध्या
नपरा अपि ॥ परमात्मविभागस्थानजीववत्सह संस्थिताः ॥१३॥ ब्रह्मविष्णुमहेशानामाविर्भावश्च पि द्विजाः ॥ परमात्म
विभागस्थानजीववत्सह संस्थिताः ॥१४॥

वतीरविद्योपास्त्यमध्यपरिच्छिन्नसावच्छिन्नमायाश्रीश्वरप्रभेदत्वमेवेत्यर्थः ॥ अहंब्र
ह्मेति ॥ जीवेश्वरभेदस्यसत्त्वाविकत्वमाशंक्य निरस्यति परतत्वमिति ॥ यन्मायातीतमपि परं ब्रह्माद्वितीयतदेव मायाविद्योपाधिप्रयुक्त
भेदेन जीवपरमात्मनावेन द्विधा न वास्तवस्तयोर्भेद इत्यर्थः ॥१२॥१३॥१४॥ रामः

पुण्यपापाहन्ता इति॥ यतः स्वाश्रया व्यामोहकरी च अविद्या जीवोपाधिरतस्तत्कृतपुण्यपापे स्तः तत्कृतरागद्वेषादिश्च जीवा
त्मा इत्यामवंति च अनन्तत्वाज्जन्ममरणप्रवाहपतिता अविद्यापरवशाः संसारिणो न त्वीश्वरस्य॥ पुण्यपापादयो न हीति
विशुद्धसत्त्वप्रधानमायोपाधिकं तादृशविद्याद्यनां रागद्वेषादिमलानां हरत्वात्तेन पुण्यपापादयो न संतीत्यर्थः॥ किंनिमित्तस्तेषा

परतत्त्वं परं ब्रह्म जीवात्मपरमात्मनोः॥ औपाधिकेन भेदेन द्विधा भूतमिवस्थितं॥२४॥ पुण्यपापकृता जीवा रागद्वेषमयाश्रिताः॥
॥ आजन्मनाशाभिभूतास्ते सदा संसारिणो ध्रुवं॥२६॥ ब्रह्मविष्णुमहेशानां तथा नेषां हि सर्षभाः॥ ज्ञानविज्ञानविशेषाणां पुण्यपा
पादयो न हि॥२७॥ आज्ञया परतत्त्वस्य जीवानां हितकाम्यया॥ आविर्भवंति रीतिना वो तेषां केवलमास्तिकाः॥२८॥ हरिं ब्रह्महरं
रास्तेषां मा विना बाह्यसुखानाः॥ सदा संसारिणि जीवे रूपास्या मुक्तिमुक्तये॥२९॥ उपास्यते समानेऽपि हरः श्रेष्ठो हरेरजा
त्॥ न समानं निहीनश्च नास्ति संदेहकारणं॥३०॥ निहीनं वा समं वापि हि हरिणा ब्रह्मणा हरं॥ ये पश्यंति सदा ते तु पश्यं
ते तु पश्यंते तु पश्यंते नरकावलिं॥३१॥ हरिब्रह्मादिदेवेभ्यः श्रेष्ठं पश्यंति ये हरं॥ ते महाघोरसंसारान्मुच्यंते नात्र संशयः॥ रामः ३१

भवतार इति॥ तदाह॥ आज्ञयेति॥ जीवैरुपास्या इति स्वाधीनमायोपाधिकत्वेन॥ जीवापेक्षितफलप्रदानसाम
र्थ्ययोगाद् ब्रह्मविष्ण्वादीनामुपासनीयं तत्॥२५॥

परत्वतस्य त्रिमूर्तीनां चोपासने विशेषमाह॥ प्राधान्येनेति॥ स्वप्राधान्येन ध्येयं परं ब्रह्म॥ हरिब्रह्मादयस्तु परहितत्वात् तद्रूपत्वात् सोपाधिकरूपा
॥ प्राधान्येन निरुपाधिकं ब्रह्मात्मनैव ध्येयमित्यर्थः॥ यद्यथर्वशिखायामाम्नायते शिव एको ध्येयः शिवंकरः सर्वमन्यत्परित्यज्येति तदपि
प्राधान्यमाविष्णुर्ब्रह्मा रुद्रः शिवस्यैव प्राधान्येन ध्येयत्वं निगमयति॥ अतएवेति॥ यदुक्तं परशिवस्वरूपेऽथर्वशिखैव साक्षात्प्रमाणमित्याह॥ शि

प्रधानेन परं तत्त्वं मूर्तित्रितयेन योगिभिः॥ ध्येयं मुमुक्षुभिर्नित्यं हृदयांभोजमध्यमे॥२३॥ कार्यभूता हरिब्रह्मप्रमुखाः सर्वदेवताः॥ अ
प्रधानतया ध्येया न प्रधानतया मताः॥२४॥ सर्वैश्वर्येण संपन्नः सर्वेशः सर्वकारणं॥ शंभुरेव सदा सांबो न विष्णुर्न प्रजापतिः॥२५॥
तस्मात्तत्कारणं ध्येयं प्राधान्येन मुमुक्षुभिः॥ न कार्यकोटिनिक्षिप्ता ब्रह्मविष्णुमहेश्वराः॥२६॥ शिवंकरत्वं सर्वेषां देवानां वेदवि
न्मताः॥ स्वविभूतिमपेक्ष्यैव न परब्रह्मवत्सदा॥२७॥ शिवंकरत्वं संपूर्णं शिवस्यैव परात्मनः॥ सांबमूर्तेर्धरस्यास्य जगतः का
रणस्य हि॥२८॥ अतोऽपि सच्छिवो ध्येयः प्राधान्येन शंकरः॥ सर्वमन्यत्परित्यज्य देवतं परमेश्वरात्॥२९॥ साक्षात्परशिवस्यैव तेषां त्वेनं
विकापतेः॥ देवताः सकला ध्येया न प्राधान्येन सर्वदा॥३०॥ शिखायामथर्वणो साधी सर्ववेदोत्तमा॥ अस्मिन्नर्थे समाम्नायाश्च
नयश्चापराश्च पि॥३१॥

स्वेति॥ अथर्वणो दृष्टा आथर्वणी शिखा वेदमूर्धन्वस्थानात् शिखा नादरणीकृतिरस्मिन्परशिवस्वरू
पे ध्येयत्वे न प्रतिपादने समाम्नाया पर्यवसिता इत्यर्थः॥ अपराश्च पाति ऐतरेयकाद्युपनिषद इत्यर्थः॥३१॥३१॥

थर्वणः श्रुतेः प्राधान्यं सदृष्टांतमुपपादयति॥ यथेति॥ यथा परं ब्रह्म सर्वस्मान्मर्त्यलोकस्य भगवतः प्रतिष्ठाश्रयः॥ एवमाथर्वणी श्रुति
रपि रहस्यार्थप्रतिपादकत्वादखिलश्रुतिराश्रयभूतेत्यर्थः॥ एतदेव सदृष्टांतमुपपादयति॥ कंदस्थानमिति॥ दुःखानां रयनीनि तारः प्रण
वः॥ तथैवाथर्वशिखायामाम्नातं॥ सर्वेभ्यो दुःखेभ्यो ऽस्मान्संतारयतीति तारणात्तार इति॥ सच्चाकारमकारबिंदुनादरूपकं शक्तित्वं नारव्याव

यथा सा स्त्वासरं ब्रह्म प्रतिष्ठा सकलस्य च॥ तथैवाथर्वणो वेदः प्रतिष्ठैवाखिलश्रुतेः॥२४॥ कंदस्थानं तथा बिंदुः शक्तिस्ता
रं महाद्रुमः॥ स्कंधशाखाश्च काराद्या वर्णा यद्वत्तथैव तु॥२५॥ ॥श्रीवायनमः॥

यवैः सत्त्वावयवः॥ सच सत्त्वाधारे परावाग्रूपेण वर्तमानो वक्ष्यमाणस्य वृक्षस्य कंदो मूलं॥ तत्र च बिंदुशब्दो योऽवयवः सैव तस्य कंद
स्य शक्तिः सामर्थ्यं॥ पश्यंती रूपोऽनभिव्यक्तस्तारः प्रणवः सएव महावृक्षः॥ अकाराद्याये पंचाशद्वर्णास्ते प्रणवावयवभूता जात
त्वात्तस्य द्रुमस्य स्कंधशाखात्मकाः यद्वद्यं दृष्टांतः॥२४॥२५॥

नद्वेदाखिलश्रुतेः प्रणवएव कंदस्थानिजातिः शक्तिः प्रणवात्मकस्य तज्जननसामर्थ्यं॥ अथर्वणदृष्टो यो वेदः सएव द्रुमः॥ कृष्णयजुः सा
माख्यास्त्रयो वेदाः स्कंधशाखास्तस्य स्मृतिपुराणादीनि कल्पसूत्रादीनि षडंगानि शिखावरणं रज्जुणाय वहिरावरणं तत्कीर्तिस्पैवावरणस्य
संरक्षकाः॥ परशिवस्वरूपं यज्ज्ञानं तदेव तस्य वृक्षस्य पुष्पं तस्य प्राप्या मुक्तिरेव फलं॥ एवमथर्ववेदस्य प्राधान्यात्तद्रुक्षमकारेण शिवस्वरूप

तारकं वृक्षनेत्रीतिः शक्तिराथर्वणो द्रुमः॥ स्कंदशाखास्त्रयो वेदाः पर्णास्मृतिपुराणकाः॥२६॥ अंगानि शाखावरणं तत्कीर्तिसे
वरक्षकाः॥ पुष्पंशिवपरिज्ञानं फलं मुक्तिः परा मम॥२७॥ बहुनोक्तेन किं विप्राः शिवोध्येयः शिवंकरः॥ सर्वमन्यत्परित्यज्य देवतं
तु मुक्तिमुक्तये॥२८॥ सर्वमुक्तं समासेन मया संक्षारतरं बुधाः॥ शिवध्यानं सुहायप्युपंक्तिरुद्ध्यं यत्नतः सदा॥२९॥ ॥इतिश्रीस्कंदपुरा
णेसूतसंहितायां यज्ञवैभवखंडस्योपरिभागे सूतगीतायां षष्ठोऽध्यायः॥६॥

मेवध्येयमिति निगमयति॥ बहुनोक्तेनेति॥२८॥२९॥ ॥इतिश्रीमत्र्यंबकपादाब्जसेवापरायणेनोपनिषन्मार्गप्रवर्तकेन माधवाचा
र्येण विरचितायां सूतसंहितातात्पर्यदीपिकायां यज्ञवैभवखंडस्योपरिभागे सूतगीताव्याख्यायां षष्ठोऽध्यायः॥६॥

सू॰सं॰ता॰ ४३३

रन्तं सम्यक् ज्ञानहेतोः परशिवपरमात्मस्वमिदं येन ध्यानं साक्षात्साधनमुपरिष्टं स्वशरीरावयवेषु देवतानामालीदि ध्यानमपि परं प
रं परध्यानसाधनमिति॥ तदुक्तं श्रुतिज्ञानीते॥ रहस्यमिति॥ देवताः सर्वदेहे स्थिता इति॥ सर्वशरीरेषु तत्तद्देहावयवानामिंद्रियादीनां
च नियमेनाधिष्ठानतया दृश्यमानाति देवता वस्थिताः सन्ति येषां कालं सर्वेषां शरीरादीनां यत्कारणं परं ब्रह्म तदपि तत्र शरीरेषु स्था
प्यवर्तत इत्यर्थः॥ कुत्र कारेवेत्याशंक्य तेन दिवाजति॥ पंचभूतात्मक इत्यादिना पीठेौशिक इति तत्र समग्रं मम हेतोः स्थिमज्जेति पाहौ सू॰गी॰

सूत उवाच॥ रहस्यं संप्रवक्ष्यामि समासेन न विस्तरात्॥ शृणुत श्रद्धया विप्राः सर्वसिद्ध्यर्थमुत्तमं॥१॥ देवताः सर्वदेहेषु स्थि
ताः सत्यतपोधनाः॥ सर्वेषां कारणं साक्षाद्ब्रह्म रतत्त्वमपि स्थितं॥२॥ पंचभूतात्मके देहे स्थूले षाट्कौशिके सदा॥ पृथिव्यादि क्र
मेणैव वर्तन्ते पंच देवताः॥३॥ कार्यं ब्रह्मा महाभागे कार्यं विष्णुर्जलांशके॥ कार्यं रुद्रोऽग्निभागे च वायवंशे चेश्वरः परः॥४॥ आ
काशांशे शरीरस्य स्थितः साक्षात्सदाशिवः॥ शरीरस्य बहिर्भागे विराडात्मा स्थितः सदा॥५॥

शिके शरीरे इत्यर्थः॥ तत्र स्थूलशरीरं तत्कारणीभूतानि पृथिव्यादि पंचभूतानि तेषु ब्रह्मविष्णुरुद्रेश्वरसदाशिवाः क्रमेणाधिष्ठापवर्त
न्ते तत्र तत्रैव ध्येया इत्याह॥ पृथिव्यादीनि॥ कार्यं ब्रह्मेति॥ ब्रह्मविष्णुरुद्राः हि गुणत्रयाभिमानात्परब्रह्मणः कार्यभूताः तत्र तत्स्व टा॰मः
योग्यत्वकार्यमिति विशेष्यते॥ यद्वा पृथिव्यादिभूतेषु तत्र स्थूलहायब्रह्मादीनां योगो॥ तिहितत्स्तत्ति प्रायमिति॥ वि ४३३
धतो॥४॥ शरीरस्य बहिर्भाग इति॥५॥

स्थूलशरीरबहिर्भागे स्थूलशरीराभिमानी विराडात्मा स्थितः॥ अंतर्भागे तु सूक्ष्मशरीराभिमानी स्वराडात्मा॥ देहहृदयस्य कारणशरीरा
भिमानी सम्राडात्मा॥ वस्थितो ध्येय इत्यर्थः॥ ज्ञानेंद्रियसमाख्येषु श्रोत्रादिषु आदित्यादिदेवतानां समष्टिः श्रोत्रादिषु जातत्तस्य स्वरूपीनां
तेषां नियमनकारितत्स्वच्छंदत्वाधिष्ठितास्वत्तत्रश्रोत्रादिष्वादित्यादिदेवताः क्रमेण ध्यातव्या इत्यर्थः॥ उक्तं हि चक्षुषि आदित्यावर्कजनाध्य

अंतर्भागे विराडात्माः सम्राड् हृदयमध्यमे॥ ज्ञानेंद्रियसमाख्येषु श्रोत्रादिषु यथाक्रमात्॥६॥ दिग्वायर्कजलाध्यक्षनिसंज्ञा
श्च देवताः॥ कर्मेंद्रियसमाख्येषु वागाद्याख्यादिषु क्रमात्॥७॥ त्रिविक्रमेंद्रवह्न्याख्या देवताश्च प्रजापतिः॥ मित्रसंज्ञा
श्च वर्तन्ते प्राणसूत्रात्मसंज्ञिताः॥८॥ हिरण्यगर्भो लिंगवामंतःकरणसंज्ञिते॥ नरवस्त्राप्मदेषु चंद्रमा मनसि
स्थितः॥९॥ बुद्धौ हृदस्य निर्विप्राः स्थितः कालाग्निरुद्रकः॥ अहंकारे शिवश्चित्ते रोमसु तत्र देवताः॥१०॥ भूत
प्रेतादयः सर्वे देहस्थाः स्थिताः॥ पिशाचा राक्षसाः सर्वे स्थिताः स्नायुषु सर्वशः॥११॥ मज्जास्थिपित्तगंधर्वास्त्वक्
रुधिरेषु च॥ वर्तन्ते तत्र संसिद्धा देवताः सकला द्विजाः॥१२॥

त्वगादिषु त्याख्यास्तदेवताः॥ जायंते क्रमशः श्रोत्रप्रमुखेषु समष्टिस्थिता इति॥ अंतःकरणसंज्ञित इति॥ अंतःकरणरूप्य
यवेन समष्टेर्जातत्वात् हिरण्यगर्भो विनिष्ठते॥ तदप्युक्तं॥ या देवतांतःकरणसमष्टेः सर्वकल्पवत्॥ विनायते मुनिश्रेष्ठ सूक्ष्मा
नश्वरीरिन इति॥ हृत्कमलाग्रे हिरण्यगर्भश्च यथा यः॥६॥७॥१०॥१२॥

ब्रह्मविष्णवादीनां योरग्रंन्तं नेत्रेन प्रत्येकं चक्षुः कर्णहृदयेषु अन्तर्बहिर्न्नार्वन्तेध्येयमित्यर्थः॥ अस्त्राणांकयोरग्रंतन तनुहृदि विणव्रामचक्रुयोरन्तर्नाभे र

भमन्त्रीनां तु योर्ब्रह्मानस्य योरां तनुर्द्विजाः॥ हृदि दक्षिण स्थिते जंनुना मंत्र नभिगे रवि र्वहिः॥१३॥ त्रिमन्त्रीनां तु यो ब्रह्मानस्याग्रंतानन
तुर्द्विजाः॥ वर्त्तन्ते वामनेत्राग्रं तर्नाभौ बाह्ये निशाकरः॥१४॥ त्रिमन्त्रीनां तु यो विष्णुः सकंठे वर्त्तते सदा॥ अंतःशांतनतनुर्ये
सतनुर्वाघ्रेद्विजर्षभाः॥१५॥ त्रिमन्त्रीनां तु यो रुद्रो हृदये वर्त्तते सदा॥ अंतःशांततनतनुर्योसि तनुर्वह्नि द्विजर्षभाः॥१६॥
सर्वेषां कारणं यत्तद्ब्रह्म सत्यादिलक्षणं॥ ब्रह्मरंध्रे महास्थाने वर्त्तते सततं द्विजाः॥१७॥

मनेवह्निकमसूर्यचिंद्रमसौ॥ ज्ञानएवात्मआम्नातं॥ अग्निर्मूर्द्धि चित्तुर्णी चन्द्रसूर्यावितिसर्वेषां कारणमित्यादिना॥ उक्तानां यत्का
रणं सत्यादिलक्षणं ब्रह्म रंध्रेद्वारश्रां तर्मध्ये वर्त्तते॥१३॥

तस्य ब्रह्मणः स्वरूपभूता चेतसप्रनियोगिनीया चिछक्तिः सा देहमध्येमूलाधारे प्रतिष्ठिता॥ या तु सत्वरजस्तमोगुणात्मिका माया शक्तिः सा
ब्रह्मरंध्रा दधस्ताल्ललाटाग्रभागे स्थिता॥ नादरूपा शब्दब्रह्मात्मिका या परा शक्तिः॥ सा ललाटस्य मध्ये देशे स्थिता या तु बिंदुरूपिणी शक्तिः सा स
ललाटस्यापरांशके स्तुवोमध्ये स्थिताः॥ तस्य च बिंदो र्मध्ये जीवात्मा सूक्ष्मरूपेण वर्त्तते॥ हृदये स्थूलरूपेण विज्ञेयं विज्ञानात्मवा वर्त्तते॥ चि

चिच्छक्तिः परमा देहमध्यमे सुप्रतिष्ठिता॥ माया शक्ति र्ललाटाग्रभागे व्योमांबुजादधः॥१८॥ नादरूपा परा शक्ति र्ललाटस्य तु मध्यम
मे॥ भागे बिंदुमयी शक्तिर्ललाटस्यापरांशके॥१९॥ बिंदुमध्ये तु जीवात्मा सूक्ष्मरूपेण वर्त्तते॥ हृदये स्थूलरूपेण मध्यमेन तु
मध्यमे॥२०॥ देवी सरस्वती साक्षाद्ब्रह्मपत्नी सनातनी॥ जिह्वाग्रे वर्त्तते नित्यं सर्वविद्याप्रदायिनी॥२१॥ विष्णुपत्नी महालक्ष्मीर्वर्त्त
तेऽनाहते सदा॥ रुद्रपत्नी तु रुद्रेण पार्वती सह वर्त्तते॥२२॥ सर्वत्र वर्त्तते साक्षाच्छिवः सांबः सनातनः॥ सात्यादिलक्षणः शुद्धः स
र्वदेव नमस्कृतः॥२३॥ सम्यग्ज्ञानवतां देहे देवताः सकला अमूः॥ प्रत्यगात्मतया भांति देवतारूपतोपि च॥२४॥ वेदमार्गैक
निष्ठानां विशुद्धानां तु विग्रहे॥ देवतारूपतो भांति द्विजा न प्रत्यगात्मना॥२५॥

हृदयर्धमध्यदेशेनुस्थूलस्वरूपो नयसाधारणेन मध्यमरूपेण वर्त्तत इत्यर्थः॥ देवा सरस्वतीत्यादिभिः गर्दसिद्धं॥ अ
नाहतारव्य तत्मध्यस्थाने॥ अनाहते सदेति॥१८॥१९॥ २२॥२३॥ सम्यग्ज्ञानवतामिति॥ ज्ञानिनां देहे एता उक्ताः सर्वदेव
ताः॥ साम्येनावस्थितास्ता अज्ञानिनां प्रहागात्मत्वेन॥

सू. सं. ता.
४३५

नो निर्देवतो रूपत्वेन चाविर्भावितगैः किं निरशनामिति ॥ येत्वज्ञानिनः केवलं वेदमार्गैः कनिष्ठाश्च त एव शुद्धास्तेषामात्मज्ञानाभावात्तच्छरीरे देवा सू. गी.
नां स्वरूपेणावस्थानं नित्यमस्त्यगात्मरूपेणेत्यर्थः ॥ नास्तिकानामिति ॥ शिववेदादिप्रामाणिकत्वं तत्पेनेदमधिकृत्यास्ति ओं हं संस्कारेणेत्यस्य कना
न्तेषां शरीरे वर्तमानानामप्युक्ता देवताः स्वरूपेण प्रतिभासमानानामपि स्पष्टं न प्रकाशं नेतत्र हेतुर्भावशुद्ध्यभावत इति ॥ विशुद्धेत्याधारेणि

नास्तिकानां शरीरेषु देवताः सकला अपि ॥ वर्तन्ते न प्रकाशं तो द्विजेन्द्राः शुद्ध्यभावतः ॥ २६ ॥ यथाज्ञानजनानां तु शरीरे सर्वदेवता
॥ तिरोहिततया नित्यं वर्तन्ते मुनिसत्तमाः ॥ २७ ॥ अनन्तभोगमोक्षार्थी शरीरं देवतामयम् ॥ स्वकीयं परकीयं च पूजयेत्तु वि
शेषतः ॥ २८ ॥ नावमानं सदा कुर्यान्मोहतो वापि मानवः ॥ यदि कुर्यात्त्रिमोहेन पतत्येव भवोदधौ ॥ २९ ॥

मलावृतत्वाद्देवतानां मर्त्येन तेषां च वैदिकसंस्काराभावेन विशुद्धिर्नास्तीत्यभिप्रायः ॥ यथाज्ञानजनानामिति ॥ यथाज्ञानजनानामज्ञ
जनानां तेषां शरीरे नित्यं तिरोहिततया स्वरूपेणापि न प्रकाशन्त इत्यर्थः ॥ २६ ॥ २७ ॥ २८ ॥ रामः
४३५

एवं सर्वशरीरेषु देवतानामवस्थानं प्रतिपाद्य तत्प्रयोजनमाह ॥ मोहेनापीत्यादिना ॥ अतिपतनापतनहननलोहितकरणानि तत्रेषु सावस्थित
देवतापराधभावायनकार्याणीत्यर्थः ॥ अकृतिरपि योवगुणेन ज्ञानेन यानयादिस्तु पक्वमन्तस्माद्ब्राह्मणानामयनावगुरेतन निहन्यात्र लोहि
तं कुर्यादित्यप्रियभाषणानि निषेधति ॥ तस्मात्स्वशरीरवत्परकीयशरीरेष्वपि सर्वत्र देवतामयत्वं चिंतनीयमित्यर्थः ॥ ३० ॥ ३२ ॥ ३४ ॥

दुर्वन्त्रमपि मर्त्यं च पूजयेद्देवतात्मना ॥ देवतारूपतः पश्यन्मुच्यते भवबंधनात् ॥ ३० ॥ मोहेनापि सदा नैव कुर्यादप्रियभाषणम् ॥ य
दि कुर्यात्प्रमादेन हंति तं देवतापरा ॥ ३१ ॥ नरकं तं विपहेत कुर्याद्दिस्त्रं शास्त्रनखादिभिः ॥ तथा नलोहितं कुर्याद्यदि कुर्यात्स नराम
धः ॥ ३२ ॥ स्वदेहे परदेहे वा न कुर्यात्किंतु नरः ॥ यदि कुर्यात्तु चक्रोधे पतत्येव न संशयः ॥ ३३ ॥ रहस्यं सर्वशास्त्राणां मया प्रो
क्तं समासतः ॥ शारीरदेवतारूपं नात्र धं यस्य नास्तिकाः ॥ ३४ ॥ इति श्रीस्कंदपुराणे सूतसंहितायां यज्ञवैभवखंडस्योपरि
भागे सूतगीतायां सप्तमोऽध्यायः ॥ ७ ॥ सूत उवाच ॥ अथ वक्ष्ये समासेन सर्ववेदांतनिर्णयम् ॥ यं विदित्वा नरः साक्षान्निर्वाण
मधिगच्छति ॥ १ ॥ परात्परतरं तत्वं शिवः सत्यादिलक्षणः ॥ तस्यासाधारणी मूर्तिरंबिका सहिता सदा ॥ २ ॥

इति श्रीमत्त्र्यंबकपादाब्जसेवापरायणेनोपनिषन्मार्गप्रवर्तकेन माधवाचार्येण विरचितायां सूतसंहितातात्पर्यदीपिकायां यज्ञवैभ
वखंडस्योपरिभागे सूतगीताव्याख्यायां सप्तमोऽध्यायः ॥ ७ ॥ एवं वेदांतवाक्यानां विस्तरेण प्रतिपादितमर्थं सुखावबोधार्थं संगृ
ह्णाति ॥ अथ वक्ष्य इत्यादिना ॥ १ ॥ वेदांतेषु वेद्यब्रह्मणो रूपं तत्प्राप्त्युपायं च तावद्विधा ॥

न्साधनाद्दानिश्रवणादीनि तत्कर्तव्ये नानिश्चितिपादितानि॥ न च वेद्यस्वरूपं दर्शितं सम्यक्त्वत्वे दैनंदिविधामपि दर्शयन्ति॥ परा इति॥ असाधा
रणी मूर्तिरिति॥ शिवतत्त्वात्मकं हि परशिवस्वरूपं तद्दर्शितं व्यक्ति हेतुत्वाद्द्वैतात्मीश्वरमूर्तिस्तस्य साधारणी॥ नहि मूर्तेः तत्त्वाद्दर्शनात्म
कत्वं शिवस्य प्रकटीभवतीत्यर्थः॥ एवमद्वितीयस्य चरमतः परशिवस्वरूपस्यापि प्रमेयत्वात्ततः संसारप्रतीतौ कारणमाह॥ संसारेति

॥ स्वस्वरूपमहो नैरात्म्यमोहात्तां ददत्प्रिया॥ शिवादिनामान्येवास्यो नामानि मुनिपुंगवाः॥३॥ ब्रह्माविष्णुरुद्रेश्वरपरतत्त्वविन्नतयः॥ त्रि
मूर्तीनां तु रुद्रस्य वरिष्ठा ब्रह्मणो हरेः॥४॥ संसारकरणं माया सा सरस्वत्त्वं द्विजत्तमाः॥ प्रतीत्यै वस्तुमात्रं वस्तुस्यानेव प्रमाणतः॥५॥

॥ ननु सत्यदःसत्यदरस्यादिमाया कार्यस्यापि घटादेः सत्त्वाद्वहारदर्शनात्तत्कारणं तन्माया प्यात्मवत्परमार्थसती किं न
स्यादित्यत आह॥ प्रतीत्यैवेति॥ अधिष्ठानसत्तैव मवारोप्यगतत्वेन प्रतीयते ऽतः प्रतीतिकमेव मायातत्कार्यस्य सत्त्वं वास्तवमि
त्यर्थः॥५॥ राम॰ ४३८

नन ज्ञानेनेति॥ मुक्तिरज्ञादित्वमस्याधिष्ठानयाथार्थ्यज्ञाननिवर्त्यत्वदर्शनात्परशिवस्वरूपेऽध्यस्तमाया तत्कार्यज्ञानस्य तत्कारणमाया
ज्ञानमात्रनिवर्त्यत्वात् तन्नाशे तत्त्वज्ञानमेव साधनं नान्यदित्यर्थः॥ एवं विद्यास्तत्र्यासिसाधनत्वमुपानिषद्विपत्तदुत्पत्तिसाधनमाह॥ ज्ञान
मिति॥ तत्त्वमस्यादिवेदांतमहावाक्यानि ब्रह्मात्मैकत्वविषयाणि मुक्तिसाधनविधौ तत्रोऽप्रमाणमित्यर्थः॥ एवमात्मविद्यासाधनमुक्ता
त्वदुपकारकमंतरंगसाधनमाह॥ नश्चेति॥ वाक्यादेवेति॥ ईश्वरप्रसादादिसहकृतादेवतादेवता वेदांतवाक्याच्छमदमादिसाधन

संपन्नस्यातिरेकेण केवलकेनानैव विषये॥ नत्वेज्ञानेन मायापाबाधो नान्येन कर्मणा॥६॥ ज्ञानं वेदांतवाक्योत्थं ब्रह्मात्मैकत्वगोचरं
॥ तच्च देवप्रसादेन गुरोः साक्षान्निरीक्षणात्॥७॥ जायते शक्तिपातेन वाक्यादेवाधिकारिणां॥ ज्ञानेच्छाकारणेन दानं यज्ञाश्च विवि
धाश्च पि॥८॥ न पापिसर्ववेदानां वेदांतानां तथैव च॥ पुराणानां समस्तानां स्मृतीनां सारतस्तु च॥९॥ वेदांगानां च सर्वेषाम् विवे
दार्थपारगाः॥ अध्यापनेनाध्ययनं वेसार्थविरमाणता॥१०॥ उपेक्षा वेदबाह्यार्थे लौकिके वैदिके पि॥ शांतिदांत्यादयोऽध
मो ज्ञानस्यांगानि सुव्रताः॥११॥
संपन्नस्याधिकारिणो ब्रह्मात्मैकत्वविषयं ज्ञानं जायत इत्यर्थः॥ नमेतं वेदानुवचनेन
ब्राह्मणा विविदिषंतीत्यादिश्रुत्या यानि बहिरंगसाधनान्याम्नातानि तान्यपि दर्शयति॥ ज्ञानेच्छेति॥८॥९॥१०॥ यज्ञदानादिभिः प
रिपक्वचित्तस्य विद्योत्पत्त्यनुकूलत्वेन यानि शमदमादीनि साधनान्याम्नाय तेषां तो दांत उपरतस्तितिक्षुरित्यादिनात
न्यपि दर्शयति॥११॥ शांतोति श्रोत्रियत्वादयस्तु दाघनुष्ठानवक्ष्यमाणपुराणागमप्रसिद्धशिवलिंगाच नं॥

इथमस्यापि विधोन्यत्रिमाथनता माहात्म्यशालिना इत्यादिना ॥ चिन्मंत्रस्येति सच्चिद्रूपिण्याः परशक्तेर्वाचकोहंस्वरूपो यो मंत्रस्तस्य मंत्रस्यार्थः ॥ अ

ज्ञानांगेष्वपि समस्तेषु नक्षत्रालिंगे शिवार्चनं प्रतिष्ठा देवदेवस्य शिवस्य ध्यानं निरीक्षणं ॥१३॥ शिवभक्तस्य सज्ञानं च मिलित्वा भक्तिस्तथैव
च ॥ रुद्राक्षधारणं भस्मा कर्णिकं च तथा करे ॥१४॥ अधिगिरिसादि निर्मितैर्मंत्रैः स्वमनैः बावागुंठनं ॥ त्रिपुंड्रधारणं चापि ललाटादिस्थलेषु च ॥१५॥ वेदवेदान्तनिष्ठस्य महात्मा कलिकस्य च ॥ गुरोः शुश्रूषणं नित्यं वरिष्ठं परिकीर्तितं ॥१६॥ चिन्मंत्रस्य पदार्थस्य हंसाख्यस्य मनोजे ... पदत्रयस्य तारस्य वरिष्ठः परिकीर्तितः ॥१७॥ अविमुक्तसमाख्ये च स्थानव्याघ्रपुराभिधं ॥ श्रीमद्दक्षिणकैलाससमाख्यं च सुशोभनं ॥१८॥ मार्गान्निरोदितां चाद्यो रास्या ग्रैधिमः ॥ सुशोभनः ॥ स्मानस्त्रो नः परोधर्मः श्रौतात्कष्टो न विद्यते ॥१९॥

परे परमात्मनि निमारकोत्तरात्कृत्तात् ॥ परमश्रौतमानत्वात् ॥ हंसाख्यस्येत्यादि स्पष्टं ॥२३॥ ॥ ॥

प्रतिपादितमयति ॥ इत्युक्तेत्यादिकविवाक्यं ॥ एवमुपनिषदामागमानां चाद्वितीयब्रह्मपरत्वं प्रतिपाद्य तत्राधिकारिणे देनव्यवस्थाम

त्र्यंतादिपार्थधर्माद्वैते शिवे परमकारणे ॥ श्रुतिरेव महामानं स्मृतिस्तदनुसारिणी ॥२०॥ ज्ञानात्वेकं सर्वं धर्मसिकं दनत्तं प्रकीर्तितं श्रुति
षिद्धक्रियायागः कंदस्यापि चकारतं ॥२१॥ शिवः सर्वमिति ज्ञानं सर्वज्ञानेषु मोत्तमं ॥ नत्तुल्यं नतरं चापि न किंचिद्विपिविद्यते ॥२२॥ वक्तव्यं
सकलं प्रोक्तं मयाति श्रद्धया सह ॥ अतः परं तु वक्तव्यं न पश्यामि मुनीश्वराः ॥२३॥ इत्युक्त्वा भगवान्सूतो मुनीनां भावितात्मनां ॥
सांबं सर्वेहि ॥ अतः परं तु वक्तव्यं न पश्यामि मुनीश्वराः ॥२३॥ इत्युक्त्वा भगवान्सूतो मुनीनां भावितात्मनां ॥ सांबं सर्वेश्वरं ध्यात्वा
नमस्कारं परवशो नवत् ॥२४॥ अथ यत्र शिवनक्षत्रासच्छिरानेद स्त्रणं परशिवमनुन्नयस्यात्मरूपेण स्तुतः ॥ मुनिभिगुणमवन्तो सप्रा
हसाक्षाद्गुणाधिकं नपश्यति नरूपेवेदिन व्यनुकिंचित् ॥२५॥ श्रुतिपथगम्यजितानां मानुषाणं तु तं त्रंगुरुगारुरखिलेशाः ॥ सर्वे
विन्माहं शंभुः ॥ श्रुतिपथनिरतानां तत्र नैवास्ति किंचिद्दितकं रमिह सर्वं पुष्कलं सत्यमुक्तं ॥२६॥ ॥ श्रुतिपथेति ॥ यद्यपि
कामिकादिषु नेहानामागमानां चोक्तरीत्या अद्वितीयतीयपरशिवस्वरूपात्मप्रतिपादनेपि प्रतिपत्तिर्नास्ति तथापि येउपनाना ....व
णिकः ॥२१॥२२॥२३॥२४॥

स्कं·सं·ता·
४३९

ऽकृतनवधिकृतानां तेषां तन्मुखाद्दैवपरत्वमधिगन्तव्यं शैवानां कृतानवनधिकारस्तेषामागममुखादिति विवेकः ॥२६॥ वर्णाश्रमधर्मात्यपि तानि

स्कं·गी·

अतिरपि मनुजानां वर्णधर्मं विना पेयरगुरुरखिलेशः प्राह तन्त्रेषु तद्वत् ॥ अतियथगलितानां वर्णधर्मं धृणाधिः अति-
पथनिरतानां नैव तत्सेवनीयं ॥२६॥ अतिपथनिरतानामाश्रमा यद्वदुक्ताः परगुरुरखिलेशः स्तद्वदाहाश्रमांश्च ॥ अतिपथग-
लितानां मानुषाणां तु तन्त्रे हरिरपि मुनिमुख्याः प्राह तन्त्रेस्वकीये ॥२७॥ विधिरपि मनुजानामाह वर्णाश्रमांश्च ॥ अतिपथ-
गलितानामेव तन्त्रे स्वकीये ॥ अतिपथनिरतानां तेन संसेवनीयाः अतियथसममार्गो नैव सन्तं मयोक्तं ॥२८॥ हरह-
रिविधिकृप्ता कीर्तितास्सर्वतन्त्रे अतिपथनिरतानां यद्वदुक्तास्तथा ॥ अतिपथगलितानामेव तन्त्रोक्तदृप्ता अतिपथनि-
रतानां सर्ववेदोदितैव ॥२९॥

रामः
४३९

कालीं वैदिकानां च तन्त्रव्यवस्थायैव प्रयोक्तव्यादित्याह ॥ अतिरपीति ॥ न केवलं शैवागमा-
नामेवैवं व्यवस्था विष्णुब्रह्मागमपि अकृतानधिकृतविषयत्वं दर्शयति ॥ अतिपथेति ॥२७॥२८॥२९॥

ऽकृतानवधिकृतस्य पुरुषस्य त्रिपुंड्रधारणं विधाय कृतानधिकृतानां वैष्णवागमोक्तमकारसंस्कृतानां तन्त्रागमप्रतिपादितो

अतियथगलितानां सर्वतन्त्रेषु लिंगं कथितमखिलदुःखध्वंसकं तत्र तत्र ॥ अतिपथनिरतानां नस्सदा नै-
व धार्यं अतिरपि मनुजानामाह लिंगं विशुद्धं ॥३०॥ शिवागमोक्ताश्रमनिष्टमानव त्रिपुंड्रलिंगं तु सदैव
धारयेत् ॥ तदुक्तमन्त्रेण ललाटमध्यमे महादेवेण वसितेन भस्मना ॥३१॥ विष्ण्वागमोक्ताश्रमनिष्ठया न
वस्तु एवं पुंड्रान्तरमूर्ध्वरूपकं ॥ त्रिशूलरूपं चतुरस्रमेव वा मृदा ललाटे तु सदैव धारयेत् ॥३२॥ ब्रह्मागमो-
क्ताश्रमनिष्ठमानवो ललाटमध्येपि च वर्तुलाकृतिं ॥ तदुक्तमन्त्रेण सितेन भस्मना मृदाथवा चन्दनतः
स्तु धारयेत् ॥३३॥ अश्वत्थपत्रसदृशं हरिचन्दनेन मध्ये ललाटमतिशोभनमादरेण ॥ बुद्धागमे
मुनिवरा यदि सर्वेक्तं तन्मन्त्रतः किल धारयेत ममैव तु धारयेच्च ॥३४॥ ऊर्ध्वपुंड्रद्वयं नित्यं धारयेज्ज-
न्मनामहा ॥ ललाटे हि गमे निष्ठ श्वेतेनाथवा नरः ॥३५॥

ऊर्ध्वपुंड्रधारणं दीन्यपि श्रेयः साधनानीत्याह ॥ विष्ण्वागमेति ॥३०॥३१॥३२॥३४॥३५॥ ॥ ॥ ॥

सितेन भस्मना तिर्यक्त्रिपुंड्रस्य च धारणं ॥ सर्वागमेषु निष्ठानां तत्र तन्मंत्रेण शोभनं ॥ ३८ ॥ शिवागमेषु निष्ठानां धार्यं तिर्य-
क्त्रिपुंड्रकं ॥ एकमेव महादेवतानेव पुंड्रांतरं बुधाः ॥ ३९ ॥ वेदमार्गैकनिष्ठानां वेदोक्तेनैव वर्त्मना ॥ ललाटे भस्मना ति-
र्यक्त्रिपुंड्रं धारयामेव हि ॥ ४० ॥ ललाटे भस्मना तिर्यक्त्रिपुंड्रस्य तु धारणं ॥ विना पुंड्रांतरं मोहाद्धारयन् पतति द्विजः ॥ ४-
१ ॥ विष्ण्वादिगमादितंत्रेषु दीक्षितानां विधीयते ॥ गोपीचंदनमृद्गार्वहैरकनेनान्यदेना ॥ ४२ ॥ दीक्षितानां तु तंत्रेषु न-
राणां कंकं द्विजाः ॥ उपकारकमेवोक्तं क्रमेण मुनिपुंगवाः ॥ ४३ ॥ पुंड्रांतरस्य तंत्रेषु धारणं दीक्षितस्य
तु ॥ उपकारकमेवोक्तं क्रमेण मुनिपुंगवाः ॥ ४४ ॥ वेदमार्गैकनिष्ठस्तु मोहेनाप्यंकितो यदि पतत्येव
न संदेहः तस्य तथा पुंड्रांतरादपि ॥ ४५ ॥ नाकनं विग्रहे कुर्याद्देहपंचाननमाश्रितः ॥ पुंड्रांतरं
भ्रमाद्वापि ललाटे नैव धारयेत् ॥ ४६ ॥

शैववैष्णवादितंत्रोक्तधर्मग्रंथस्त्रागमोक्तप्रकारेण प्रतिष्ठापितदेवतानमस्कारपूजनादिकमपि तेषामेव धर्मो न वैदिकानामित्या-
शंक्याह ॥ तंत्रोक्तेनेति ॥ तंत्रोक्तेनेति ॥ देवतास्वरूपस्य निर्देश तान्त्रतंत्रनिर्दिष्टप्रकारेण देवतास्वरूपप्रयुक्तनमस्कारपूजा

तंत्रोक्तेन प्रकारेण देवता या प्रतिष्ठिता ॥ सापि वंद्या सुसेव्या च प्रतनीयाश्च वैदिकैः ॥ ४५ ॥ रुद्रमेव हि सर्वत्र देवतारू-
पमास्तिकाः ॥ तत्र तंत्रोक्तपूजा तु तंत्रनिष्ठस्य केवलं ॥ ४६ ॥ तंत्रेषु दीक्षितो मर्त्यो वैदिकं न स्पृशेत्सदा ॥ वैदिकस्था-
पि तंत्रेषु दीक्षितं न स्पृशेत्सदा ॥ ४७ ॥ राजा तु वैदिकान् सर्वांस्तांत्रिकान् विद्यानपि ॥ असंकीर्णतया नित्यं स्था-
पयेत्प्रतिसद्मसु ॥ ४८ ॥ अन्नपानादिनिर्देशैः सर्वान् राजा निरंतरं यतेत् ॥ वैदिकांस्तु विशेषेण ज्ञानिनं-
तु विशेषतः ॥ ४९ ॥ महादेवसमो देवो यथा नास्ति मुनीश्वराः ॥ तथा वैदिकतुल्यस्तु नास्ति तं-
त्रावलंबिषु ॥ ५० ॥ यथा वाराणसीतुल्या पुरी नास्ति मुनीश्वराः ॥ तथा वैदिकतुल्यस्तु नास्ति तंत्रावलंबि-
षु ॥ ५१ ॥ शिवज्ञानसमं ज्ञानं यथा नास्ति मुनीश्वराः ॥ तथा वैदिकतुल्यस्तु नास्ति तंत्रावलंबिषु ॥ ५२ ॥

रिकं वैदिकैरपि कर्तव्यमेव ॥ तत्र हागमोक्तप्रकारेणं ॥ विशिष्टपूजा वनेषां केवलं व्यवतिष्ठत इत्यर्थः ॥ तंत्रे-
षु दीक्षितो मर्त्य इत्यादि वैदिकप्रशंसापरं ॥ ५० ॥ ५१ ॥ ५२ ॥

सू॰सं॰ता॰
५५०

आगमिकैरूपजीवत्वाद्पि वेदमार्गविद्येयानि त्या॥ वेदोक्तमिति॥५३॥ पठ्यापठ्या दृशाः॥६३॥

वदुत्तरसमो मंत्रो यथा नास्ति स्मृतौ स्मृतौ॥ तथा वैदिकतुल्यस्तु नास्ति तंत्रावलंबिषु॥५३॥ यथा भागीरथीतुल्या नदी नास्ति
स्मृतौ स्मृतौ॥ तथा वैदिकतुल्यस्तु नास्ति तंत्रावलंबिषु॥५४॥ उदरेनेन समं नोन्यं यथा लोके न विद्यते॥ तथा वैदिकतुल्य
स्तु नास्ति तंत्रावलंबिषु॥५५॥ देवदेवो महादेवो यथा सर्वैः प्रपूज्यते॥ तथैव वैदिको मर्त्यः पूज्यः सर्वत्र नैरयि॥५६॥
आदित्येन विहीनं तु जगदंधं यथा भवेत्॥ तथा वैदिकहीनं तु जगदंधं न संशयः॥५७॥ प्राणेंद्रियादिहीनं तु श
रीरं कुणपं यथा॥ तथा वै वैदिकहीनं तु जगदंध्यं न संशयः॥५८॥ अहो वैदिकमहात्म्यं मया वक्तुं न शक्यते॥
वेद एव तु माहात्म्यं वैदिकस्याब्रवीन्मुदा॥५९॥ अनंतमस्य पुराणानि भारतादीनि सुव्रताः॥ वैदिकस्य तु माहात्म्यम
वदन्निस्पृहा॥६०॥ वेदार्थं मोत्रिकाः सर्वे लौकिकं वैदिद्विजर्षभाः॥ नोपजीवंति तन्मोक्षे वेदः साक्षात्सनातनः॥६१॥
इत्युक्त्वा भगवान्सूतः॥ स्वगुरुं व्याससंज्ञितं॥ स्मृत्वा मनसा वाचा नत्वा पपात भुवि दंडवत्॥६२॥ अथास्मिन्नवसरे श्री
मान्मुनिः सत्यवतीसुतः॥ शिष्यस्नेहकृपाकृष्टस्तत्रैवाविरभूत्स्वयं॥६३॥

सू॰गी॰
रामः
५५०
॥५॥

तं दृष्ट्वा मुनयः सर्वे संतोषादृगद्स्वराः॥ निपेतुस्तानि नरांन्सौ प्रणम्य करुणानिधिं॥६४॥ स्तोत्रैः स्तुत्वा महात्मानं व्यासं स
त्यवतीसुतं॥ जयजया मासुरम्यर्थैरन्यश्च फलादिभिः॥६५॥ भगवानपि सर्वज्ञः करुणासागरः प्रभुः॥ उवाच मधुरं व
चो मुनीनां लोकसुव्रतान्॥६६॥ व्यास उवाच॥ शिवमस्तु मुनीन्द्राणां नाशिवं तु कदाचन॥ अहो नारायणमहो नारायणं मया व
क्तुं न शक्यते॥६७॥ अथ यतो मुनयः सर्वे तापवंतः समाहिताः॥ प्रसादादेव रुद्रस्य प्रभोः कारुणिकस्य च॥६८॥ पुराणं
येन मया नामहेकन्नो पुरातनं॥ मत्प्रसादाहृदयं स्तुतस्य नवदुद्रवत्स्व नः॥६९॥ रुद्रस्याज्ञाबलादेव प्रभोः कारुणिकस्य च॥
पुराणसंहिता कन्नादिशिकस्या नवदर्शं॥७०॥ पुराकृतेन तु पेन नवंतो पीश्वराज्ञया॥ मत्वा रस्माद्गुतेरर्थस्य
त्वेनवंतो यथातथं॥७१॥ कृतार्थोस्य प्रसादश्च रोदुः किं न करिष्यति॥ आज्ञया केवलं शंभोरहं वेदार्थवेदार्थ
वेदनं॥७२॥ सहस्रं सर्ववेदांतवाक्यानामर्थनिश्चये॥ समर्थश्च नियुक्तश्च स्कंदोरंभकोकृतेपि च॥७३॥ आज्ञ
या देवदेवस्य नवतामपि योगिनां॥ ज्ञाने गुरुर्गुरुस्त्वाहं मम वं मुनिपुंगवाः॥७४॥ नवंतोपि शिवं ज्ञानं वेदसिद्धं वि
शेषतः॥ तस्मात्परमया भक्त्या निष्ठा भवत सर्वदा॥७५॥ इत्युक्त्वा भगवान्व्यासः स्वशिष्यं सूतमुत्तमं॥ उत्थाप्यालिंग
द्य वेगात्सम्यान्न तत्रागमद्गुरुः॥७६॥

रन्तं ज्ञानयज्ञवैभवं प्रतिपाद्य मानसवाचिककायिकभेदेनावस्थितसकलयज्ञवैभवं प्राक्प्रतिपादितं निगमयति यज्ञवैभवेनेति॥७७

पुनश्च सूतः सर्वज्ञः स्वशिष्यानवलोकयन्॥ प्रहृष्टगंभीरया वाचानमेतं शिवमस्मिति॥७७॥ मयोक्ता परमा गीता पठिता
येन तस्य तु॥ आयुरारोग्यमैश्वर्यं विज्ञानं च भविष्यति॥७८॥ शिवप्रसादः सुलभो भविष्यति न संशयः॥ गुरुतं च म
नुष्याणां भविष्याणां भविष्यति न संशयः॥७९॥ विद्यारूपायाः शिवायै देवदेवाय सत्यानंदानंतसंविस्वरूपाय॥ तस्या वा
चः सर्वलोकैकमातुर्नित्यानित्यं चांबिकायाः प्रसादात्॥८०॥ गुरुप्रसादादपि सुव्रता मया शिवप्रसादादपि
चोग्रमोत्रमोत्रमात्॥ विनायकस्यापि महाप्रसादात् षडाननस्यापि महाप्रसादात्॥८१॥ यज्ञवैभवमस्माकं यः स्व
तः सर्ववेदमथनेन समुद्भृतमाः॥ अत्र मुक्तिरिति प्रोक्ता मया परासुखितेन वा॥ वृतहितं न संशयः॥८२॥ यज्ञवैभवस
माकं यं परं खंडमत्तु विसलं पठेन्नरः॥ सत्यबोधसुखलक्षणं शिवं सत्यमेव हृदि तिष्ठयाति हि॥८३॥ सूतसं
हितापरासमस्तदुःखहारिणी नरस्य मुक्तिदायिनी शिवं सादकारिणी॥ समस्तवेदसारतः मुनिर्मितानि श्रोत
नामहत्र रात्रुनतिमद्विराहतानवाप रैः॥८४॥ ८०॥८३॥८४॥

मत्तां नोऽस्त सतसंहितां परिसमापयन्॥८५॥८६॥८७॥ ९१॥ ॥इति श्रीमत्काशीविलासक्रियाशक्तिपरमभक्तश्रीमत्त्र्यंबकपादाब्जसेवाप
सूतसंहितानुवानया विरुद्धमस्ति चेदनर्थकं हि न बुधा वचः प्रयोजनापन॥ श्रुतिप्रमाणरूपिणीं संहितां प्रयोरिता श्रुतिःप्रमा
णमत्र सा महाजनस्य संततं॥८५॥ सूतसंहितामिमामतिप्रियेण मानवः पठन्नयाति संसृतिं प्रयाति शंकरं॥ ज्ञानखड्गेशो
नवाभिमामहर्निशं समाहितः स्वमुक्तये॥८६॥ पुराणसंहितामिमामतिप्रियेण यः पुमान् शृणोति संसृतिं पुनर्नयाति या
तियाति शंकरं॥ परानुभूतिरद्वयाविजायते च तस्य मा शिवा च वाचि नत्यतिप्रियेण शंकरोपि च॥८७॥ सत्यबोधसुखल
क्षणं तत्त्वमथ विभवं सनातनं॥ भस्मरूपमथ सुनापहं शिवं भक्तिगम्यमपमलं सदानुमः॥८८॥ यानुभूतिरमला
स देहिनां वेदमानविरतास्तु नावहा॥ तामतीवासुखेश्वदामहं शिवां केशवादिजनसेवितां नुमः॥८९॥ वेदपद्मनिकरस्य
भास्करं देवमद्वयगुणनिधिं॥ व्यासमिष्टफलदं गुरुं नुमः शोकमोहविषवेगभेषजं॥९०॥ ये वेदवेदांतपथ तामसाज्ञ नाः शिवा
भिमानेन निरस्तकिल्बिषाः॥ नमामि वाचा शिरसा हृदा च तान् न वा हि वेगस्य निवारकान् हं॥९१॥ ॥इति श्रीस्कंदपुराणे सू
तसंहितायां यज्ञवैभवखंडोपरिभागे सूतगीतायामष्टमोऽध्यायः॥

मयलेनोपनिषन्मार्गप्रवर्तकेन माधवाचार्येण विरचि
तायां सूतसंहितातात्पर्यदीपिकायां यज्ञवैभवखंडस्योपरिभागे सूतगीताव्याख्यायामष्टमोऽध्यायः॥८॥ ॥

सू·सं·ना·
५५२

इतिसूक्तसंहितासंपूर्णा

सू·उ·

रामः
५५२